his own mind. By following the words of saints by means of severe self-discipline one should destroy the effects of bad actions. Those preceptors should be abandoned who by the desire of wealth bring their pupils into difficulties. One that has faith in the words of Arhat naturally understands the philosophy of such subjects as birth, death, creation, absolution, &c. Doctrines which are false (other than Jaina doctrines) should be avoided as leading to evil consequences. The attainment of absolution should be preferred even to the attainment of godhead,as the happiness of the former is eternal while that of the latter is temporary. One should always bow to the preceptor who puts down in public discussion the preachers of false doctrines. Without the three 'gems' —faith (ज्ञान)—knowledge of religious truths (दर्शन) and good conduct (चारित्र)—absolution cannot be obtained, as valuables do not fall from the skies, but can only be purchased with money. Mercy practised daily towards living beings leads to salvation; and it makes no difference whether one is in a holy place or in a jungle or in his own house. Those who violate religious binding by eating at night fall into depths of sins and have to pass through innumerable lives. To attain heaven one should be merciful towards living beings and to attain absolution one should practise self-control; all other efforts are utterly useless. Those ears and hearts are blessed which every moment receive, and hold fast, fresh words of sound sense coming from saints. The distinction between 'mine' and 'thine' altogether disappears from the minds of those into whose ears even the mention of the revelation of Jina has found its way. Thoughts should be fixed on religion in order to make one's heart free from passions, to make one's word true and to make one's conduct pure. Can waters have the power of bestowing

good, that people go to the Narmadā, the Sarasvatī, the Yamunā and the Bhāgīrathī and throw themselves like beasts into them? Jina should be fixed firmly in mind as if he were made a resident there or as if he were painted or engraved or reflected there or as if he were there by nature. Without mercy all show of holiness is worthless; and one possessed of mercy cannot fail to get salvation.

Some important events in the life of king Kumārapāla may be summarised here. He was born in Saṁvat 1149 or 1092 A.D., and came to the throne in Saṁvat 1199 or 1142 A.D. The first ten years of his reign were taken up by the consolidation of his position as King. He was a great warrior and extended the kingdom of Gujarat largely. Hemacandra mentions in his Mahāvīracarita that the conquests of king Kumārapāla would extend to Turkistan in the North, the Ganges in the East, mount Vindhya in the South, and the ocean in the west.

स कौबेरीमातुरुष्कमैन्द्रीमात्रिदशापगाम् ।
याम्यामाविन्ध्यमावार्धिं पश्चिमां साधयिष्यति ॥ IV. 52.

The most important victories over the Sāṁbhara King Arṇorāja and the Silāhāra king Mallikārjuna have already been mentioned above. When peace was established in the country he devoted himself zealously to religious matters. His minister Bāhaḍadeva introduced Hemacandra to him, and his learning made such a strong impression on him that he became converted to Jainism in Saṁvat 1209 or 1152 A.D., took the twelve vows of the faith, built numerous temples throughout his kingdom, stopped the seven vices, and issued orders for the prohibition of slaughter in the kingdom. Two edicts on non-injury to beings issued by the feudatories of Kumārapāla, Pūnapākṣa and Āḷhaṇadeva, have come to light. He made

pilgrimage to mount Girnar and mount Śatruṃjaya. He died in Samvat 1229 or 1172 A.D. at the mature age of 80.

[Material on the life of king Kumārapāla :—Kumārapāla-pratibodha of Somaprabhācārya, GOS. XIV. 1920 ; Moharāja-parājaya of Yaśahpāla, GOS. IX, 1918 ; Prabhāvakacarita ; Prabandhacintāmaṇi ; Kumārapālacarita of Cāritrasundara ; Kumārapālaprabandha of Jinamaṇḍana ; Rāsamālā edited by Forbe; Bombay Gazetteer ; the present work, i. e., Dvyāśraya Kāvya of Hemacandra ; Kumārapālacarita of Jayasiṃhasūri.]

V

Ācārya Hemacandra was born in Samvat 1145 or 1088 A.D. at Dhandhukā in a family of Modha bania caste. His name at birth was Caṅgadeva or Cāṃgodeva, his mother's name was Pāhiṇī or Cāhiṇī and his father's name was Cacca, Cāca or Cāciga. The father professed Hinduism and the mother was an ardent follower of Jainism. When Caṅgad eva was just five years old, or, according to *Rāsamālā*, eight years old, ācārya Devacandra happened to visit Dhandhukā. The mother used to go to the Jain Temple with her son, There ācārya Devacandra who was staying in the temple noticed on the person of the boy signs of high spiritual life as also of intelligence of high order. Devacandra persuaded the mother to entrust the boy to him so that he might receive initiation as a Jain ascetic. This took place in Samvat 1154 or 1098 A.D. The mother agreed with great difficulty. The father of the boy was away all the while, and when on his return he found his son to have become a monk, he got angry, went to Devacandra to demand his son back, but was persuaded by Udayana, minister of Jaya-

siṃha *alias* Siddharāja, to give up the boy to follow the religious life. The boy was given the name of Somacandra on his entering the order of ascetics. He thereafter studied various branches of Hindu and Jain sciences. In recognition of his scholarship, his old ācārya gave him the Mantra and the title of Sūri and re-named him as Hemacandra. This ceremony was performed at Nagor in Samvat 1162 or 1105 A.D. Hemacandra thereafter visited Aṇahillapura, the capital of Gujarat, and was introduced to king Jayasiṃha *alias* Siddharāja. It was at the suggestion of Siddharāja that he wrote his Grammer and, for the high patronage that he received from the king, named it Siddha-Hema-Śabdānuśāsana, and himself wrote a commentary on it. During the reign of Siddharāja, Hemacandra composed a few more works such as Abhidhānacintāmaṇi and Anekārthasaṃgraha. Siddharāja honoured Hemacandra as a learned monk at first, but gradually came under the influence of his religious tenets also. It is said that under Hemacandra's instruction Siddharāja built two Jain temples Rājavihāra in the capital and Siddhavihāra at Siddhapura. The work which Hemacandra began in the reign of Siddharāja was completed in the reign of his successor, king Kumārapāla; for Siddharāja only favoured Jainism, while Kumārapāla adopted Jainism as the religion of the state.

Hemacandra is a versatile and encyclopaedic writer. The tradition says that his writings extend to three crores and a half of ślokas. The Prabhāvakacarita says :—

व्याकरणं पञ्चाङ्गं प्रमाणशास्त्रं प्रमाणमीमांसाम् ।
छन्दोलंकृतिचूडामणी च शास्त्रे विभुर्व्यधित ॥ १ ॥
एकार्थानेकार्था देश्या निर्घण्ट इति च चत्वारः ।
विहिताश्च नामकोशा भुवि कवितानटघुपाध्यायाः ॥ २ ॥

त्रिषष्टिशलाका नरेशव्रतगृहिव्रतविचारे ।
अध्यात्मयोगशास्त्रं विदधे जगदुपकृतिविधित्सुः ॥ ३ ॥
लक्षणसाहित्यगुणं विदधे च व्याश्रयं महाकाव्यम् ।
चक्रे विंशतिमुचैः स वीतरागस्तवानां च ॥ ४ ॥
इति तद्विहितग्रन्थसंख्यैव हि न विद्यते ।
नामापि न विदन्त्येषां मादृशा मन्दबुद्धयः ॥ ५ ॥

Many of the works of Hemacandra are however in imitation of similar works of other writers; yet in each of them there is something new. For instance, his work, Siddha-Hema-Śabdānuśāsana is written mainly on the lines of Pāṇini's grammar, but Hemacandra adds sections on Prakrit and Apabhraṃśa dialects which to this day stands as a standard and exhaustive work on the subject. His Deśīnāmamālā is similarly the standard lexicon of Prakrit words. His Chandonuśāsana, a treatise on metrics deals exhaustively with Prakrit and Apabhraṃśa metres. His works on poetics, Kāvyānuśāsana and Alaṃkāracūḍāmaṇi have similarly a touch of originality here and there. His works on Jain philosophy and mythology such as Pramāṇamimāṃsā, Yogaśāstra, Triṣaṣṭiśalākāpuruṣacarita are also important. He wrote twenty devotional songs called Vīrastutis including Ayogavyavacchedikā and Anyayogavyavacchedikā. Of these, works of a general nature were composed during the reign of Siddharāja and those of a religious nature were composed during the reign of Kumārapāla. Hemacandra died at the mature age of 84 in Samvat 1229, i. e., 1172 A.D., only six months before Kumārapāla. The King was very much afflicted at the death of his spiritual teacher, and it is said, abandoned all care for worldly affairs and spent time in deep and devout meditation till death.

[Sources on the life of Hemacandra:—Introductions to (1) Kumārapālapratibodha, GOS, (2) Moharājaparājaya, GOS. (3) Pramāṇamimāṃsā, AMP. (4) Syādvāda-

mañjrī, B. S. S. (5) Forbe's Rāsamālā, (6) Prabandhacintāmaṇi of Merutuṅga, Prabandhakośa of Candraśekhara, Prabhāvakacarita of Candraprabha, and Kumārapālapratibodha of Somaprabha. (7) Dr. Bühler's Ueber das Leben des Jaina Monches Hemacandra.]

ABBREVIATIONS USED

I. Out of the three figures following हे० (which is an abbreviation of the word हेमव्याकरण) at the top of the right hand page, the first figure shows the number of the chapter (अध्याय) of grammar, the second figure shows the quarter (पाद) of the chapter and the last figure shows the number of the last Sūtra quoted or illustrated on the page. For example : [हे० ८. १. ११.] on page 7 means that the last Sūtra quoted at the end of the page is the eleventh in the first quarter of the eighth chapter.

II. In the commentary the number of the Sūtra quoted for illustration is shown by the single figure in brackets following that Sūtra; other Sūtras are shown by two figures in brackets: the first showing the quarter, and the second, the number of that Sūtra. For example: in " अथ प्राकृतम् " [१] on page 4., in line 23, the figure [१] shows the number of the Sūtra " अथ प्राकृतम् ; " and on page 5 in line 20, the quarter and number of the Sūtra referred to in the word वकादित्वात् are shown respectively by the figures १ and २६ in brackets, thus:—[१. २६].

III. The examples regularly intended for the illustration of Sūtras, occurring in the verses and the grammatical portion of the commentary given in smaller type, are underlined; e. g., वेईसमाइ on page 5., in lines 1, and 20.

IV. Where a prosodially long vowel is intended to be read as short, it is shown by the mark ˘ on the top of the letter; e. g., हिँ in line 2, page 3; and ओँ in line 4, page 11.

V. In all cases of two or more words joined in a compound, the combination of the words is shown by a hyphen as in सिरि-वद्धमाण-सामि in line 3. on page 3, provided the last vowel of the preceding word is not modified by the Sandhi.

VI. The letters or words which the editor thought were omitted in the MSS. by inattention of the scribes are supplied as suggestions in brackets.

VII. Where in brackets following a Sūtra the letter हे० or है० is followed by two figures the first figure shows the number of the Chapter or Adhyāya and the second figure shows the number of the quarter or Pāda of Haima Vyākaraṇa,

VIII. In the foot notes to Kumārapāla, A means the Deccan College MS. of Haima Vyākaraṇa consisting of chapter VIII, and printed as the Appendix to the present work.

विषयानुक्रमः



प्रथमः सर्गः

१	मङ्गलाचरणम् ।
२–२७	अणहिलनगरवर्णनम् ।
२८	तत्र कुमारपालनृपस्थितिः ।
२९–४७	नृपस्य वर्णनम् ।
४८	महाराष्ट्रादिदेशागतसूतवचनप्रस्तावः ।
४९–७०	सूतोक्तिप्रकारः ।
७१	राज्ञः शयनोत्थानम् ।
७२,७३	राज्ञः प्रातस्त्यं कृत्यम् ।
७४	राज्ञोग्रे अन्यनृपस्थितिः ।
७५–७८	राज्ञः पार्श्वे चामरधारिवारयुवतिस्थितिः ।
७९,८०	राजानं प्रति द्विजाशीर्वादः ।
८१	राज्ञस्तिलकधारणम् ।
८२	धृष्टाधृष्टलोकविज्ञप्तिनिशमनम् ।
८३	तिथिश्रवणम् ।
८४	राज्ञो मातृगृहगमनम् ।
८५	मातृणां रत्नादिसमर्पणम् ।
८६	देवानां देवीनां चाग्रे गीतम् ।
८७	कुलजरत्यादीनां वसुसमर्पणम् ।
८८	लक्ष्मीपूजनम् ।
८९,९०	ततो गुणनिकां कर्तुं श्रमगृहगमनम् ।

द्वितीयः सर्गः

१–२०	राज्ञो मल्लश्रमादि ।
२१	बहिर्गमनार्थं कुञ्जरानयनम् ।
२२–३१	कुञ्जरवर्णनम् ।
३२	राज्ञः कुञ्जरारोहणम् ।

३३–३९ आरूढस्य राज्ञो वर्णनम् ।
४०–५१ राजनामाङ्कितस्य जिनमन्दिरस्य तत्प्रविशतो राज्ञश्च वर्णनम् ।
५२ तन्मन्दिरं शत्रूणामपि धर्मोन्मुखत्वकारकम् ।
५३ जिनस्तवनप्रस्तावः ।
५४–६१ स्तुतिप्रकारः ।
६२–६५ राज्ञो जिनस्नपनम् ।
६६ जिनाग्रे स्त्रीसंगीतप्रस्तावः ।
६७–७७ संगीतम् ।
७८ राज्ञो मरुवकपूजाविषयमनुशोचनम् ।
७९ अनुशोचनप्रकारः ।
८० शासनदेवीवचनम् ।
८१ उद्यानस्य सर्वर्तुकुसुमसमृद्धावाशीर्वादः ।
८२ राज्ञो गुरुप्रणामः ।
८३ जिनमन्दिराद्राजनिर्गमनम् ।
८४–९० राजाश्वस्य वर्णनम् ।
९१ राज्ञो धवलगेहं प्रति गमनम् ।

तृतीयः सर्गः

१ राज्ञ उद्यानं प्रति गमनम् ।
वसन्तर्तुवर्णनम् २–८९.
२ वसन्तर्तुप्रवृत्तिः ।
३ मदनाधिक्यम् ।
४ मदनप्रतापः ।
५ चूतः ।
६–१५ मलयानिलः
१६ सिन्दुवाररागः ।
१७ अशोककुसुमम् ।
१८ अन्दोला ।
१९–२६ दोलाविलासः ।
२७ तिलकपुष्पविकासः ।
२८ मधूकतरुः ।
२९ अशोकतरुः ।

३० पलाशतरुः ।
३१ पाटलिपुष्पम् ।
३२ कुरबकपुष्पम् ।
३३ शिरीषपुष्पलग्ना भ्रमरावलिः ।
३४,३५ पिकीगानम् ।
३६ लवली ।
३७ पिकी ।
३८ मध्याह्नतरुः ।
३९ किंशुकाः ।
४०,४१ अलयः ।
४२ शिरीषः ।
४३,४४ कर्णिकारः ।
४५ विचकिलः ।
४६ पुष्पितलवली ।
४७ पलाशकुसुमम् ।
४८ प्लक्षपल्लवाः ।
४९ कुसुमावचयकलाः ।
५० नवचूतः ।
५१ बकुलदाम ।
५२ मल्लिकामाला ।
५३ जपादाम ।
५४ माधवीस्रक् ।
५५ लवली ।
५६ अमनोज्ञमाला ।
५७ बकुलपुष्पाणि ।
५८ लवलीकलिकाः ।
५९,६० कुरबकाः ।
केषांचित्प्रेयसीभिः सह सस्नेह आलापः ६१–७२.
६१ वर्णकुसुमत्रोटने प्रार्थनम् ।
६२ तिलककुसुमम् ।
६३ लवलीकुसुमानि ।
६४ बकुलाशोकपुष्पाणि ।
६५ हिन्तालमञ्जरी ।

६६ पलाशकुसुमम् ।
६७ रम्भावतंसः ।
६८ पुन्नागः ।
६९ पूगफलीबालपुष्पम् ।
७० जपाकुसुमम् ।
७१ फुल्लविचकिलम् ।
७३ क्रीडनप्रस्तावः
७४–८९ क्रीडा ।
९० राज्ञो ग्रीष्मदर्शनम् ।

चतुर्थः सर्गः

ग्रीष्मर्तुवर्णनम् १–७७

१ राजानं प्रति दौवारिकस्य ग्रीष्मश्रीविषयकं वचनम् ।
२ पथिकस्य लपनम् ।
३ काञ्चनारवृक्षः ।
४ नवकाञ्चनकेतकी ।
५ ग्रीष्मश्रीस्पष्टत्वम् ।
६ नवमालिकामल्लीजपाः ।
७ चीरीशब्दे ग्रीष्मश्रीर्गायतीत्युत्प्रेक्षा ।
८ चीरीणां पथिकान्प्रत्युल्लपनम् ।
९ मल्लिकावचयकर्त्र्या भणनम् ।
१०–२१ वारवनितानां संबद्धासंबद्धलपनकर्त्रीणां द्राक्षारसपानम् ।
२२ आम्रमधूकौ ।
२३ खर्जूरप्रियालपनसानामुद्यानम् ।
२४ शिरीषकिंशुकबकुलगन्धः ।
२५ राज्ञो धारागृहगमनम् ।
२६ जलयन्त्रस्य पूर्वदक्षिणपश्चिमोत्तरभागेभ्यो जलौघप्रवर्तनम् ।
२७ वेदिकामकरमुखादिभ्यो ,,
२८ पञ्चालिकाकर्णादिभ्यो ,,
२९ यन्त्रनिःसृतजलबिन्दुव्याप्तत्वाद्वृक्षेषु रोमाञ्चोत्प्रेक्षा ।
३० जलक्षणदर्शने तत्र सर्वत्र जनप्रवर्तनम् ।
३१ सालभञ्जिकाकरगतघटेभ्यः सर्वत्र समं जलनिर्गमनम् ।

३२ जलपूरेण क्रीडागिरितरुसेचनम् ।
३३ विटलोककल्पितं जले दधिमधुसादृश्यम् ।
३४ जलप्रवाहाणां मलयवायुतोपि मदनाग्निप्रदीपकत्वम् ।
३५ जलवायूनामपि विशेषतो मदनाग्निप्रदीपकत्वम्।
३६ तत्रत्यक्रीडागिरितरूणां जलेन लावण्योपेतत्वम् ।
३७ क्रीडागिरितरुतले कुसुमाभरणराशीकरणम् ।
३८ चन्दनप्रसूनयुक्तक्रीडागिरिजलानां दधिमधुशोभाहारकत्वम् ।
३९ लीलागिरिनिर्झरजलानां कामजयवैजयन्तीसादृश्यम् ।
४० तदा तरुणमिथुनमनसां परस्परं मेलनम् ।
४१ स्त्रीणां जलकेल्युत्सवे प्रवृत्तिः ।
जलकेलिः ४२–७७
४२ मृगाक्षीणां जलगाहनम् ।
४३–४५ रूपाधिकस्त्रीरुद्दिश्य तटस्थयुवजनवचनम् ।
४६ कस्यचित्प्रियागण्डूषप्राप्तया प्रमोदः ।
४७ कस्यचित्प्रियाकर्तृकं जलताडनम् ।
४८ अबलानां प्रियैः सह जलकेलौ प्रवृत्तिः ।
४९ तासां जलेनाश्रिकजलक्षालनेपि शोभातिशयः ।
५० हरिद्रागौरीणां स्वसमानवर्णाभिः सह जलकेलिः ।
५१ जले भर्तुरग्रे कस्याश्चिदुक्तिः ।
५२ जले वस्त्राकर्षणपरं प्रियं प्रत्यबलाकृतनिर्भर्त्सनम् ।
५३ अन्यासक्तं प्रियं दृष्ट्वा कस्याश्चिद्रोदनम् ।
५४ अकृत्यकारिणा सह रिरंसन्तीं प्रति सख्या निषेधः ।
५५ जामातॄनुद्दिश्य संभलीजल्पनम् ।
५६–५८ जलक्षणे प्रसादयितुमागते प्रिये मानिन्या रोदनम् ।
५९–७७ कुमारपालं प्रति दौवारिकस्य जलक्रीडाप्रवृत्तरजसमूहविज्ञापनम् ।
७८ प्रावृट्कालप्रवृत्तिः ।

पञ्चमः सर्गः

प्रावृग्वर्णनम् १–४५.

१ नीपगन्धस्य सर्वत्र प्रसरणम् ।
२ मयूरपिकीगायनश्रवणे प्रोषितविलापः ।
३ सर्वत्र मालतीगन्धप्रसरणम् ।

* * *

४ सुगन्धिवायुपरिभ्रमणेन प्रोषितानां निःश्वासपरिमोचनम्।
५ मालतीलतया पूर्वानिलेन च पथिकचित्तस्य विक्लवत्वम्।
६ कुमारपालं प्रति आरामिककर्तृकं वनोद्देशमनोहरत्वस्य विज्ञापनम्।
७ श्रीफलवृक्षः।
८ अम्बुदाडिमीफलानि।
९ नीपकुटजार्जुनतापिच्छाः।
१० लाङ्गलीयूथिकाकूष्माण्डीबिम्बीनां पुष्पितानि वनानि।
११ केतकीवनम्।
१२ कुटजार्जुनसर्जपरिमलः।
१३ मालतीगन्धः।
१४ उद्यानजनस्य अम्लिकाकुसुमदर्शनेन हर्षः।
१५ लाङ्गलीकुसुमस्य सकलजनमनोहरत्वम्।
१६ सालयूथीसिलिन्ध्राणामुल्लसनम्।
१७ कुटजविकसनं यूथिकागन्धप्रसरणं वेणुकुडङ्गकन्दलनं च।
१८ लीलापुष्करिणी मेघमुक्तजलं कलमाङ्कूराश्च।
१९ तापिच्छः कमलिनी भेककुलं च।
२० निचुलादीनां वने वायोः सौरभ्यम्।

प्रावृषिकं पद्मावतीदेवीपूजानिमित्तं मालिनीनामन्योन्यं जल्पनम् २१–४५.

२१ नीपकुसुमानयने आसनदाने चाज्ञा।
२२ स्नाने कहारपत्रिकानयने च निदेशः।
२३ दर्दुरभयेन स्नाता किमिति प्रश्नः।
२४ दूर्वाः किं नानीयन्त इति प्रश्नः।
२५ तुलसीग्रहणे निदेशः।
२६ केतक्या आनयने निदेशः।
२७ दाडिमीफलत्रोटनम्।
२८ मुक्ताधूपकरणम्।
२९ पल्वलजलस्नानं कुतो विस्मृतमिति प्रश्नः।
३० नीपावचये कुत आलस्यमिति ,,
३१ जलानयनविस्मरणे ,,
३२ जलकलुषणं कुतः कृतमिति ,,
३३ पूजाप्रस्तावे बलाकाभिः सह क्रीडने ,,

३४ यूथिकापुष्पानयने निदेशः ।
३५ पद्मिनीपत्रानयने ,,
३६ जम्बुफलसमर्पणे ,,
३७ बिल्वकिसलयलोध्रकुसुमानां ग्रहणम् ।
३८ आमलकफलानयने प्रार्थना ।
३९ यवग्रहणे अभिवचनम् ।
४० कुटजकुसुमग्रहणे ,,
४१ चम्पककलिकाग्रहणे ,,
४२ धवप्रसूनस्रजः ।
४३ स्थलनलिनीकुसुमाहरणे प्रार्थना ।
४४ सल्लकीकुसुमाहरणे प्रार्थना ।

शरद्वर्णनम् ४६–६५

४६ सारसशुकहंसाः ।
४७ कुररखञ्जनपलाशपत्राणि ।
४८ सारसदर्शनम् ।
४९ पङ्कजमालाहंसवधूभ्रमर्यः ।
५० सप्तपर्णद्विदर्शनेन पथिकानां मोहनिद्रा ।
५१ शालिगोपिकागायनेन सुरवधूगतिस्खलनम् ।
५२ बाणकुसुमदर्शनेन पथिकवधूनां मूर्छनम् ।
५३ सारसादिभ्यः शालिवनगोपनम् ।
५४ केसरसुगन्धिवायोः सर्वत्र प्रसरणम् ।
५५ अगस्तिपुष्पसुगन्धिवायोर्वहनम् ।
५६ अगस्तिपङ्कजरजसां स्फुरणम् ।
५७ पद्ममालावीक्षणे तृप्त्यभावः ।
५८ असनवृक्षपुष्पं कामदेवस्य बाणः ।
५९ पुष्पितनिर्गुण्डीदर्शनेनापि विरहिणीनां वधः ।
६० फुल्लभण्डीरभ्रमरावलेर्वनश्रीवेणिसादृश्यम् ।
६१ फुल्लासनवृक्षात्पथिकस्य दूरे गमनम् ।
६२ कनकपङ्कजैर्जिनार्चनम् ।
६३ बिम्बकर्कटीफले ।
६४ कुमुदकासपुष्पाणां चलनविकसने ।
६५ सहस्रलिङ्गाख्यं सरः ।
६६ अर्केन शरदुपसंहारः ।

हेमन्तशिशिरवर्णनम् ६६–८६
६६,६७ कलकण्ठानां विक्षोभादि कुन्दलतादर्शनं भ्रमरविस्फुरणं च ।
६८ फुल्लवल्लीफलिनीलताः ।
६९ कृष्णेक्षुरक्षककन्नीणां गीतम् ।
७० चणकादिरक्षककन्नीणामुद्यमः ।
७१ वनितानामन्योन्यं लपनम् ।
७२ नवकेशररक्षककन्नीणां परस्परं वार्ता ।
७३ मुचुकुन्दकुसुमाहरणम् ।
७४ पारत्तीमूलकालिगुञ्जितादि ।
७५ यवरक्षकगोपीगीतम् ।
७६ मरुवकमाला ।
७७ कुन्दलवलीपुष्पाणि ।
७८ युवगोपीमूलको युवगोपानां हर्षः ।
७९ नारङ्गफलानि ।
८०,८१ स्त्रीणां नामग्रहणपूर्वकं कुन्दपुष्पावचयविषयकं लपनम् ।
८२ फलिनीलोध्रकुसुमानां विकसनम् ।
८३ वार्त्तणीपुष्पविकसनम् ।
८४ फलितबदर्यः ।
८५ पुंनागलवलीकुन्दपुष्पाण्यनङ्गस्य जयसाधनानि ।
८६ फलिनीकुसुमैः सर्वेषामक्षिसुखहर्षो ।
८७ उद्यानवर्णनोपसंहारो राज्ञः सौधगमनं संध्याकर्म च ।
८८ राजानं प्रति सूतानां संध्याकालादिबोधकं पठनम् ।
८९ चक्रवाकविरहः ।
९०–९२ मुनिवटुकजल्पनम् ।
९३–९७ वासकसज्जाया भोगादिचिन्तनपूर्वकं प्रियशय्याकरणम् ।
९८–१०५ पांसुलानां मिथो भाषणम् ।
१०६ चन्द्रोदयः ।

षष्ठः सर्गः

चन्द्रोदयवर्णनम् १–२१
१–३ कैरविण्याः शशिनं प्रति प्रश्नः ।
४ रथाङ्गया दूरस्थरथाङ्गं प्रति दुःखकथनम् ।

५	प्रियाविरहेण रथाङ्गस्य क्षुधितस्याप्यनुमुक्षा ।
६	मुनीनामवश्यकृत्ये प्रवृत्तिः ।
७	सर्वेषां चन्द्रिकेक्षणे प्रवृत्तिः ।
८	चकोराणां चन्द्रिकापानमलीनां निर्गुण्डीपुष्परजःपानम् ।
९	कुलटानां विटपार्श्वगमनम् ।
१०	भ्रमरस्य कुमुदरसज्ञानव्यापृतत्वादिव कमलमुकुलत्यागः ।
११	चन्द्रिकया सर्वस्य सुखितत्वम् ।
१२	चन्द्राय किंनरीणामर्घ्यदानम् ।
१३–२१	आकाशारूढशशिवर्णनम् ।
२२–२६	मण्डपिकामध्यारूढस्य नृपतेर्वर्णनम् ।
२७	कुमारपालस्य मण्डपिकायामुपवेशनम् ।
२८	पृथ्वीशत्रेयोर्थं पुरोहितस्य मन्त्रपठनम् ।
२९	राजसमीपे चामरग्राहिणीनामुपसरणम् ।
३०	अनन्तरं तूर्यरवः ।
३१	स्वस्वकर्मकरणाय स्त्रीणामुपसरणम् ।
३२	वारविलासिनीकृतो नीराजनाविधिः ।
३३	इतरनृपाणामञ्जलिबन्धः ।
३४	राज्ञः पुरो महाजनिकानामुपवेशनम् ।
३५	इतरराजदूतानां सभायां दूरत उपवेशनम् ।
३६	सभाया राजैकाग्रचित्तत्वम् ।
३७	मणिवेदिकादिषु प्रतिबिम्बितत्वाज्जनस्य शतगुणत्वम् ।
३८	नीराजनविध्यनन्तरं वारवनितानामुपवेशनम् ।
३९	स्वर्गश्रुतविभवादित्वात्सभाया उत्कृष्टत्वम् ।
४०	सांधिविग्राहिकस्य राजविज्ञपनप्रस्तावः ।
	विज्ञप्तिका ४१–१०६
४१	कुङ्कुणाधीशवृत्तान्तनिशमने प्रार्थनम् ।
४२–४७	राज्ञो योधानां कुङ्कुणगमनम् ।
४८	तेषां परबलमनु प्रसरणम् ।
४९	कुङ्कुणाधिपस्य स्वपुराद्बहिर्निःसरणम् ।
५०	दुर्गान्निःसृतानां तद्योधानां कुमारपालयोधैः सह युद्धम् ।
५१	अमरीभिः कृतं योधानां वरीतुमादरणम् ।
५२	असंभाव्ययुद्धविधानाद्योधाः शिवस्य गणा इवेत्युत्प्रेक्षा ।
५३	केषांचिन्मल्लिकार्जुनयोधानां स्वानाद्यपहाय युद्धप्रवृत्तत्वम् ।

५४	मल्लिकार्जुननृपस्य गूर्जरसुभटान् प्रहर्तुं प्रवृत्तिः ।
५५	अपक्वमांसाशनेभ्यो मांसदानम् ।
५६	राज्ञः सिंहध्वनिः ।
५७	राज्ञ इभमारुह्य युद्धप्रवृत्तत्वम् ।
५८–६०	कुमारपालसैन्ये मल्लिकार्जुनकृतः स्वसेनाया अवकाशः ।
६१	कुमारपालसैन्यस्य मल्लिकार्जुनस्योपरि बाणवृष्टिः ।
६२	तथावृष्टं दृष्ट्वा हतोयमिति कुमारपालसैन्यस्य गर्जनम् ।
६३	कुमारपालभटानां राजितवर्मादित्वम् ।
६४	युद्धे रुधिरप्रवाहः ।
६५	कुमारपालभृत्यैर्मल्लिकार्जुनस्य लज्जां प्रापितत्वम् ।
६६	मल्लिकार्जुनकृतं केषांचिद्योधानां शरताडनम् ।
६७	सिंहनादेन केषांचिद्भटानां निरसनम् ।
६८	कुमारपालसैन्यकृतं मल्लिकार्जुनहस्तिभेदनम् ।
६९	तत्सुभटादीनां नाशः ।
७०	राज्ञो शिरसश्छेदनम् ।
७१,७२	ततः कुमारपालस्य दक्षिणदिक्स्वामित्वम् ।
७३	पश्चिमदिक्स्वामिसिन्धुपतेः कुमारपालाज्ञावर्तित्वम् ।
७४	जवनदेशाधीशस्य कुमारपालाराधनोपायाध्यायकत्वम् ।
७५	उब्वेश्वरस्य तन्मित्रभूतत्वम् ।
७६	वाराणसीस्वामिनस्तद्द्वारमण्डकत्वम् ।
७७	मगधदेशाधिपस्य प्राभृतदातृत्वम् ।
७८	गौडदेशाधिपतेर्महेभकुलदातृत्वम् ।
७९	तत्सेनायाः कन्यकुब्जेशभयकर्तृत्वम् ।
८०	तच्छिबिरस्य दर्शनाद्दशार्णनृपतेर्भयेन मरणम् ।
८१	तत्सैन्यकृतं दशार्णपतिनगरविलुण्टनम् ।
८२	तत्कनकहरणम् ।
८३	तच्चमूपच्छेदनम् ।
८४	तत्सप्ताङ्गसंपद्धरणम् ।
८५	कुमारपालसेनाकृतं चेदीनगरीशमानखण्डनम् ।
८६	तत्कृतं रेवागतनक्रादीनां मर्दनम् ।
८७	रेवातटे कुमारपालबलस्य निवेशः ।
८८–९३	मथुराधीशेन कनकादिसमर्पणेन कुमारपालसैन्यात्स्वपुरस्य रक्षणम् ।
९४	कुमारपालाश्रयहेतोर्जङ्गलपतिकृतं गजसमर्पणम् ।

९५–१०६ जङ्गलपते राजानं प्रति विज्ञप्तिः ।
१०७ कुमारपालस्य स्वपनम् ।

सप्तमः सर्गः

स्वापान्ते राज्ञः परमार्थचिन्ता १–८४

१ चिन्ताप्रस्तावः ।
२ जीवस्य कुकर्मभिः संसारे भ्रमणम् ।
३ मन्मथमोहाभावे सिद्धक्षेत्रेषु संचरणम् ।
४ मदनेनाभ्रमितस्य धन्यत्वम् ।
५ स्त्रीभिरभ्रान्तचित्तस्य प्रशमराज्यम् ।
६ त्यक्तयुवतिसङ्गस्य सौख्यादिप्राप्तिः ।
७ विषयाभिलाषिणः प्रशमाभावः ।
८ कामवशगतस्य मित्रादिभार्यागमनम् ।
९ महिलावशगतस्य गम्यागम्येति विवेकाभावः ।
१० स्त्रीरक्तस्यार्यक्षेत्रे व्यर्थमागमनम् ।
११ स्त्रीविरक्तस्य ज्ञानादिप्राप्तिः ।
१२ शान्तचित्तस्य संसारे पुनरागमनाभावः ।
१३ महात्मनां स्त्रीभिः सह रमणाभावः ।
१४ विचक्षणस्य स्त्रीष्वनुरागाभावः ।
१५ स्त्रीणां मायादिपूर्णत्वम् ।
१६ स्त्रीणामस्थिरप्रेमानुबन्धत्वम् ।
१७ स्त्रीणां धीरधैर्यहन्तृत्वम् ।
१८ स्त्रीसङ्गेन पुरुषस्य शक्त्यादेर्नाशः ।
१९ रमण्यधरपानकर्तुः पाण्डित्यादेर्विफलत्वम् ।
२० स्त्रीणां बहीरम्यत्वादिन्द्रवारणफलसमत्वेनानुरागाविषयत्वम् ।
२१ तासां कफपूर्णेष्यानने मूढस्यानुरक्तत्वम् ।
२२ युवतिसक्तानां शीलादिनाशः ।
२३ स्त्रीसङ्गे युक्तायुक्तविचाराभावात्तासां दर्शनानर्हत्वम् ।
२४ स्त्रीविलोकनं त्रिकालज्ञैर्निषिद्धम् ।
२५ स्त्रीपार्श्वस्थस्य गुर्वाद्यनादरकरत्वम् ।
२६ स्त्रिया असच्चेष्टितं ज्ञात्वापि तत्स्पर्शकर्तुः सोपहासो नमस्कारः ।
२७ स्त्रीस्पर्शस्य पुण्यहानिकरत्वम् ।

२८	स्त्रीणां न्यग्जातीयेष्वपि प्रेमानुबन्धित्वम् ।
२९	तासां परलोकादिनाशकत्वम् ।
३०	तासां शुनीनामिव अकाङ्क्षणीयत्वम् ।
३१,३२	स्थूलभद्रमुनेः प्रशंसा ।
३३–३५	वज्रर्षेः ,,
३६	गजसुकुमारस्य ,,
३७	गौतमस्वामिनः ,,
३८	अभयकुमारमुनेः ,,
३९	सुधर्मस्वामिनः ,,
४०	जम्बूमुनेः ,,
४१	प्रभवप्रभोः ,,
४२	जिनवचनस्य ,,
४३	गुरुभ्यो लब्धसम्यक्त्वस्य संसारभयाभावः ।
४४	हृदयोल्लसितजिनागमानां प्रशंसा ।
४५	उल्लसितजिनसमयस्य ज्ञानोल्लासः ।
४६	विवेकिनो जिनमतावगाहनम् ।
४७	अवगाहितजिनवचनस्य मोक्षप्राप्तिः ।
४८	भगवद्वचनं गृह्णतः कर्मगणस्य नाशः ।
४९	गृहीतप्रवचनानां मुक्तिः ।
५०	गृहीतव्रतानां गुणप्रशंसा ।
५१	महामुनीनां तपस्याचरणम् ।
५२–५९	अर्हतां वर्णनं नमस्कारश्च ।
६०	सिद्धान्प्रति शरणार्थं गमनम् ।
६१	सर्वसिद्धानां नमस्कारः ।
६२	सन्मार्गस्य बोधकानामाचार्याणां ध्यानम् ।
६३	आचार्यान्प्रति ज्ञानप्राप्तये प्रार्थना ।
६४,६५	उपाध्यायप्रशंसा ।
६६,७७	साधुप्रसंशा ।
६८	पञ्चपरमेष्ठिध्याने निदेशः ।
६९–८३	श्रुतदेवीप्रशंसा ।
८४	श्रुतदेवीमुद्दिश्य राज्ञो बोधार्पणविषये प्रार्थना ।
८५	श्रुतदेवी विधेयमुपदिशत्विति प्रार्थना ।
८६–९१	कुमारपालं प्रति श्रुतदेव्याः प्रत्यक्षदर्शनम् ।

९२ श्रुतदेवीवाक्यप्रस्तावः ।
श्रुतदेवीवाक्यम् ९३–१००
९३ राज्ञ इन्द्रमित्रत्वप्रतिपादनम् ।
९४ राजानं प्रति जिनपतिकर्तृकरक्षणाशंसा ।
९५ राजानं प्रति कृतकृत्योसीति प्रतिपादनम् ।
९६ जगदुत्तंसरूपायां कीर्तौ आशंसा ।
९७ एकछत्रराज्यकरणे ,,
९८ इन्द्रसमत्वप्राप्तौ ,,
९९ आस्वर्गरसातलं कीर्तिप्रसरणे,,
१०० वरयाचनेनुज्ञा ।
१०१ राज्ञः श्रुतदेवीं प्रति विज्ञपयितुमारम्भः ।
१०२ उपदेशकरणे प्रार्थना ।

अष्टमः सर्गः

१ सरस्वतीकृतोपदेशस्य प्रस्तावः ।
उपदेशप्रकारः २–८२
२–४ मोक्षस्य साधनानि ।
५ शत्रुमित्रयोर्विषये अहमिति बुद्धिकरणम् ।
६ मदनाद्या आन्तराः षट् शत्रवो विजेतव्या इति चिन्तनम् ।
७ मोक्षपदं गतस्य योगिनः पुनः संसारागमनाभावः ।
८ कुवासनानां सर्वकर्मणां च नाशस्य साधने द्वे ।
९ अर्हतां परममन्त्रपठने सर्वजनस्यापि निर्वृतिः ।
१० विषयपरित्यागं विना अरण्यगमनादेरपि निष्फलत्वम् ।
११ चत्वारिमङ्गलमित्यादिमन्त्रपठने मुक्तिश्रीप्राप्तिः ।
१२ सर्वज्ञराजचरणानुध्यानेन योगिनः शठाशठबन्धुत्वादिप्राप्तिः ।
१३ स्थिरसमाधेर्योगिनो धन्यत्वम् ।
१४ सर्वविषयपरित्यागे निदेशः ।
१५ आत्मनः सुषुम्णायां स्थितौ मुक्तिप्राप्तिः ।
१६ ज्ञानादिरक्षणार्थं रागद्वेषादीनां नाशः ।
१७ पद्मासनादिभिरेव मोक्षः ।
१८ इडापिङ्गलयोर्मध्ये मनसः संचारणम् ।
१९ विरागवासनाया दुष्करत्वम् ।
२० समयाचारमनःशुद्धयोर्मुक्तिसाधनत्वम् ।

२१	विषयत्यागपूर्वकं समाधिलीनचित्तत्वेनावस्थानम् ।
२२	मनःपवनयोर्मिथोवष्टम्भनेन मुक्तिः ।
२३	नाडीपवनसंयोगज्ञानं योगसाधनम् ।
२४	समाधिनिष्ठानां जरामरणार्तिभयाभावः ।
२५	ब्रह्मरन्ध्रे मनोनियोजनं मुक्तेः साधनम् ।
२६	शत्रुमित्रयोः समभावेन दर्शनम् ।
२७	अहिंसाप्रधानो धर्मः क्रियतामित्युपदेशः ।
२८	अहिंसावचनस्य प्रशंसा ।
२९	तपसा जन्मनः साफल्यम् ।
३०	सामान्यजनस्य निर्वाणस्वरूपविचाराभावः ।
	राजानं प्रति श्रुतदेवीवाक्यम् ३१–३६
३१	संसारकान्तारे मा निपततेति उपदेशस्त्वया सर्वेषां कार्यः ।
३२	सर्वत्र समभावं कुर्वित्यादिः ,,
३३	जीवदया कर्तव्येत्यादिः ,,
३४	महर्षिसेवनं कर्तव्यमित्यादिः ,,
३५	धर्मप्रतिपादकसिद्धान्ते ग्रहं कुर्वित्यादिः ,,
३६	युष्माकं संयमश्रेन्मोक्षो न दूरे इत्यादिः ,,
३७–४२	देव्याः कुमारपालं प्रति परकृतनिन्दासहनाद्युपदेशः ।
४३	स्त्रीवचनेऽनासक्तस्य मोक्षसुखम् ।
४४	सत्यवचनादि निर्वाणस्य कारणम् ।
४५	साधूनां वचनानि गृहीत्वा तपसा कर्मनाशः कर्तव्यः ।
४६	गुरुजनकथितश्रुतार्थधारणेन जीवितसाफल्यम् ।
४७	शिरसा गुरुपादस्पर्शस्तदुपदेशेन प्रियवचनादि ।
४८	धनलिप्सया विपत्तिकरस्य गुरोस्त्यागः ।
४९	दयाधर्मप्रशमाचरणं कर्मच्छेदनं च ।
५०	जिनवचनप्रमाणस्य पुरुषस्य जगज्जन्मकारणादिज्ञानम् ।
५१	मिथ्याधर्माचरणनिषेधः ।
५२	यत्रतत्रापि स्थितेन सम्यक्त्वमनुरागश्च कार्यः ।
५३	इन्द्रियजये क्रोधादिरूपकषायजयः कषायक्षये कर्मनाशश्च ।
५४	कर्माणि तपसा विना दुर्जयानि । तपसः फलं त्वपरिज्ञेयम् ।
५५	मोक्षसुखं शाश्वतं देवादीनां सुखं त्वल्पकालम् ।
५६	कर्तृत्वप्रयोजकत्वबुद्धिरहितस्य विवेकोपरिमितः ।
५७	मिथ्यादर्शनखण्डकस्य गुरुजनस्य प्रणिपातः कार्यः ।

५८ रागाद्यकलुषितचित्तस्य ब्रह्मपरस्य तस्मिन्नेव भवे निर्वाणप्राप्तिः ।
५९ संतोषामृतेन विना सुखप्राप्तेरभावः ।
६० ज्ञानदर्शनचारित्ररूपरत्नत्रयं विना मुक्तेरभावो भाण्डेन विना क्रेतव्यवस्तुन इव ।
६१ जिनागमालोकनं विना भवहानोपायमोक्षसंप्राप्त्युपाययोरभावः ।
६२ चञ्चला संपत् ध्रुवं मरणमिति सर्वस्मिन् वदत्यपि न कस्यापि महामुनिसमागमसाध्यसंयमाभावः ।
६३ मुक्तिमुखस्य साधनानि ।
६४ यत्र कुत्रापि स्थितौ जीवदयाया मुक्तिं प्रति कारणत्वम् ।
६५ तपसा सह संयमाद्यभावे साधुमध्ये गणनाया अभावः ।
६६ धर्महीनादावपि दयां कृतवतोत्रैव सिद्धिः ।
६७ मनसः सुस्थिरत्वकरणे संसारस्थितं विषण्णं प्रत्युपदेशः ।
६८ रात्रिभोजनात्पापे पतनं ततः संसारे परिभ्रमणम् ।
६९ तपःपरिपालनौत्सुक्यात्संसारे गमनागमनक्रियाया अभावः ।
७० जीवदयोपशमयोरेव कर्तव्यत्वं नान्यस्य कर्मणः ।
७१ परिग्रहालीकभाषणे परित्यज्य उपशमस्य स्वीकर्तव्यत्वम् ।
७१ शरीरजीवितयोरस्थिरत्वं ज्ञात्वाऽशुभभावस्त्याज्यः ।
७४ श्रुतार्थस्य श्रवणे कर्णयोः श्रुतार्थस्य स्थिरीकरणे हृदयस्य च कृतार्थत्वम् ।
७४ यस्य कर्णे जिनागमवचनमात्रमपि प्रविष्टं तस्य त्वदीयं मदीयमिति ममत्वाभावः ।
७५ यावज्जीवं दमकरणे सिद्धलोकगमनम् ।
७६ भद्रत्वादीनां सिद्धिं प्रति प्रशमादीनामुत्तरोत्तरमुच्यमानानां कारणत्वम् ।
७७ क्रोधमानमायाजाललोभानामन्तं कृत्वा निवर्तने निदेशः ।
७८ संसारत्यागशिवसौख्यसंवेदनयोरतिनिश्चलं मनः कारणम् ।
७९ चित्तादीनामनाकुलत्वादिकरणे निश्चलं ध्यानं कारणम् ।
८० यमुनादिनदीजले स्नानेपि शिवशर्मप्राप्त्यभावः ।
८१ मनसि जिनमवतीर्णं कुर्वित्यादेशः ।
८२ दयावतामेव निर्वृतिर्न वेषधारिणाम् ।
८३ इति भाषाविनिमयेन परमतत्त्वं कथयित्वा नृपोरसि निजकण्ठमालां स्थापयित्वा मङ्गलं चोक्त्वा देवीगमनम् ।

TABLE OF CONTENTS

INTRODUCTION	v
विषयानुक्रमः	xxix
कुमारपालचरितम्	१–२९९
प्रथमः सर्गः	१
द्वितीयः सर्गः	४०
तृतीयः सर्गः	७७
चतुर्थः सर्गः	११३
पञ्चमः सर्गः	१४२
षष्ठः सर्गः	१८०
सप्तमः सर्गः	२२१
अष्टमः सर्गः	२६१
अक्षरानुक्रमविशिष्टा शब्दसूची...	३०१
परिशिष्टम्	
सिद्धहेमशब्दानुशासनस्याष्टमोध्यायः	४२५
NOTES ON THE APPENDIX	685

श्रीः ॥

ओं नमः श्रीजिनेश्वरपादपद्मेभ्यः ॥

पुण्याङ्कूराः शिवसुखफलं श्रोतृजन्तून् नु नेतुं
तैरग्रेऽस्ताः किमुत लिखितुं मङ्गलान्यष्ट लाजाः ।
यस्योद्यन्ते सदसि दशनाभीशवो देशनायां
स श्रीचन्द्रप्रभजिनपतिः प्रातिभं नस्तनोतु ॥ १ ॥

अधोविहितदुर्गतिं प्रकटदिव्यगोत्रोद्गतिं
वृतं सुमनसां भरैः प्रियतरामृतोद्यत्फलम् ।
सुराजितशुभश्रियं भुवनसत्तमामोदकं
जिनेश्वरमभिष्टुवे गुरुमभीष्टकल्पद्रुमम् ॥ २ ॥

यत्पार्श्वे याचितुं किं किमपि शशिरवी कुण्डलद्वन्द्वदम्भाद्
भेत्तुं दारिद्र्यवृत्तेः स्तुतिमति युगपद् दीप्रचक्रे नु भातः ।
सद्वीणापुस्तमुक्ताक्षवलयकमलातुल्यहस्ताब्जलक्ष्मी-
र्वाग्देवी सा सुधाभा मम मनसि सदा स्तात् प्रकृत्य प्रसादम् ॥ ३ ॥

यः प्राकृतव्याकरणं नु शब्दैः साहित्यसर्वस्वमिवार्थभङ्ग्या ।
स व्याश्रयः काव्यमनल्पबुद्धिज्ञेयः कथं मादृश एव गम्यः ॥ ४ ॥

अभीष्टकल्पद्रुगुरुप्रसादप्रादुर्भवत्प्रातिभवैभवोहम् ।
स्वान्यावबोधाय तथापि किंचिद् यत्नं विधास्ये विवरीतुमेनम् ॥ ५ ॥

इह हि सदिङ्नागनागपतिकूर्मकुलाचलाचलाभाराङ्गीकारव्यावृत्त-
दोर्दण्डकलिताकर्णाकृष्टकाण्डलितप्रचण्डकोदण्डटङ्काराडम्बरत्रासितदुर्धर-

वैरिवारबलस्य अगणितगुणगणतारतारकद्युतिद्योतितदिङ्मण्डलस्य प्रसरत्कीर्तिचन्द्रिकाधवलितनभस्तलस्य दीनानाथजन्तुजातविघातरक्षणक्षमबलस्य परोपकारकरणवर्णशीलस्य (°व्रत°?) नानाप्रकारभक्तिप्राग्भारवन्दारुचतुःसमुद्रवसुंधराधिपकोटाकोटिकिरीटकोटिकान्तिपिञ्जरितचरणयुगलस्य चौलुक्यवंशमुक्ताफलस्य परमार्हतश्रीकुमारपालभूपालस्य संस्कृतव्याश्रयप्रतिपादितावशेषं प्राकृतलक्ष्यै रुचिरं चरितं वक्तुकामः साहित्यव्याकरणाद्यनेकशास्त्रनिर्माणाप्रैत्नप्रजापतिः श्रीहेमचन्द्रयतिपतिः प्राकृतव्याश्रयं महाकाव्यं चकार ॥ अथ व्याश्रय इति कः शब्दार्थः । उच्यते । द्वयोः महाकाव्यलक्षणशब्दलक्षणयोराश्रयो व्याश्रयः । एवं तर्हि सर्वमहाकाव्यानां व्याश्रयत्वप्रसङ्गः । न हि तत्र क्वापि महाकाव्यलक्षणशब्दलक्षणे न स्तः । इति चेत् न । अत्र हि " यथापद्यं प्रायः " इत्यादि महाकाव्यलक्षणमस्ति । तथा व्याकरणाष्टमाध्यायोक्त-" अथ प्राकृतम् "-इत्यादिसर्वसूत्रानुक्रमन्यस्तमूलोदाहरणव्यावृत्त्युदाहरणप्रस्तावायातमतान्तरोदाहरणप्रतिपादनेन सकलं प्राकृतलक्षणमपि । न चैवमन्यत्रेति नातिप्रसङ्गः ॥

---

१ B परोपकारणवणशीलस्य. २ C °प्रयत्न°.

प्रथमः सर्गः ।

॥ अर्हं ॥

अह पाइ[1]आहिं भासाहिं संसयं बहुलमारिसं तं तं ।
अवहरमाणं सिरि-वद्धमाण-सामिं नमंसामो ॥ १ ॥

अत्र[2] च साधुसमाचारपरिपालनार्थं निर्विघ्नेन शास्त्रपरिसमाप्त्यर्थमासन्नोपकारित्वादभिमतदैवतस्य निखिलमङ्गलालयस्य श्रीवीरस्वामिनो ग्रन्थकारः अभिधेयसंबन्धप्रयोजन[3]सूचकं नमस्कारमादौ आविश्चकार ॥

१. आदौ अथशब्दो मङ्गलार्थः अनन्तरार्थश्च । यदमरः । "मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ" इति । अथ संस्कृतव्याश्रयानन्तरं प्राकृतव्याश्रयमहाकाव्यं चिकीर्षवो वयं श्रीवर्धमानस्वामिनं नमस्यामः । भगवति गर्भस्थिते ज्ञा[4]तकुलं हास्तिकाश्वीयरथकट्यापादातधनकनकमाणिक्यादिभिर्वर्धत इति वर्धमानः । श्रिया अष्टमहा[5]प्रातिहार्यशोभया युक्तो वर्धमानः । स चासौ स्वामी च तं श्रीवर्धमानस्वामिनम् । अत्र च श्रीशब्देन पूजातिशयः प्रतिपादितः ॥ त्रिभुवनविभुं प्रति एकवचनम् आत्मानं प्रति तु बहुवचनं विरुद्धमिति न वाच्यम् । यतः अयं निरुपमत्वाद् एकः । वयं च प्राकृतप्रायाः प्रभूता इति सूचनार्थम् एकत्वबहुत्वे स्तः ॥ किंभूतम् । प्राकृतीभिर्भाषाभिः कृत्वा संशयं संदेहं आर्षं प्रचुरच्छात्रपरिवृतेन्द्रभूत्यादिऋषिसंबन्धिनं तं तं अतिशयप्रसिद्धं बहुलं जीवकर्मादिविषयत्वेन प्रभूतम् । यदुक्तम् ।

---

१ C पायआहिं. २ D अथ. ३ BC अभिधेयप्रयोजन°. ४ BC ज्ञाति°. ५ BC °महाप्राती°.

जीवे[1] कम्मे तज्जीव-भूअ-तारिसय-बन्धमोक्खे य ।
देवा नेरइया वा पुन्ने परलोय[2]-निव्वाणे ॥

अपहरमाणं विनाशयन्तम् । इत्यनेन वचनातिशय उक्तः । स च न ज्ञानातिशयं विनेति तेन ज्ञानातिशयाक्षेपः । सोपि न अपायापगमातिशयं विनेति तेनापि च अपायापगमातिशयाक्षेपः । अपायभूता रागादयः तेषामपगमः । स एव अतिशयः । अथवा । वर्ध च्छेदनपूरणयोः । चौरादिकत्वाण्णिचि[3] कृते वर्ध्यते छिद्यतेस्मेति स्वरान्तत्वात् कर्मण्यल् । ततो वर्धः छिन्नः मानः अहंकारो येनेति व्युत्पत्त्या वर्धमान इति नाम्नैव सूचितः । इत्थं चतुस्त्रिंशदतिशयज्ञापकमतिशयचतुष्कमुक्तम् । पाइआहिं भासाहिं इत्यत्र बहुवचनमशेषान्यभाषासंग्रहार्थम् । अत्र च संस्कृतव्याश्रयप्रतिपादितव्याकरणसप्ताध्यायीसकललक्ष्यतद्व्यावर्ण्यमानश्रीमूलराजनृपादि – चरितरूपाभिधेयानुक्रमायातप्राकृताष्टमाध्यायोदाहरणश्रीकुमारपालभूपालचरित्रस्वरूपमभिधेयमथशब्देन सूच्यते । अनेन च अभिधेयेन सह अस्य महाकाव्यस्य प्रतिपाद्यप्रतिपादकलक्षणः संबन्धः । प्रयोजनं च अनन्तरं सकलप्राकृतलक्षणश्रीकुमारपालचरितपरिज्ञानम् । परं परं च निःश्रेयसम् । यदुक्तम् ।

व्याकरणात् पदसिद्धिः पदसिद्धेरर्थनिर्णयो भवति ।
अर्थात् तत्त्वज्ञानं तत्त्वज्ञानात् परं श्रेयः ॥ १ ॥
सुकृतं जनयत्यादावसुरसुरस्वामितां ततः क्रमशः ।
निर्वृतिवनितावाप्तिं धार्मिकगुणकीर्तनं विदुषाम् ॥ २ ॥

"अहं पाइआहिं" "बहुलं" "आरिसं" इति पदभणितिव्याजेन साक्षात् "अथ प्राकृतम्" [१], "बहुलम्" [२], "आर्षम्" [३], इति सूत्रत्रयं प्रतिपादितम् । तच्च अग्रे यथालक्ष्यम् अत्र ग्रन्थे व्यक्तीभविष्यति ॥

---

१ BC जीवो. २ D °लोग°. ३ BC °ण्णिति. ४ C omits प्रतिपाद्य°.
५ D omits अह.....व्यक्तीभविष्यति.

अत्थि अणहिल्ल-नगरं अन्ता-वेईसमाइ-निव-निच्चिअं ।
सत्तावीसइ-मुत्तिअ-भूसिअ-जुवइ-जण-पइ-हरयं ॥ २ ॥
तिअस-वई-हर-वहु-मुह-आदरिसीहूय-फलिह-सिल-सिहरो ।
जस्सिं पुहइ-वहू-मुह-अवयंसो सहइ पायारो ॥ ३ ॥

२. अधुना श्रीकुमारपालस्य चरितं विवर्णयिषुः सकलेन्दिरामन्दिरं तद्राजधानीनगरं वर्णयति । अन्तर्वेदिः गङ्गायमुनयोर्मध्यदेशः तस्य ईशः स आदिर्येषां ते च ते नृपाश्च तैर्निचितं व्याप्तम् । प्रतापपराभूतमार्तण्डमण्डलस्य श्रीकुमारपालभूपालस्य प्रसादनाय सकलदिङ्मण्डलमिलिताखिलनरपालचक्रवालेन सर्वकालमस्य कलितत्वात् । सप्तविंशतिमौक्तिकाभिर्नक्षत्रमालानामहारविशेषैः भूषितो युवतिजनो येषु एवंभूतानि पतिगृहाणि ईश्वरसदनानि यत्र तत् अणहिलनगरम् अस्तीति संबन्धः ॥ तत् पुनः कथम् 'अणहिलनगरम्' इत्यभिधीयते । अभिधीयते । पूर्वं किल वनराजराजेन नूतननगरविधानविहितचित्तेन प्रधानभूमिखण्डगवेषणार्थं विचरता एकदा अरण्यमध्ये गवादींश्चारयन् अणहिलो नाम गोपालो दृष्टः । तदग्रे च चित्ताभिप्रायो निवेदितः । तेनापि तत्कार्यकरणार्थं शकुनगवेषणं कुर्वता एकत्र प्रदेशे शृगालो बलिष्ठकुक्कुरं निर्धाटयन्नवलोकितः । तत्रैव च अणहिलेन वनराजराजो नगरनिवेशं स्वनाम्ना कारित इति अणहिलनगरम् ॥

वेईसमाइ इत्यत्र वक्रादित्वाद् [१.२६] अनुस्वारः । बाहुलकात् [१.२४] क्वचिद् अन्यस्यापि व्यञ्जनस्य मः ॥

३. अधुना षड्विंशतिगाथामानेन आदिमहाकुलकेन एतदेव नगरं यच्छब्देन निर्दिशन् वर्णयति । तृतीया दशा येषाम् । मयूरव्यंसकादित्वान्निपातः । तेषां पतिः इन्द्रः तस्य गृहं स्वर्गः तत्र या

---

१ D अणहिल्ल°. २ BC °कुक्कुरं. ३ BC बाहुलकत्वात्. ४ D अथ.

निव-सह-मुहावयंसा बिइया गुरुणो अबीय-गुण-निवहा ।
निवसन्ति अणेग-बुहा जस्सिं पुहवीस-सलहिज्जे ॥ ४ ॥
न हु अत्थि न वि अ हूअं इह लोए अइसएण जस्स समं ।
सुउरिस-ठाणमसूरिस-रहिअं सालाहण-पुरं पि ॥ ५ ॥

वध्वस्तासां यानि मुखानि तेषाम् उन्नतत्वाद् उज्ज्वलत्वाच्च अनादर्शा आदर्शाः संपन्नानि आदर्शीभूतानि स्फटिकशिलाशिखराणि यस्य । पृथिव्येव वधूः सुखहेतुत्वात् तस्या मुखं सर्वनगरप्रधानत्वात् इदमेव नगरं वक्त्रम् तस्य अवतंसः शोभाकारित्वात् शेखरः इत्थंभूतः प्राकारः कोट्टो यत्र राजते ॥

अन्तावेईस । सत्तावीसइ-मुत्तिअ-भूसिअ । "दीर्घह्रस्वौ मिथो वृत्तौ" [४] इति स्वराणां समासे दीर्घह्रस्वौ । क्वचिन्न । जुवइ-जण । क्वचिद् वा । पइ-हरयं वई-हर । दीर्घस्य ह्रस्वः । सिल-सिहरो । क्वचिद् वा । वहु-मुह वहू-मुह ॥

४. नृपस्य सभाया रम्यत्वात् मुखस्य अन्यथानुपपत्तेश्च कान्तात्वम् । सा तस्या मुखम् तत्र अवतंसाः शोभाकृत्त्वेन आपीडा इव । किल गगनाङ्गणगत एक एव गुरुः प्रसिद्धः । परम् एते विशदप्रज्ञर्द्धितः उत्प्रेक्ष्यन्ते द्वितीया गुरवः । अविद्यमानो द्वितीयः उपमानतया यस्य सः अद्वितीयो निरुपमः । एवंभूतो गुणनिवहो येषाम् । न एकः अनेकः अनेकश्च ते बुधाश्च ते तथा । पृथिवीशैरन्यनगरापेक्षया श्लाघ्ये प्रशस्ये यस्मिन् निवसन्ति ॥

मुह-अवयंसो मुहावयंसा । "पदयोः संधिर्वा" [५] इति संस्कृतोक्तः सर्वः संधिर्वा । पदयोरिति किम् । सहइ । बहुलाधिकारात् क्वचिद् एकपदेपि । बिइया अबीय ॥

५. सकलनगरतिलककल्पं किल सातवाहनस्य राज्ञो नगरं

---

१ B सुयरिस°; C सउरिस°. २ C उज्जलत्वाच्चानादर्शा; B उज्जलत्वाद्वानादर्शा. ३ B आदर्शासं°; C आदर्शसं°. ४ C om. सर्वः.

जस्सिं नमन्त-सीसो तियसीसो वि हु तवं तवन्ताण ।
तेलुक्क-सज्जणाणं थुणइ स-भिक्खूण सद्धाए ॥ ६ ॥
जत्थोन्नय-थण-नीसह-वहु-दंसण-निस्सहं नरा जन्ति ।
दुसहाउ दुस्सहेणं मयणेण हयन्तरप्पाणो ॥ ७ ॥

प्रतिष्ठानं नाम । यतः सत्पुरुषाणां सदाचारनराणां स्थानं पदम् । असुपुरुषैः नीचैश्च रहितं विवर्जितम् । परं तदपि न खलु अस्ति नापि च आसीत् इह लोके अस्मिन् जगति अतिशयेन माहात्म्येन कृत्वा यस्य समं तुल्यम् । एतदनुमानेन अग्रेपि अनेन समं तन्न भावीति विज्ञायते ॥

निवसन्ति अणेग । हु अत्थि । " न युवर्णस्यास्वे " [६] इति न संधिः। अस्व इति किम् । पुहवीस । युवर्णस्येति किम् । गुरुणो अग्गीय ॥

लोए अइसएण । " एदोतोः स्वरे " [७] इति न संधिश्च । एदोतोरिति किम् । पुहवीस ॥

°वि अ । हूअं । लोए । अइसएण । रहिअं । "स्वरस्योद्वृत्ते" [८] इति न संधिः । बाहुलकात्[1] क्वचिद् वा । सुउरिस असूरिस । क्वचित् संधिरेव । । सालाहण ॥

निवसन्ति अणेग । " त्यादेः " [९] इति न संधिः ॥

६. यस्मिन् बाह्याभ्यन्तरभेदेन द्वादशप्रकारं तपः तप्यमानानां चरतां त्रयो लोकास्त्रैलोक्यम् । भेषजादित्वाद् यण् । ऊर्ध्वाधो-मर्त्यलोकलक्षणम् । तात्स्थ्यात् प्राणिचयोपि । तस्य परिपालनादिभिः कृत्वा सज्जना बान्धवास्तेषां सद्भिक्षूणां प्रधानमुनीनां श्रद्धया अन्तरङ्गबहुमानेन आस्तां सुरासुरखचरनरनिकरः त्रिदशेशोपि । हु इति निश्चितम् । नमच्छीर्षः स्तौति ॥

तियसीसो । " लुक् " [१०] इति लुक् ॥

तवं । " अन्त्यव्यञ्जनस्य " [११] इति लुक् । वाक्यविभक्त्यपेक्षायां हि अन्त्यत्वम् अनन्त्यत्वं च । तेन उभयम् । सज्जणाण साभक्खूण ॥

७. दुःसहात् असह्यशीतातपादेरपि दुःसहेन असह्येन मदनेन

---

१ BC बाहुलकत्वात् .

तेअ-दुरालोएहिं अन्तो-उवरिं घराण रयणेहिं ।
छूढ व्व निरवसेसा सरिआहिव-संपया जत्थ ॥ ८ ॥
विज्जु-चलं महुर-गिरो दिन्तो लच्छिं जणो छुहत्ताण ।
भिसओ खु जहा सरओ दिसाण पाउस-किलन्ताण ॥ ९ ॥

हन्तान्तरात्मानस्तिरकृतान्तःसत्त्वाः उन्नतस्तनैर्निःसहा गमनागमनादिकार्ये मन्दा या वध्वस्तासां दर्शनेन संजातरणरणकत्वाद् निःसहम् अधीरं यथा भवति एवं नरा भोगिनो यत्र यन्ति यान्ति वेति ॥

सद्धाए । उन्नय । "न श्रदुदोः" [१२] इति न लुक् ॥

नीसह निस्सहं । दुसहाउ दुस्सहेणं । "निर्दुरोर्वा" [१३] इति न लुक् ॥

८. गृहाणाम् अन्तः मध्यप्रदेशे उपरि उपरितनभागे च तेजोदुरालोकैः प्रेङ्खत्प्रभामण्डलखण्डितनेत्रप्रसरैः रत्नैः मुक्ताफलप्रवालाद्यैः कृत्वा सरिदधिपसंपदो रत्नाकरविभूतयः निरवशेषाः समस्ताः क्षिप्ता विन्यस्ता यत्र मन्यन्ते ॥

अन्तरप्पाणो । दुरालोएहिं । निरवसेसा । "स्वरेन्तरश्च" [१४] इति लुक् न । क्वचिद् भवत्यपि । अन्तो-उवरिं ॥

९. मधुरगीः प्रियवाक्यः सन् जनः क्षुधार्तेभ्यो बुभुक्षाक्षामकुक्षिभ्यः विद्युच्चलां क्षणदृश्यविनश्वरीम् अतो ददत् कारुण्यात्[1] प्रयच्छन् लक्ष्मीम् स्वास्थ्यजनकत्वेन खु इति संभाव्यते भिषग् वैद्यः । यत्रेति प्रक्रमाज्ज्ञेयम् । अत्रार्थे पूर्णोपमामाह । यथा शरत्कालः प्रावृट्क्लान्तानां वर्षाकालकलुषितानां दिशां लक्ष्मीं प्रसादरूपां शोभां ददाति ॥

सरिआ । "स्त्रियाम् आद् अविद्युतः" [१६] इति आत्त्वम् । बाहुलकाद् ईषत्स्पृष्टतरयश्रुतिरपि । संपया । अविद्युत इति किम् । विज्जु-चलं ॥

महुर-गिरो । "रो रा" [१६] इति रा[2] ॥

छुहत्ताण । "क्षुधो हा" [१७] इति हा । आर्षे तु[3] खुहेत्यपि ।

---

१ D कारणात्. २ BC राः. ३ BC आर्षेति.

जत्थच्छरस-मण-हरो वहूहि रमिरो वि अच्छर-समाहिं ।
दीहाऊ वि अदीहाउस-माणी सह विवेइ-जणो ॥ १० ॥
कुसुम-धणू धणुह-धरो कउहा-मुह-मण्डणम्मि चन्दंमि ।
रज्जं तमेग-छत्तं असंकमुवभुंजए जत्थ ॥ ११ ॥

भिसओ । सरओ । " शरदादेरत् " [१८] इति अन्त्यव्यञ्जनस्य अत् ॥ दिसाण । पाउस । " दिक्प्रावृषोः सः " [१९] ॥

१०. यत्र अप्सरोमनोहरः त्रिदशाङ्गनामानसावर्जकः अप्सरःसमाभिः देवीकल्पाभिर्वधूभिः कान्ताभिः सह रन्तापि रमणशीलोपि दीर्घायुरपि परिपूर्णजीवितव्योपि " मूलविस° " इत्यादिसुगुरूपदेशवशप्रादुर्भूतानित्यत्ववासनावासितान्तःकरणत्वेन अदीर्घायुषम् आत्मानं मन्यते सदा विवेकिजनः युक्तायुक्तविमर्शकृल्लोकः ॥

अच्छरस । अच्छर । दीहाउ । अदीहाउस । "आयुरप्सरसोर्वा" [२०] इति सः ॥

११. ककुम्मुखमण्डने चञ्चत्किरणनिकुरुम्बप्रकृतादिक्कान्तावदनविलेपने चन्द्रे कुसुमधनुः पुष्पधन्वा राज्यम् आधिपत्यं तत् सर्वलोकप्रसिद्धं सर्वोत्कृष्टं वा एकच्छत्रम् अद्वितीयातपत्रम् अशङ्कं निर्भयं यत्र उपभुनक्ति पालयति । तदा तदाज्ञोल्लङ्घनासमर्थत्वाज्जगत इति ॥

कउहा । " ककुभो हः " [२१] इति हः ॥

धणू । धणुह । " धनुषो वा " [२२] इति वा हः ॥

रज्जं । "मोनुस्वारः"[२३] इति मस्य अनुस्वारः । क्वचिद् अनन्त्यस्यापि । चन्दंमि ॥

छत्तं असंकमुव° । "वा स्वरे मश्च " [२४] इति वा अनुस्वारः । पक्षे लुगपवादो मस्य मः । बाहुलकाद् अन्यस्यापि व्यञ्जनस्य मः । तमेग° ॥

---

१ C omits °वासिता°.

रोमंच-कंटइल्लो संझाए वंक-जंपण-छइल्लो ।
जत्थ मणंसिल-तिलओ विलसइ अहिसारिआ-लोओ॥१२॥
जत्थ भवणाण अवरिं देवं-नागेाह विम्हया दिट्ठो ।
रमइ मणोसिल-गोरो मणसिल-लित्तो मयच्छि-जणो॥१३॥
पव्वेसु अपव्वेसुं जत्थ मुणीणं कमेण अकमेणं ।
काऊणं पडिवत्तिं हरिसं काऊण देइ जणो ॥ १४ ॥

१२. अभिसरति अभिसारयति वा कामार्ता कान्तम् इत्यभिसारिका । तल्लक्षणो लोकः अभिसारिकालोकः मनःशिलातिलकः वक्रजल्पने छेकः भाषितेतरवाच्यवचनरचनायां निपुणः अत एव रोमाञ्चेन कण्टकवान् संध्यायां यत्र विलसति क्रीडति । तथाविधजल्पनाविलसनयोः अन्यथानुपपत्तितः कामिभिरिति अनुक्तमपि ज्ञेयम् ॥

असंक । उवभुंजए । रोमंच । कंइटल्लो । संझाए । "ङ्ञणनो व्यञ्जने" [२६] इत्यनुस्वारः ॥

१३. देवनागैः अमरनागकुमारैः कथमत्र मनुष्यः अप्सरोभ्यो नागाङ्गनाभ्यश्चाभ्यधिकारण्यलावण्यशालिन्यो दृश्यन्त इति विस्मयात् आश्चर्याद् दृष्टः गगनाङ्गणे कस्यचित् कार्यस्य संसिद्धये विचरद्भिः अवलोकितः मनःशिलावद्गौरः । सुवर्णवर्णत्वात् । मनःशिलालिप्तः अङ्गशोभातिरेकहेतुतिलकादिकरणेन । मृगाक्षिणी इव अक्षिणी यासां ताश्च सं जनश्च भवनानाम् उपरि यत्र रमते । कामिभिरिति शेषः ॥

वंक जंपण इति आद्यस्य, मणंसिल इति द्वितीयस्य, अवरिं इति तृतीयस्य, "वक्रादावन्तः" [२६] इत्यन्तोनुस्वारः। क्वचिच्छन्दःपूरणेपि। देवं-नागेहिँ। क्वचिन्न । मणसिल । आर्षे मणोसिल ॥

१४. पर्वसु उत्तरपारणपारणादिरूपेषु अपर्वसु तद्व्यतिरिक्तान्यदिनेषु क्रमेण प्रथमम् एकस्य पश्चाद् द्वितीयस्येत्यादिपरिपाट्या

---

१ D ता.

वीस-गुणो तीस-गुणो कलि-कालो नूण जत्थ कय-जुगओ ।
नूणं अणभुञ्जन्ते लोए मासं स-मंसं व ॥ १५॥
जस्सिं सकलंकं वि हु रयणी-रमणं कुणन्ति अकलङ्कं ।
सङ्खधर-संख-भङ्गोज्जलाओ भवणंसु-भंगीओ ॥ १६ ॥
लङ्घिज्जइ नालंघं वञ्चिज्जइ न हु अवंचणिज्जं च ।
वञ्छिज्जइ न वि जस्सिं अवंछणिज्जं च केणावि ॥ १७ ॥

अक्रमेण समकालं प्रतिपत्तिम् " अभिमुह-गमणं " इत्यादिसिद्धान्तोक्त-भक्तिं कृत्वा हर्षं कृत्वा च मुनीनां यत्र जनो ददाति ॥

भवणाण । पञ्चेसु अपञ्चेसुं । मुणाणं । कमेण अकमेणं । काऊणं काऊण । " क्त्वास्यादेर्णस्वोर्वा " [२७] इत्यन्तो वानुस्वारः ॥

१५. किल अयं कलिकालः सर्वकालं सर्वकालेषु अधमतमः । परं सोपि सदाचारधार्मिकजनवत्त्वेन कृतयुगाद् विंशतिगुणस्त्रिंशद्गुणश्च यत्र। नूनम् इत्युत्प्रेक्ष्यते । नूनं निश्चितं मांसं स्वमांसवत् अभुञ्जाने अनभति लोके नरपत्यादौ सति । कृतयुगेपि हि केषांचित् पापात्मनां मांसाशित्वाद् अत्र च सर्वथा तदभावात् ततोधिकत्वम् ॥

वीस । तीस । "विंशत्यादेर्लुक् " [२८] इति अनुस्वारलुक् ॥

मासं मंसं । नूण नूणं । " मांसादेर्वा " [२९] इति वा अनुस्वारलुक् ॥

१६. यस्मिन् शङ्खधरशङ्खभङ्गोज्ज्वलाः चक्रधरपाञ्चजन्यच्छेदविशदा भवनांशुभङ्गयः सदनकिरणविच्छित्तयो रजनीरमणं चन्द्रम् । अपिर्विस्मये । सकलङ्कमपि समलमपि । हु इति निश्चितम् । अकलङ्कं निर्मलं कुर्वन्ति ॥

१७. अलङ्घ्यम् अनवज्ञेयं पूज्यं गुरुमातरपितरादिकं न लङ्घ्यते । तदाज्ञातिक्रमेण न पराभूयते । न च खलु अवञ्चनीयम् अविप्रतार्यं

वंजिअ-सत्ती सत्ती-अणञ्जिओ सत्ति-वंझ-जण-वञ्झो ।
लुंटाय-लुण्टणो संठे सण्ठो जत्थ निव-लोओ ॥ १८ ॥
उद्दंड-बाहु-दण्डा जस्सिं कुंठासहा सयमकुण्ठा ।
कंतंगा कन्त-गुणा नय-पंथे पन्थिआ पुरिसा ॥ १९ ॥

मित्रादि वञ्चयते विप्रतार्यते । नापि च अवाञ्छनीयम् अनभिलषणीयं परद्रव्यपरदारादि वाञ्छ्यते अभिलष्यते सदाचारनिरतत्वात् केनापि यस्मिन् ॥

१८. व्यञ्जिता प्रोद्धरकन्धरराणकण्डूलदोर्दण्डप्रचण्डशात्रवत्रासने प्रकटिता[1] शक्तिः स्वसामर्थ्यं येन । शक्त्या अनञ्जितः अगतशक्तिः । शक्तिवन्ध्यजनवन्ध्यः। पराक्रमवति अभियुक्तः । लुण्टाके चोरे लुण्टनो मोषकः । शठे मायाविनि शठश्छद्मपरः । नीतिमतां हि राज्ञां तथाविधेषु प्रतिकूलाचरणं न दोषाय । यदाह भारविः ।

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधान्
असंवृताङ्गान् निशिता इवेषवः ॥

यत्र नृपलोको राजानः ॥

१९. उद्दण्डौ शात्रवत्रासकृत्त्वेन प्रचण्डौ बाहुदण्डौ येषाम् । कुण्ठाः क्रियासु मन्दाः तान् न सहन्ते न क्षमन्ते इति कुण्ठासहाः । स्वयम् आत्मना च अकुण्ठाः देवार्चनादिक्रियासु अमन्दाः । कान्ताङ्गाः मनोज्ञहस्तपादाद्यवयवाः । कान्ता मनोज्ञा विश्वेन[2] वाञ्छिता वा गुणाः शौर्यौदार्यस्थैर्यगाम्भीर्यादयो येषाम् । नयपथे न्यायमार्गे पान्थाः पथिकाः पुरुषा यत्र ॥

---

१ BC omit प्रकटिता. २ BC विश्वविश्वेन.

चंदुज्जाण व चन्दो वंफिअ-बंधूण बन्धवो जस्सिं ।
अणुकंप-कम्पिअ-मणो विहवि-जणो वम्फए धम्मं ॥२०॥
लंबंत-लुम्बि-रंभारम्भिय-तोरण-निरुद्ध-संरंभो ।
सरए वि पाउसम्मि व न जत्थ दीसइ फुडो तरणी॥२१॥
जत्थ चुलुक्क-निवाणं परिमल-जम्मो जसो कुसुम-दामं ।
नहमिव सव्व-गओ दिस-रमणीण सिराइँ सुरहेइ ॥२२॥

२०. चंदुज्जेति देश्यः कुमुदवाची। ततो यथा कुमुदानां चन्द्रो बान्धवः एवं काङ्क्षिता निराश्रयत्वेन अभिलषिता बान्धवा यैस्तेषाम् उपकारकारित्वाद् अनुकम्पाकम्पितमना दयावशगतचेताः सन् बान्धवः विभविजनः ईश्वरलोको यस्मिन् धर्मं काङ्क्षति ॥

२१. लम्बमाना लुम्ब्यः फलसमूहा यासु ताश्च ता रम्भाश्च कदल्यस्ताभिः आरब्धानि प्रतिगृहं कृतानि यानि तोरणानि वन्दनमालास्तैर्निरुद्धः निषिद्धः संरम्भः किरणनिकरप्रसररूप आटोपो यस्य स एवंभूतस्तरणिर्द्युमणिः स्फुटः प्रकटो न यत्र दृश्यते प्रावृषीव प्रावृट्काल इव शरद्यपि शरत्कालेपि। प्रावृषि हि सजलजलधरान्तर्हितत्वाद् न दृश्यते। अत्र तु निवृत्तघनायां शरद्यपि न दृश्यत इति विरुद्धार्थः अपिशब्दः ॥

सकलंकं अकलङ्कं। सङ्ख संख। भङ्गो भंगीओ। लङ्घिजइ लंघं। वञ्चिजइ अवंचणिज्जं। वञ्छिजइ अवंछणिज्जं। वंजिअ अणञ्जिओ। वंझ वञ्झो। लुंटाय लुण्टणो। संठे सण्ठो। उद्दंड दण्डा। कुंढा अकुण्ढा। कंतंगा कन्त। पंथे पन्थिआ। चंदुज्जाण चन्दो। बंधूण बन्धवो। अणुकंप कम्पिअ। [वंफिअ] वम्फए। लंबंत लुम्बि। रंभा रम्भिअ। "वर्गेन्त्यो वा" [३०] इति वा अनुस्वारस्य वर्गान्त्यः ॥

सरए। पाउसम्मि। तरणी। "प्रावृट्शरत्तरणयः पुंसि" [३१] इति पुंलिङ्गे प्रयोक्तव्याः ॥

२२. यत्र चौलुक्यनृपाणां मूलराजप्रभृतीनां नभ इव गगनमिव

---

१ BC add वंफिअ before बंधूण instead of before वम्फए.

सव्व-वयाणं मज्झिम-वयं व सुमणाण जाइ-सुमणं व ।
सम्माण मुत्ति-सम्मं व पुहइ-नयराण जं सेयं ॥ २३ ॥
चम्मं जाण न अच्छी णाणं अच्छीइँ ताण वि मुणीण ।
विअसन्ति जत्थ नयणा किं पुण अन्नाण नयणाइं ॥२४॥
गुरुणो वयणा वयणाइँ ताव माहप्पमवि य माहप्पो ।
ताव गुणाइं पि गुणा जाव न जस्सिं बुहे निअइ ॥२५॥

सर्वगतम् ऊर्ध्वाधोमर्त्यलोकप्राप्तं परिमलस्य सौरभ्यस्य जन्म उत्पत्तिस्थानं यशः कुसुमदाम पुष्पमाल्यं दिग्रमणीनां शिरांसि सुरभयति सुरभीणि करोति । एतन्नगरम् आरभ्य सकलदिक्चक्रवालव्यापि चौलुक्यनृपाणां यश इत्यर्थः ॥

२३. यथा सर्ववयसां कौमारयौवनवार्धकानां मध्यमवयः तारुण्यं श्रेयः । यथा सुमनसां बकुलविचकिलपाटलादिपुष्पाणां जातिसुमनाः । यथा शर्मणां चक्रवर्तिदेवेन्द्रादिसौख्यानां मुक्तिशर्म तथा पृथिवीनगराणां प्रतिष्ठानादीनां मध्ये यत् श्रेयः प्रशस्यतरम् ॥

२४. येषाम् अक्षीणि न चर्म किं तु ज्ञानं तत्त्वावबोधरूपम् अक्षीणि । तेषामपि मुनीनां सातिशयज्ञानिनाम् ऋषीणां यत्र नयनानि विकसन्ति अत्यद्भुतधर्मधर्मस्थानादिवीक्षणात् प्रीयन्ते । किं पुनरन्येषां चर्मचक्षुषां सामान्यजनानां नयनानि सविकासानीति ॥

जम्मो । जसो । " स्नम् अदामशिरोनभः " [३२] इति पुंस्त्वम् । अदामशिरोनभ इति किम् । दामं । नहं । सिराइँ । बाहुलकात् । वयं । सुमणं । सम्मं । सेयं । चम्मं ॥

२५. गुरोः सुराचार्यस्य वचनानि तावद् वचनानि । आश्चर्यकारीणीत्यर्थः । माहात्म्यं गौरवमपि तावद् माहात्म्यम् गुणा बुद्धिमत्त्वादयोपि तावद् गुणाः यावत् न यस्मिन् बुधान् पश्यति ।

हरि-हर-विहिणो देवा जत्थन्नाइँ वि वसन्ति देवाइं ।
एयाए महिमाए हरिओ महिमा सुर-पुरीए ॥ २६ ॥
जत्थञ्जलिणा कणयं रयणाइँ वि अञ्जलीइ देइ जणो ।
कणय-निही अक्खीणो रयण-निही अवखया तह वि ॥२७॥
तत्थ सिरि-कुमर[1]-वालो बाहाए सव्वओ वि धरिअ-धरो ।
सुपरिट्ठ-परीवारो सुपइट्ठो आसि राइन्दो ॥ २८ ॥

एतन्नगरबुधविलोकने तु बृहस्पतेर्वाग्मित्वं माहात्म्यं गुणाश्च न प्रतिभान्तीति भावः ॥

अच्छी अच्छीइँ । नयणा नयणाइं । वयणा वयणाइं । माहप्पं माहप्पो । "वाक्ष्यर्थवचनाद्याः" [३३] इति वा पुंस्त्वम् ॥

२६. हरिहरविधयो देवाः अन्येपि सूर्यसुगतफणिपत्यादयो देवा यत्र वसन्ति । अनेन महिम्ना सुरपुर्या स्वर्गलोकस्य महिमा प्रभावः हृतस्तिरस्कृतः । सुरपुर्यां हि इन्द्र एव एकः प्रवरो वसति । अत्र च महाप्रभावाण्यनेकानि दैवतानि । अतो युक्तस्तन्महिमापहारः ॥

गुणाइं गुणा । देवा देवाइं । "गुणाद्याः क्लीबे वा" [३४] इति वा क्लीबत्वम् ॥

२७. यत्र कनकम् अञ्जलिना हस्तेन रत्नान्यपि पद्मरागगारुत्मतहीरकमौक्तिकादीन्यपि अञ्जलिना यत्र जनो ददाति । कृपापात्रदीनानाथाद्यर्थिषु इति शेषः । तथापि कनकनिधिः सुवर्णशेवधिः अक्षीणः परिपूर्णः । रत्ननिधिश्च अक्षीणः । प्रतियाचकं तथा दाने शेवधीनां ह्रासः संभवति । परं वैश्रवणकल्पत्वाज्जनानां तत्परिपूर्णतैवेत्यर्थः । आदिमहाकुलकम् ॥

महिमाए महिमा । अञ्जलिणा अञ्जलीइ । निही निही । "वेमाञ्जल्याद्याः स्त्रियाम्" [३६] इति स्त्रीत्वम् ॥

२८. सर्वतः सकलदिग्वलयावनिपालेभ्यो दिग्गजकूर्मकुलाचल-

---

१ BC °कुमार°

तुह आणा-ओमालं सिरम्मि धरिमो जहा अणिम्मल्लं ।
अम्हे एत्थाम्हेत्थ य इअ भणिउं जो निवेहि नओ ॥ २९ ॥
तुह हरि-पिआ जइ इमा किं पि पिआ किमवि मेइणी जइमा ।
ता किं ति मए त्ति रुसेव जस्स कित्ती गया दूरं ॥ ३० ॥

फणिपतिभ्यो वा बाहौ स्वदोर्दण्डे धृतधरः संस्थापितवसुंधरः सुप्रतिष्ठः सन्न्यायमार्गस्थितः परीवारो मित्रामात्यादिवर्गो यस्य । सुप्रतिष्ठः प्रतिज्ञाशूरः तत्र अणहिलनगरे श्रीकुमारपालो राजेन्द्र आस्ते ॥

बाहाए । " बाहोरात् " [३६] इत्याकारोन्तादेशः ॥

वालो । सव्वओ । धरो । वारो । सुपइट्ठो । राइन्दो । " अतो डो-र्विसर्गस्य " [३७] इति विसर्गस्थाने डोः ॥

२९. अधुना एकोनविंशत्या गाथाभिः अस्यैव राज्ञो वर्णनम् आह । तव आज्ञैव शासनमेव निर्माल्यं शेषां शिरसि शीर्षे धरामः वहामः । किमिव । यथा अनिर्माल्यं तत्कालविकसितशतपत्रिका-चम्पकादिदाम । अत्र सिन्धुदेशादौ वयम् अत्र कुङ्कणदेशादौ च वयं वर्तामहे इति भणित्वा यो नृपैर्नतः ॥

सुपरिट्ठ सुपइट्ठो । ओमालं अणिम्मल्लं । "निष्प्रती ओत्परौ माल्यस्थोर्वा ', [३८] । निर्प्रती माल्ये स्थाधातौ च यथासंख्यम् ओत्परौ वा ॥

३०. तव इयं हरेः प्रिया भार्या यदि किमपि अनाख्येयं यथा भवति एवं प्रिया मेदिनी च चाण्डाली इयं यदि किमपि प्रिया तदा किमिति किम् एवं सति मयेति अस्माद्धेतो रुषेव यस्य कीर्तिर्गता दूरम् ॥ कान्ता हि यदा नीचान्यकान्तासक्तं भर्तारम् अवलोकयति तदा रोषाद् अन्यत्र व्रजति । कीर्तेरपि तथा सर्वत्र भ्रमणाद् इत्थम् उत्प्रेक्षा । अत्र च हरिप्रिया लक्ष्मीः मेदिनी पृथ्वी ॥

" आदेः " [३९] । आदेरित्याधिकारः कगचजेत्यादिसूत्रात् प्राग् अविशेषे वेदितव्यः ॥

अम्हे एत्थ अम्हेत्थ । जइ इमा जइमा । " त्यदाद्य° " इत्यादिना [४०] त्यदादेरव्ययाच्च तयोरेवादेः स्वरस्य बहुलं लुक् ॥

जो दूसासण-रिउणो आसत्थामस्स राम-सीसस्स ।
वीसामिअ-जस-पसरो स-जसेणं कासवि-तलम्मि ॥ ३१ ॥
वीसुं वासा-नीसित्त-महि-अले ऊस-मालि-तेअस्स ।
रज्जे जस्स न कास वि नीसत्तं नीसहत्तं वा ॥ ३२ ॥
गुण-सामिद्धी पयडा कला-समिद्धी वि पायडा जस्स ।
जो दाहिण-पवण-निहो दाक्खिण्ण-निही गुणि-वणाण ॥ ३३ ॥

किं पि किमवि । "पदाद् अपेर्वा" [४१] पदात् परस्य अपेः आदेर्लुग् वा ॥

किं ति मए त्ति । "इतेः स्वरात् तश्च द्विः" [४२] इति पदाद् इतेः आदेर्लुक् स्वराच्च तकारो द्विः ॥

३१. दुःशासनस्य रिपुर्भीमस्तस्य । अश्वत्थाम्नः द्रोणाचार्याङ्गजस्य । रामस्य परशुरामस्य शिष्यो भीष्मस्तस्य च विश्रमितयशःप्रसरः प्रशमितसुश्लोकप्रपञ्चः स्वयशसा कृत्वा यः काश्यपीतले पृथ्वीपीठे । भीमादीनां शौर्यादिगुणगणेभ्योपि अद्भुतगुणत्वाद् अस्य सुघटस्तद्यशःप्रशमः । अथ च चिरभ्रमणखिन्नं विश्राम्यते ॥

३२. उल्लमालितेजसः दुःसहत्वाद् मार्तण्डकल्पप्रतापस्य यस्य विष्वक् समन्ताद् वर्षासु प्रावृट्काले निषिक्तं धाराधरधाराधोरण्या उक्षितं महीतलं यत्र तस्मिन् राज्ये न कस्यापि निःस्वत्वं निर्द्रव्यत्वं निःसहत्वं असमर्थत्वं वा । राजन्वत्यां हि पृथ्व्यां स्वकालं वृष्टिः ईश्वराः समर्थाश्च लोका इत्यादि सर्वं सुघटमिति ॥

दूसासण । आसत्थामस्स । सीसस्स । वीसामिअ । कासवि । वीसुं । वासा । नीसित्त । ऊस । कास । नीसत्तं । नीसहत्तं । "लुप्तयरव०" इत्यादिना [४३] लुप्तयाद्यानां शषसानाम् आदेः स्वरस्य दीर्घः ॥

३३. गुणानां शौर्यादीनां समृद्धिः संपत् प्रकटा अत्युत्कर्षप्राप्तत्वात् प्रसिद्धा । कलानां गीतपठितादिद्विसप्ततिसंख्यानां समृद्धिरपि यस्य

सिविणम्मि वारण-बलं सुमिणम्मि अ आस-साहणं जस्स।
दिण्ण-भयं पिच्छन्ता दत्त-करा रिउ-निवा जाया॥ ३४॥
अङ्गार-पिक्क-गोल्हे खाए इङ्गाल-पक्क-कन्दे अ।
तत्त-निलाडा रिउणो जस्स णलाडं[1]-तवे तवणे॥ ३५॥

प्रकटा। दाक्षिण्यस्य अनुकूलताया निधिः शेवधिः। गुणिनः सन्तः त एव सर्वसाधारणत्वेन वनानि। तेषां फलसमृद्ध्यादिजनकत्वेन दक्षिण-पवननिभो योस्ति॥

सामिद्धी समिद्धी। पयडा पायडा। "अतः समृद्ध्यादौ वा" [४४] इति आदेरस्य दीर्घो वा॥

दाहिण। "दक्षिणे हे" [४५] इति आदेरस्य दीर्घः। हे इति किम्। दक्खिण्ण॥

३४. स्वप्ने वारणबलं गजसैन्यं स्वप्ने अश्वसाधनं तुरगकटकं च दत्त-भयं वितीर्णत्रासं यस्य प्रेक्षमाणा दत्तकरा अर्पितदण्डा रिपुनृपा जाताः। तद्गजादिबलं चरेभ्यः सभयं निशम्य स्वप्ने साक्षादिव पश्यन्तस्त्रस्तचित्ता रिपुनृपाः स्वसौस्थ्याय यं दण्डादिना प्रसादयन्तीति भावः॥

सिविणम्मि। दिण्ण। "इः स्वप्नादौ" [४३] इति इत्वम्। आर्षे उकारोपि। सुमिणम्मि। बाहुलकाण्णत्वाभावे न। दत्त॥

३५. ललाटंतपे अत्युग्रे तपने मार्तण्डे सति तप्तललाटाः संतप्तभाल-स्थला रिपवो यस्य अङ्गारपक्कानि यानि गोल्हेति देश्यत्वाद् बिम्बीफलानि तानि। अङ्गारेषु पक्का ये कन्दास्तांश्च खादन्ति भक्षयन्ति। यद्भयाद् अरण्यानीमध्यम् अध्यासीना अङ्गारपक्कबिम्बीफलकन्दादिभिः शत्रवः प्राणधारणं[2] कुर्वन्तीत्यर्थः॥

अङ्गार इङ्गाल। पिक्क पक्क। निलाड[3] णलाडं। "पक्काङ्गारललाटे वा" [४७] इति वा इत्वम्॥

---

१ D णडालं°. २ BC °धारणां. ३ D णिडाल णडालं.

कइमं मज्झिम-लोए रिऊहिँ चत्तं न छत्तिवण्ण-वणं ।
नव-छत्तवण्ण-परिमल-मए गए जस्स संभरिउं ॥ ३६ ॥
अमयमइओ व्व अहवा अमयमयाओ वि समहिओ जस्स ।
हर-हीर-पिआहि वि जस-गीअ-झुणी सुव्वए वीसुं ॥ ३७॥
अखुडिअ-पडिहा-पसरस्स अग्गओ जस्स दप्प-कण्डूलं ।
खण्डिअ-नाण-प्पडिहं बुहं-चुडं गउअ-चण्डं व ॥ ३८ ॥

३६. मध्यमलोके मर्त्यलोके कतमत् सप्तपर्णवनं सप्तच्छदकाननं रिपुभिर्न त्यक्तम् नवसप्तपर्णपरिमलमदान् गजान् यस्य संस्मृत्य ॥

कइमं । मज्झिम । "मध्यमकतमे द्वितीयस्य" [४८] इति अत इत्वम्॥

छत्तिवण्ण छत्तवण्ण । "सप्तपर्णे वा" [४९] इति अत इत्वं वा ॥

३७. अमृतस्य विकारः अमृतमयः स इव अथ वा अमृतमयादपि सुधाविकारादपि समधिकः समग्रीलो यस्य यशसो गीतस्य गानस्य ध्वनिर्निनादः आस्तां तावद् अन्यजनैः किं तु हरः ईश्वरः हरप्रिया गौरी ताभ्यामपि विष्वक् समन्तात् श्रूयते ॥

अमयमइओ अमयमयाओ। "मयट्यइर्वा" [५०] इति आदेरतो अइः वा॥

हर हीर । "ईर्हरे वा" [५१] इति आदेरतो वा ईः ॥

झुणी वीसुं । "ध्वनिविष्वचोरुः" [५२] इति आदेरस्य उत्वम् ॥

३८. अखण्डितः अच्छिन्नः प्रतिभा । नवनवोल्लेखशालिनी प्रज्ञा प्रतिभा । तस्याः प्रसरो यस्य तस्य यस्य अग्रतः पुरतो दर्पेण सकल-शास्त्रादुर्भावबोधाभिमानेन पूर्वं कण्डूलं खर्जूलं खण्डिता निरुत्तर-त्वाच्छिन्ना ज्ञानप्रतिभा यस्य तद् बुधचण्डम् । उत्प्रेक्ष्यते । गवया गवाकृतयः सास्नारहिता आरण्यकपशवः तेषां चण्डमिव ॥

अखुडिअ खण्डिअ । चुंडं चण्डं । "चण्डखण्डिते णा वा" [५३] इति आदेरस्य णेन सह उत्वम् ॥

---

१ BC वुहुंचुंडं गउवचंद्रंव; D बुहबुन्द्रं गउअबद्रव. २ D मध्यलोके. ३ BC omit प्रज्ञा. ४ D °द्भुतबोधा°. ५ B C °चंद्रं; D चंदं. ६ BC चंद्रंमिव; D चद्रमिव. ७ BC चुंद्रं चंद्रं । चंद्रखंडिते &c; D चुद्रं । बन्द्रं°.

असि-पुढुमो धणु-पुढमो छुरिया-पढुमो अ सेल्ल-पढमो य ।
सव्वण्णु व्व अहिण्णू जो सयल-कला-कलावस्स ॥ ३९ ॥
उर-सेज्जाइ वि हरिणो सुन्देर-घरम्मि सइ सिरी अथिरा ।
जस्स गुण-वेल्लि-तरुणो थिरासि भू-वल्लि-पेरन्ते ॥ ४० ॥
जस्स य दिस-पज्जन्ते अहरिअ-जोण्होक्करो जसोक्करो ।
अच्छेर-निरीहाण वि अच्छरिअं किं व न करेइ ॥ ४१ ॥

गउअ । "गवये वः" [५४] इति वस्य उत्वम् ॥

३९. असौ प्रथमः धनुषि प्रथमः छुरिकायां प्रथमश्च । सेल्लेति देश्यः प्रासवाची । तस्मिन् प्रथमश्च । असिधनुश्छुरिकासेल्लशब्दैः एतत्क्रियापटवः सुभटा उच्यन्ते । तेषु प्रवरः स्वघातदानपरघात-वञ्चनादिक्रियानिपुणत्वात् । किं बहुना यः सकलकलाकलापस्य अभिज्ञो विचक्षणः । किंवत् सर्वज्ञ इव सर्ववेदीव ॥

पुढुमो पुढमो पढुमो पढमो । "प्रथमे पथोर्वा" [५५] इति पथयोः अस्य युगपत् क्रमेण च उर्वा ॥

सव्वण्णु । अहिण्णू । "ज्ञो णत्वेभिज्ञादौ" [५६] इति ज्ञस्य णत्वे ज्ञस्यैव अत उत्वम् ॥

४०. आस्तां तावत् स्वावासकमलादौ अस्थिरा । सौन्दर्यगृहे हरेः उरःशय्यायामपि [सदा] श्रीः अस्थिरा चञ्चला । परं सापि गुणा एव यशःप्रसूनजनकत्वाद् वल्लयः वल्लर्यः तासां तरुरिव आधारभूतत्वात् । तस्य यस्य भूवल्लिपर्यन्ते सकले पृथ्वीवलये स्थिरा आसीत् । चापलम् अपास्य अस्मिन् गुणगणनिधौ लक्ष्मीः स्थितेति भावः ॥

सेज्जा । सुन्देर । "एच्छय्यादौ" [५७] इति आदेरस्य एत्त्वम् ॥

४१. पूर्ववर्णनापेक्षया चः समुच्चये । यस्य दिक्पर्यन्ते अधरितः पराभूतो ज्योत्स्नायाश्चन्द्रिकाया उत्करो राशिर्येन स यशउत्करो

जो आसि बम्भचेर-ग्गहण गुरू पइ-विओअ-विहुरस्स।
रण्णन्तग्गय-रिउ-अन्तेउर-पोम्मच्छि-लोअस्स ॥ ४२ ॥
पय-पउम-नमोक्कारे परोप्परामद्द-तुट्ट-हारेहिं।
जस्स सहाइ निवेहिं ओप्पिअमिव मुत्तिआहरणं ॥ ४३ ॥
जत्थप्पिअ-भू-भारो सुवइ फणी – तत्थ सोवइ हरी वि।
जोन्नत्थ-दिन्न-भारो न उणाइ सयालुओ न उणा ॥ ४४ ॥

न केवलम् अन्येषाम् आश्चर्ये कौतुके निरीहाः सद्भ्यानविन्यस्त-चित्तत्वात् निराकाङ्क्षास्तेषां योगिनामपि आश्चर्यं किमिव न करोति। किं तु सर्वं आश्चर्यं वितनोतीत्यर्थः ॥

वेल्लि वल्लि। पेरन्ते पजन्ते। जोण्होक्करो जसोक्केरो। अच्छेर अच्छरिअं। "वल्लयुत्करपर्यन्ताश्चर्ये वा" [५८] इति वा आदेरस्य एत्त्वम् ॥

४२. ब्रह्मचर्यं मैथुनसेवनविरमणं तस्य ग्राहणे अङ्गीकारणे गुरुः दीक्षादाता य आसीत् पत्युर्वियोगेन विधुरस्य सकष्टस्य[1] अरण्यस्य अन्तः मध्ये गतो यो रिपूणाम् अन्तःपुरपद्माक्षीलोकः अवरोधवधूजनस्तस्य। सर्वशत्रूणां निर्मूलकाषंकषितत्वात् तेन्नायिकानां[2] ब्रह्मचर्यदीक्षादानम्। ब्रह्मचारी प्रायः अरण्यचारी भवतीत्युक्तिलेशः ॥

बम्भचेर। "ब्रह्मचर्ये चः" [५९] इति चस्यात एत्त्वम् ॥

अन्तेउर। "तोन्तरि" [६०] इति तस्यात एत्त्वम्। क्वचिन्न। रण्णन्तग्गय ॥

४३. पदपद्मनमस्कारे। क्रियमाणे इति शेषः। परस्परामर्देन अन्योन्यसंघर्षेण त्रुटिताः स्रस्ता ये हारास्तैः कृत्वा नृपैर्यस्य सभायां मौक्तिकाभरणमिव अर्पितं दत्तम् ॥

पोम्म। "ओत् पद्मे" [६१] इति आदेरतः ओत्त्वम्। "पद्मछद्म०" [२.११२] इति विश्लेषे न। पउम ॥

नमोक्कारे। परोप्परा। "नमस्कारपरस्परे द्वितीयस्य" [६२] इति अत ओत्त्वम् ॥

४४. यत्र अर्पितभूभारः स्वपिति फणी शेषः तत्रैव अर्पितभूभारः

---

१ D कष्टस्य. २ D नायिकानां.

जइ सक्को न उण नरो न उणो नारायणो वि सारिच्छो ।
जस्स पुणाइ पुणाइ वि भुवणाभय-दाण-ललिअस्स ॥ ४५ ॥
रण्णे अरण्ण-साणाउलम्मि लाऊ-लया-हरे रुन्नं ।
जस्सारि-वहूहि तहा अलाउ-कुल्ला जह कयाओ ॥ ४६ ॥
उक्खय-संठविअ-निवेण जेण वच्छत्थलाओं हरिणो वि ।
उक्खाया भुय-दण्डे निअम्मि संठाविया लच्छी ॥ ४७ ॥

हरिरपि स्वपिति । यः पुनः अन्यत्र न दत्तो भारः अर्थाद् भुव एव येन । अत एव च न पुनः शयालुः आलस्योपहतः ॥

ओप्पिअ जत्थप्पिअ "वार्पौ" [६३] इति अर्पयतेः आदेरस्य ओत्त्वं वा ॥
सुवइ सोवइ । "स्वपावुच्च" [६४] इति स्वपितौ आदेरस्य ओत् उच्च ॥

४५. यस्य यदि शक्रः इन्द्रः सदृक्षो । न पुनः नरः अर्जुनो न पुनर्नारायणोपि । कुतः पुनःपुनरपि भूयोभूयोपि भुवनस्य सकलसचराचरलोकस्य यद् अभयदानं वधनिवर्तनं तेन ललितस्य मनोहरस्य । यदीति संभावने । शौर्यादिभिः इन्द्रो यत्तुल्यः संभाव्यते । परमार्थतस्तु सोप्यविरतत्वाद् यत्तुल्यो नास्तीत्यर्थः ॥

न उणाइ न उणा । "नात् पुनर्यादाइ वा" [६५] इति आदेरस्य आ आइ इत्यादेशौ वा । पक्षे । न उण न उणो । केवलस्यापि दृश्यते । पुणाइ ॥

४६. अरण्ये अरण्यश्वभिः वृकैः आकुले संकीर्णे अलाबूलतागृहे[1] तुम्बिनीवल्लिमण्डपे यस्य अरिवधूभिः तथा अनवरताश्रुपनीपतनेन रुदितं यथा अलाबूनां सेकाय कुल्याः सारणयः कृताः ॥

रण्णे अरण्ण । लाऊ अलाउ । "वालाब्वरण्ये लुक्" [६६] इति आदेर्लुक् ॥

४७. अहम् एवं मन्ये । येन हरेरपि वक्षःस्थलात् लक्ष्मीः उत्खाता उत्पाटिता ततो निजभुजादण्डे संस्थापिता । कथम् एवं ज्ञायत इति विशेषणद्वारेण हेतुमाह । पूर्वम् उत्खाताः अभक्तत्वात् स्वस्थानाच्याविताः

१ D omits गृहे...। "वालाब्व"

अह कइया वि दिवा-मुह-पत्थावे पत्थवोचिअं तस्स ।
अणुरागागय-मरहट्ठमाइ-सूएहिं इअं पढिअं ॥ ४८ ॥
हय-मंसल-तम-पसरो सइ वामो पंसुलाण पच्चूसो ।
सामय-वय-दिन्नग्घो तं व पयट्टो सया पुन्नो ॥ ४९ ॥

पश्चात् सेवावशवर्तित्वात् संस्थापिता देशाधिपत्य नियोजिता नृपा अनेनेति नृपस्वभावेन हरेः प्रियाया अपि इत्थं संभाव्यते । कविमार्गे विभूतिहरिप्रिययोरैक्याद् एवं वर्णना ॥

तहा जह । उक्खय उक्खाया । संठविअ संठाविया । "वाव्ययोत्खातादा वदातः" [६०] इति आदेराकारस्य अत् वा ॥

४८. अथ अनन्तरं कदाचिदपि कस्मिंश्चित् काले दिवामुखप्रस्तावे वासरप्रारम्भावसरे तस्य श्रीकुमारपालभूपालस्य प्रस्तावोचितं प्रभात-पठनीयम् अनुरागेण अत्यद्भुतगुणगणश्रवणसंजातदर्शनस्नेहेन आगता ये ते च ते महाराष्ट्रः आदिर्येषां देशानां ते तथा तेषां सूताश्च मङ्गल-पाठकास्तैः इति वक्ष्यमाणं पैठितम् ॥

पत्थावे पत्थवो । "घञ्वृद्धेर्वा" [६८] इति आदेराकारस्य अत् वा । क्वचिन्न । अणुरागा ॥

मरहट्ठ । "महाराष्ट्रे" [६९] इति आदेराकारस्य[3] अत् । वक्रादित्वाद् अनुस्वारः । बाहुलकाद् अन्यस्यापि व्यञ्जनस्य मः ॥

४९. अथ द्वाविंशत्या[4] गाथाभिः सूतोक्तम् एवाह । हतः नवदिन-करकरसंपर्काद् ध्वस्तः मांसलः सूचिभेद्यस्तमःप्रसरः तिमिरप्रवृत्ति-र्येन सदा वामः विटादिगृहगतिनिषेधकत्वेन प्रतिकूलः । कासाम् । पांसुलानां स्वैरिणीनाम् । श्यामाकपयोभिः आरण्यव्रीहिजलैः दत्तः त्रिःप्रदक्षिणापूर्वं मार्तण्डमण्डलं प्रति क्षिप्तः अर्घः पूजा यत्र । प्रत्यूषः अहर्मुखम् । पुण्यः सकललोकलोचनान्ध्यपटलविध्वंसकत्वेन प्रशस्यः

१ B पुंसलाण. २ BC पाठितम्. ३ BC °राकारः स्यात् for °राकारस्य अत्. ४ D द्वाविंशतिगाथाभिः.

दिसं[1]-कुप्पिसन्त-जस-भर देवय-हरए तुमं सकुप्पासा ।
दिक्खाइरिआ सिक्खायरिएहि सहोवसप्पन्ति ॥ ५० ॥
गय-थीण-तिमिर-केसे खल्लीडे नह-सिरम्मि संवुत्ते ।
थुवआ हवन्ति[2] लोआ एण्हिं सुण्हाल-चिन्धस्स ॥ ५१ ॥

प्रवृत्तः संजातः । त्वमिवेति । भवानप्येवंविधः । जिनवचनावबोधाद् ध्वस्तनिबिडाज्ञानप्रवृत्तिः । पांशुलानां पाप्मिनां सदा वामः दुःखदायित्वात् । सामजत्रजैः हस्तिघटाभिर्दत्तः अर्घः उपायनं यस्मै । सदाचारनिरतत्वात् पवित्रश्चेति ॥

मंसल[3] । पंसुला । "मांसादिष्वनुस्वारे" [७०] इति मांसप्रकारेष्वनुस्वारे सति आदेरातोऽत् ॥

सामय । "श्यामाके मः" [७१] इति मस्य आत अत् ॥

५०. दिक्षु कूर्पासः कञ्चुलिका तद्वद् आचरन् यशोभरो यस्य स तथा तस्यामन्त्रणम् । हे दिक्कूर्पाससद्यशोभर देवतागृहे सकूर्पासाःसकञ्चुका दीक्षाचार्या बटुककरणादिसंस्कारकौरिणः[4] शिक्षाचार्यैः शास्त्रपाठकैः सह त्वाम् उपसर्पन्ति । आशीर्वादप्रदानार्थं समीपम् आगच्छन्ति । इदानीम् इति प्रक्रमाज्ज्ञेयम् । एवम् अन्यत्रापि ॥

सह सया । कुप्पिसं कुप्पासा । "इः सदादौ वा" [७२] इति आत इत्वं वा ।

दिक्खाइरिआ सिक्खायरिएहि । "आचार्ये चोऽच्च" [८३] इति चस्य आत इत्वम् अत्त्वं च ॥

५१. गतं नष्टं स्त्यानं घनं तिमिरमेव श्यामवर्णत्वात् केशा यत्र । अत एव खल्वाटे खलतौ नभ एव सकललोकस्य उपरिवर्तित्वात् शिरस्तस्मिन् संवृत्ते जाते सति सास्नालचिह्नस्य वृषभध्वजस्य भगवत आदिनाथस्य शूलिनश्च इदानीं प्रत्यूषे लोका आर्हतमाहेश्वराः स्तावकाः स्तोतारो भवन्ति ॥

थीण । खल्लीडे । "ई स्त्यानखल्वाटे" [७४] इति आदेरातः ई[5] ॥

थुवआ । सुण्हाल । "उः सास्नास्तावके" [७५] इति आदेरातः उत्वम् ॥

---

१ D दिसि. २ BC वहंति. ३ D omits मंसल...°रातोत्. ४ BC °संस्कारिणः. ५ D omits ई...रातः.

गयणे तुहिणोसारिणि तुहिणासारं पडन्तमगणन्ता ।
उट्ठन्ति वहूओ पुरो अज्जूणं विणय-गेज्झाण ॥ ५२ ॥
कुट्टिम-चउ-वारेसुं सतिण्हमिण्हं कुणन्ति रमणीओ ।
देरागय-पारावय-रावोट्ठिअ-पिअ-परीरम्भं ॥ ५३ ॥
पारेवय-मणिएहिं तेत्तिअमेत्तं रमेसुं वेसाओ ।
तेत्तिअमत्तं मग्गन्ति चलिअ-मेत्ते भुअङ्गम्मि ॥ ५४ ॥

५२. तुहिनस्य प्रालेयस्य आसारो वेगवद्वर्षो विद्यते यस्मिन् एवंभूते गगने सति तुहिनासारं पतन्तं शरीरे लगन्तम् अगणयन्त्यः अमन्यमाना विनयग्राह्याणां भक्त्या आवर्जनीयानाम् आर्याणां श्वश्रूणां पुरः पूर्वं वध्वः उत्तिष्ठन्ति ॥

तुहिणोसारिणि तुहिणासारं । "ऊद् वासारे" [७६] इति आदेरात् ऊत् वा ॥

अज्जूणं । "आर्यायां र्यः श्वश्र्वाम्" [७७] इति र्यस्य आत ऊः ॥

गेज्झाण । "एद् ग्राह्ये" [७८] इति एत्त्वम् ॥

५३. कुट्टिमानि मण्यादिभिर्बद्धतलानि यानि चतुर्द्वाराणि चतुर्मुखगृहविशेषास्तेषु सतृष्णं दिने आशङ्कितभाविबहुविरहत्वेन सतर्षं यथा भवति एवम् इदानीं प्रातःक्षणे द्वारेषु आगता ये पारापतास्तेषां रावैः शब्दैरुत्थिता जागरिता ये प्रियास्तेषां परीरम्भम् आलिङ्गनं रमण्यः कुर्वन्ति ॥

देरा । "द्वारे वा" [७९] इति आत एत्त्वं वा । पक्षे वारे ॥ दुआरं । दारं इति प्रयोगद्वयम् अनुक्तमपि ज्ञेयम् ॥

५४. पारापतमणितानीव कलरवकूजितानीव यानि मणितानि रतकूजितानि तैः कृत्वा यावान् प्रतिज्ञातः कालस्तावन्मात्रं वेश्याः पण्याङ्गना अरंसिषत अक्रीडिषुः । भुजङ्गे विटे चलितमात्रे गमनोन्मुख एव तावन्मात्रं प्रतिज्ञातकालमनितं मार्गयन्ति गवेषयन्ति ॥ पूर्वार्धे जित्तिअमित्तं इति तु रम्यः पाठः ॥

---

१ B °साराणि. २ D रमिंसु. ३ B °साराणि, ४ BC °तलानि चतु°. ५ D omits दिने.....°त्थिता.

अद्द-नहङ्काण पियाण अल्ल-आलावयाण विलयाओ ।
उल्लन्ति अङ्कमंसुअ-ओल्लीहिं ओल्ल-नक्खङ्का ॥ ५५ ॥
निअ-ठाण-मीलणं पिक्खिऊण चिन्ता-परा मिउल्लावा ।
नीलुप्पल-पेण्डे पिण्डिऊण भसला रुअन्ति व्व ॥ ५६ ॥

पारावय पारेवय । "पारापते रो वा" [८०] इति रस्य आत एत्वं वा ॥

तेत्तिअमेत्तं तेत्तिअमत्तं । "मात्रटि वा" [८१] इति आत एत्वं वा । बाहुलकात् क्वचिन्मात्रशब्देपि । चालिअ-मेत्ते ॥

५५. आर्द्रास्तत्कालदत्तत्वात् सरसा नखाङ्का कररुहव्रणानि येषाम् आर्द्राः स्नेहमिश्रा आलापाः परस्परोक्तयो येषां ते तथा । तेषां प्रियाणाम् अङ्कम् उत्सङ्गम् आर्द्रनखाङ्का वनिता योषितः अश्वालिभिः नेत्रबाष्प-पङ्क्तिभिः आर्द्रयन्ति आर्द्रं कुर्वन्ति । सर्वरात्रं सुरतादिसुखनिमग्ना वयम् इदानीं च तदुच्छेदजनकः प्रियविप्रयोगो भवितेति दुःखाद् रुदन्तीत्यर्थः ॥

उल्लन्ति ओल्ल । "उदोद् वार्द्रे" [८२] इति आदेरातः उत् ओच्च वा पक्षे अद्द । अल्ल ॥

ओलीहिं । "ओदाल्यां पङ्क्तौ" [८३] इति आत ओत्त्वम् ॥

५६. प्रातः संकोचात् प्रागेव नीलोत्पलेभ्यो निर्गत्य रारट्यमानान् तत्कोशस्थांश्च भ्रमरान् वीक्ष्य कविः एवम् ऊहमानः प्राह । निजस्थान-मीलनं स्वावाससंकोचं प्रेक्ष्य विलोक्य चिन्तापराः क्व वयम् इदानीं निराश्रयाः स्थास्याम इत्यादिविकल्पसंकल्पनिष्ठाः । मृदुः सकष्टत्वात् कृशः उल्लापः अन्योन्यजल्पनं येषां ते तथा सन्तो भसला नीलोत्पल-पिण्डे असितोत्पलकोशे पिण्डयित्वा मिलित्वा रुदन्तीव । येषां किल राजादिना गृहं मुच्यते तेपि मिलित्वा रुदन्तीत्युक्तिक्लेशः ॥

मिउल्लावा "ह्रस्वः संयोगे" [८४] इति यथादर्शनं ह्रस्वः ॥

किंसुअ-कुसुमायम्बो केंसुअ-दल-सामलं विगय-मेरं ।
दलिऊण अन्धयारं दंसइ पुहवीइ पहमरुणो ॥ ५७ ॥
काउं महाविलं अतम-मूसयं कय-पडंसुए सूरे ।
लक्ख-हलद्द-बहेडय-रत्त व्व करा विअम्भन्ति ॥ ५८ ॥
विरइअ-हलद्दि-कन्दाभ-दीवओ नव-हलिद्दि-रत्त-करो ।
अहलिद्दा-राओ कामुउ व्व पुव्वं भअइ सूरो ॥ ५९ ॥

पेण्डे पिण्डिऊण । "इत एद्वा" इति आदेरिकारस्य एत् वा । क्वचिन्न । चिन्ता ॥

५७. किंशुकदलश्यामलं पलाशपलाशनीलं विगतमेरं सर्वत्र उच्छृङ्खलम् अन्धकारं दलयित्वा विध्वस्य किंशुककुसुमानीव आताम्रः आरक्तः अरुणः सूर्यः तत्सारथिर्वा पृथिव्याः पन्थानं दर्शयति ॥

किंसुअ केंसुअ । "किंशुके वा" [८६] इति आदेरितः एत्त्वं वा ॥
मेरं । "मिरायाम्" [८७] इति इत एत्त्वम् ॥

५८. महाबिलं कन्दरादिकम् अविद्यमानस्तम एव मूषिको यत्र तत् यथाभूतं कर्तुं कृतप्रतिश्रुति विहितप्रतिज्ञे सूर्ये सति करा अंशवो विजृम्भन्ते ऊर्ध्वाधः प्रसरन्ति । कीदृशाः । लाक्षाहरिद्राविभीतकै रक्ता इव ॥ प्रातःक्षणे दिनकरकराणां क्रमेण तथाभावाद् इत्थम् उत्प्रेक्षा ॥

५९. विरचिता विहिता विष्वग्विसारिप्रभारहितत्वेन हरिद्राकन्दाभा दीपा येन । नवहरिद्रया रक्ता इव करा यस्य स सूरः पूर्वां भजति । अहरिद्रारागो निबिडस्नेहैः कामुक इव । तस्मिन्नप्यागच्छति कान्तया दीपः क्रियते । कुङ्कुमादिना आरक्तकरश्च स भवति । अत्र कामुक इत्युपमानात् पूर्वस्याः कान्तात्वं निरूप्यते ॥

पुहवीइ । पह । मूसयं । पडंसुए । हलद्द । हलद्दि । बहेडय । "पथिपृथिवी°"

१ D °हलिद्दि°. २ D °हलद्द°. ३ BC omit अ°. ४ BC °स्नेहकामुक.

पिक्कङ्गुअं व निवडइ पिक्किङ्गुअ-धूसरो ससी एस ।
सिढिल-करो सढिलङ्को तित्तिर मइल-प्फुड कलङ्को ॥ ६० ॥
इअ आसंसन्ति नि-सीह सिंहदत्ताइणो दिआ तुज्झ ।
वीसं तीसं कप्पे जयसु दुजीहारि-नीसङ्क ॥ ६१ ॥
अदुइअ-रवि-भा-विइए गयणे जह पाइयम्मि दो-वयणं ।
कत्थ वि नत्थि तमो अहि-निवास-लोअम्मि व णुमन्नो ॥६२॥

इत्यादिना [८८] आदेरितः अकारः । हरिद्रायां विकल्प इत्यन्ये । हलिद्दी । अहलिद्दा ॥

६०. शिथिलकरो मन्दकिरणः शिथिलाङ्को मन्दबिम्बः । तित्तिरिर्लावकः । तद्वन्मलिनः स्फुटः कलङ्को यस्य । पक्केङ्गुदवत् परिपाकप्राप्ततापसतरुफलवद् धूसरो धूम्रः एष शशी पक्केङ्गुदवत् निपतति अस्ताचले स्रंसते ॥

पिक्कङ्गुअं पिक्किङ्गुअ । सिढिल सढिल । " शिथिलेङ्गुदे वा " [८९] इति आदेरितः अद् वा ॥

तित्तिर । " तित्तिरौ रः " [९०] इति रस्य इतः अत् ॥

६१. हे नृसिंह नरोत्तम सिंहदत्तादयो द्विजाः तव इति आशंसन्ति आशीर्वादं कुर्वन्ति । तदेवाह । हे द्विजिह्वारिर्गरुडस्तद्वद् निःशङ्क निर्भय त्वं विंशतिं त्रिंशतं कल्पान् जय । कल्पो देवयुगसहस्रद्वयम् ॥

इअ । " इतौ तो वाक्यादौ " [९१] इति इतितस्य इतः अत् ॥

निसीह । वीसं । तीसं । जीहा । " ईर्जिह्वा° " इत्यादिना [९२] जिह्वादिषु इकारस्य तिना ईः । बाहुलकात् क्वचिन्न । सिंहदत्त ॥

नीसङ्क । " लुकि निरः " [९३] इति रलोपे इत ईः ॥

६२. यथा प्राकृते क्वापि द्विवचनं नास्ति । " द्विवचनस्य बहु-

१ B C पिक्कंगुअ.

जरढोच्छु-रुई[1] चन्दो निस-पिअ-पावासुओ व्व नो सहइ ।
सच्च-जहुट्ठिल[2] सूरे भू-सग्ग-दुहाइअ-करोहे ॥ ६३ ॥
धम्मे जहिट्ठिला दोहाइअ-पवहा दुहा वि मल-पटलं[3] ।
ओज्झर-निज्झरिणीसुं[4] ण्हाऊण खिवन्ति वम्हाणो[5] ॥ ६४ ॥

वचनम् " [३. १३०] इति वचनात् । तथा अद्वितीयरविभाद्वितीये निरुपमभास्करप्रभायुक्ते गगने सति तमः क्वापि नास्ति । तिर्यगूर्ध्वादिदेशेषु तद् अपश्यन् कविरेवम् ऊहते । अहीनां सर्पाणां वासे लोके पाताल इव निमग्नं प्रविष्टम् ॥

दुजीहा । णुमन्नो । "द्वित्योरुत्" [९४] इति द्विनिशब्दयोः इत उत् ॥ बाहुलकात् क्वचिद् वा । अदुइअ । विइए ॥ क्वचिन्न । दिआ । निवास ॥ ओत्वम् । दो-वयणम् ॥

६३. हे सत्ययुधिष्ठिर भूस्वर्गयोर्द्विधाकृतः पञ्चशत्या पञ्चशत्या पृथग्विहितः करौघो येन तस्मिन् सूरे सति जरठः परिपक्को य इक्षुस्तद्वद् रुचिर्यस्य स तथाभूतश्चन्द्रो नो राजते । अत उत्प्रेक्ष्यते । निशैव प्रिया ततः प्रवासीव वियुक्त इव । अन्योपि यः प्रियावियुक्तः स विच्छायो भवति ॥

जरढोच्छु । पावासुओ । "प्रवासीक्षौ" [९५] इति आदेरित उत्त्वम् ॥

६४. धर्मे सदाचारे युधिष्ठिराः द्विधाकृतो मध्यप्रवेशेन खण्डितः प्रवाहः ओघो यैस्ते निर्झरनिर्झरिणीषु[6] झरनदीषु स्नात्वा शौचं कृत्वा द्विधापि बाह्याभ्यन्तरभेदेन द्विप्रकारमपि मलपटलं रजःस्तोमं ब्राह्मणाः क्षिपन्ति ॥

जहुट्ठिल जहिट्ठिल । "युधिष्ठिरे वा" [९६] इति आदेरित उत्त्वम् ॥

दुहाइअ दोहाइअ । "ओच्च द्विधाकृगः" [९७] इति इत ओत्वम् उत्त्वं च ॥ क्वचित् केवलस्यापि । दुहा ॥

ओज्झर निज्झर । "वा निर्झरे ना" [९८] इति नेन सह इत ओत्त्वं वा ॥

---

१ BC °रई. २ BC जुहिट्ठिल. ३ D पडलं. ४ B निज्झरणी°. ५ B वम्हाण C तन्हाणा; ६ BC °निर्झरणीषु.

हय-कम्हार-हरडई-चिक्किण-तिमिरस्स गहिय-पाणीया ।
पाणिय-तडम्मि विप्पा अजुण्ण-सूरस्स देन्तग्घं ॥ ६५ ॥
जिण्ण-तमं मल-हीणा अहूण-तेअं विहीण-अन्न-पहं ।
अविहूणं तूह-दिआ थुणन्ति तित्थे रविं तं व ॥ ६६ ॥
पेऊसासण-साभिय-दिस-आमेले रविम्मि उअ तारा ।
केरिस-एरिसिआओ बहेडयाभाओं नह-पेढे ॥ ६७ ॥

६५. हतं विदारितं कश्मीराणां हरीतकीव चिक्कणं निबिडं तिमिरं येन तस्य । अजीर्णो नवः स चासौ सूर्यश्च तस्य पानीयस्य निर्झरनद्यादिसंबन्धिजलस्य यत् तटं तस्मिन् । गृहीतं करपुटे कृतं पानीयं यैस्ते विप्रा अर्घम् अर्घाञ्जलिं ददति त्रिःप्रदक्षिणापूर्वं वितरन्ति ॥

हरडई । " हरीतक्याम् ईतोऽत् " [९९] इति आदेरीतः अत् ॥

कम्हार । " आत् कश्मीरे " [१००] इति ईत आत् ॥

पाणिअ । " पानीयादिष्वित् " [१०१] इति ईत इत् ॥ क्वचिद् वा । पाणीय ॥

६६. जीर्णं ध्वस्तं तमस्तिमिरम् अज्ञानं च येन । अविहीनतेजसम् अन्यूनद्युतिम् उग्रप्रतापं च । विहीनः सन्मार्गप्रदर्शनेन विध्वस्तः अन्यो विपरीतः पन्था मार्गः अन्यायश्च येन । अविहीनम् अत्युच्चं पूर्वाचलचूलासंस्थं सकलभूपालप्रवरं च । तीर्थे आदित्यालये नद्याद्यवतारे वा तीर्थस्य तीर्थभूता वा द्विजा रविं त्वामिव स्तुवन्ति । रविं त्वां च स्तुवन्तीत्यर्थः ॥

अजुण्ण । "उज्जीर्णे" [१०२] इति ईत उत् ॥ क्वचिन्न । जिण्ण ॥

हीण अहूण । विहाण अविहूणं । " ऊ हीनविहीने वा " [१०३] इति ईत ऊत्वं वा ॥

तूह । "तीर्थे हे" [१०४] इति ईत ऊः । हे इति किम् । तित्थे ॥

६७. पीयूषाशना देवास्तेषां स्वामी इन्द्रः तस्य दिक् पूर्वा तस्यां आपीडे शोभाकृत्त्वेन अवतंसे रवौ सति उअ इति पश्य । विभीतक-

१ BC केरिसएरिसआओ. २ D omits त्वामिव...रविं.

चत्तूण नेड-पीढं नीड-घरा मउलिआ मही-मउड ।
विद्दाय-निद्दमुद्धन्ति घरोवरिं रुक्ख-अवरिं च ॥ ६८ ॥
गरुआ वि गुरुअ-भिउडीहिं वार-वालेहि पडिखलिज्जन्ता ।
बहु-पोरिसा वि पुरिसा निरुद्ध-छीआ इहं एन्ति ॥ ६९ ॥

वद् आभा सादृश्यं यासां तास्तारा नभःपीठे कीदृश्य ईदृश्यः । न कीदृश्योपीत्यर्थः ॥

पेऊसा । आमेले । केरिस । एरिसेआओ । बहेडया । " एत् पीयूष° " [१०५] इत्यादिना एषु ईत एत्त्वम् ॥

६८. हे पृथ्वीमुकुट पूर्वं मुकुलिता रात्रौ एकत्र स्थितास्ततो नीड-पीठं कुलायतलं त्यक्त्वा नीडगृहाः पक्षिणो विद्रुतनिद्रं गततन्द्रं यथा भवति एवम् उड्डीयन्ते गृहस्योपरि वृक्षस्योपरि च ॥

पेढे पीढं । नेड नीड । " नीडपीठे वा " [१०६] इति ईत एत्त्वम् ॥

मउलिआ । मउड । " उतो मुकुलादिष्वत् " [१०७] इति एषु आदेरुतः अत्त्वम् ॥ क्वचिद् आत्त्वमपि । विद्दाय ॥

घरोवरिं अवरिं । " वोपरौ " [१०८] इति उतः अत् वा ॥

६९. गुरुकभ्रुकुटिभिर्द्वारपालैः प्रतीहारैः प्रतिस्खल्यमाना निरुध्यमाना गुरुका अपि कुङ्कणादिदेशस्वामिनोपि बहुपौरुषा अपि प्रचुरप्रराक्रमा अपि पुरुषाः मा भूत् अस्मत्स्वामिनः कापि कार्ये अशकुनम् इति निरुद्धक्षुता इह युष्मत्पादपद्मान्तिके आयन्ति आगच्छन्ति ॥

गरुआ गुरुअ । " गुरौ के वा " [१०९] इति स्वार्थिके के आदेरुतः अत् वा ॥

भिउडीहिं । " इर्भ्रुकुटौ " [११०] इति आदेरुतः इः ॥

पोरिसा । पुरिसा । " पुरुषे रोः " [१११] इति रोरुत इत्वम् ॥

छीआ । " ई क्षुते " [११२] इति आदेरुत ई ॥

---

१ B पुरिसा रुद्ध-च्छीआ. २ D ईदृश्योपीत्यर्थः.

मुसल-धर-बाहु-मूसल रइ-सूहव-सुहय तुज्झ मुह-कमलं ।
दट्ठुं ऊसुअ-नयणा पुणो पुणो ऊससन्ति निवा ॥ ७० ॥
अणउच्छन्नोच्छाहो रिउ-दुसहो दूसह-प्पयावेण ।
वोक्कन्त-निद्द-पसरो अह राया ओट्ठिओ सयणा ॥ ७१ ॥
कोऊहल-कुसलेहिं कुऊहलत्थेसु कोउहल्ली वि ।
सण्हाण वि सुण्हयरं परमप्पं थुणिय सव्वण्णुं ॥ ७२ ॥
अमलोव्वीढ-दुअल्लो उव्वूढ-दूऊल-दण्डि-दिन्न-करो ।
सो अत्थाणिं पत्तो दुगुल्ल-उल्लोअ-सोहिल्लं ॥ ७३ ॥

७०. मुसलधरबाहू इव बाहुमुसलौ यस्य तस्य आमन्त्रणम् । तथा रतिसुभगः कन्दर्पः तद्वत्सुभग सकललोकप्रिय हे राजन् तव मुखकमलं दृष्ट्वा उत्सुकानि सोत्कण्ठानि नयनानि येषां ते नृपाः पुनः पुनः उच्छ्वसन्ति भूयोभूयः पुलकिताङ्गा भवन्ति ॥

मुसल मूसल । सूहव सुहय । " ऊत् सुभग० " इत्यादिना [११३] आदेरुत ऊद् वा ॥

७१. अनुच्छिन्नोत्साहः अखण्डितोद्यमः दुःसहप्रतापेन उग्रतेजसा रिपुदुःसहः अथ एवंमङ्गलपाठकपठितानन्तरं व्युत्क्रान्तनिद्राप्रसरो जागरितः सन् राजा शयनाद् उत्थितः ॥

ऊसुअ । ऊससन्ति । " अनुत्साहोत्सन्ने त्सच्छे " [११४] इति आदेरुत ऊत् ॥ अनुत्साहोत्सन्न इति किम् । उच्छन्नोच्छाहो ॥

दुसहो दूसह । "र्लुकि दुरो वा" [११५] इति रलोपे उत उत् वा ॥

वोक्कन्त । ओट्ठिओ । " ओत् संयोगे " [११६] इति संयोगे परे आदेरुत ओत्त्वम् ॥

७२. ७३. अधुना राज्ञः प्रातस्त्यं कृत्यम् आह । युग्मम् । कुतू-

---

१ B is wanting in the commentary on the two couplets from कुतूहलकुशलैः up to करो यस्येति.

तस्स भुमयाइ वसगा अवाउला पेसणिक्क-हणुमन्ता ।
बल-कण्डुअमाण-भुआ पुरो निविट्ठा निवा नमिरा ॥७४॥
पासम्मि ठिआ तस्स य मद्दूअ-गोरीओं महुअ-मद्दुर-गिरा ।
वज्जन्त-कणय-नूउर-मणि-नेउर-वइर-निउराओ ॥ ७५ ॥

हलकुशलैः कौतुकनिपुणैः कृत्वा कुतूहलार्थेषु कुतुकवस्तुषु कुतूहल्यपि सूक्ष्माणां परमाण्वादीनां मध्येपि सूक्ष्मतरं दुर्ज्ञेयत्वाद् अणुतरं सर्वज्ञं लोकालोकपदार्थसार्थपरिज्ञानचतुरं परमात्मानं स्तुत्वा स कुमारपाल-भूपः दुकूलानाम् उल्लोचैः शोभावतीम् आस्थानीं प्राप्तः । किंभूतः सन् । अमलानि उज्ज्वलानि उह्यूढानि परिहितानि दुकूलानि सित-पट्टांशुकानि येन उह्यूढदुकूलेन दण्डिना दत्तो गमनकाले वितीर्णः करो यस्येति ॥

कोऊहल कुऊहल कोउहल्ली । "कुतूहले वा ह्रस्वश्च" [११७] इति उत ओत् वा तत्संनियोगे ह्रस्वश्च वा ॥

सण्हाण । सुण्ह । "अदूतः सूक्ष्मे वा"[११८] इति ऊतः अत् वा ॥ आर्षे सुहुमेति ज्ञेयम् ॥

दुअल्लो दुऊल । " दुकूले वा लश्च द्विः " [११९] इति ऊकारस्य अस्वं वा तत्संनियोगे च लस्य द्विः ॥ [आर्षे] । दुगुल्ल ॥

अमलोव्वीढ उव्वूढ । "ईर्वोद्वयूढे " [१२०] इति ऊत ईत्वं वा ॥

७४. तस्य राज्ञो भुवो वशगाः । भ्रूक्षेपमात्रेण समस्तकार्यसाधका इत्यर्थः । अवातूलाः युक्तकारिणः । प्रेषणे स्वामिनिरोपेणे एके अद्वितीया हनूमन्तः । बलेन कण्डूयमानौ कण्डूलौ । सदर्पावित्यर्थः । तथाभूतौ भुजौ येषां ते नम्रा नृपाः पुरः अग्रे निविष्टाः ।

भुमयाइ अवाउला । हणुमन्ता । कण्डुअमाण । " उर्भ्रूह०" [१२१] इत्यादिना ऊत उत्वम् ॥

७५. चतुर्भिः कलापकम् । चामरदर्पणहस्ता वारयुवत्यस्तस्य राज्ञः

१ BD नविरा. २ BC °पदार्थपरि°. ३ BC शत°. ४ D omits 'ह्रस्वश्च...लस्य द्विः'. ५ D °निरोपे.

कोहण्डि-कुसुम-मउवीओ काम-तोणीर-थोर-कबरीओ ।
निम्मोल्लङ्गय-मण्डिअ-कोप्परया गहिअ-तम्बोला ॥ ७६ ॥
विब्भम-गलोइ-मेघा रम्भा-थोणा-निहोरु-थूणाओ ।
तोणीहविअ सयं चिअ रइ-वइणो तूण-छड्डवणा ॥ ७७ ॥
सरउग्गय-मय-लञ्छण-सरिच्छ-वयणाओ वार-जुवईओ ।
चामर-दप्पण-हत्था अकास-कन्ती किसङ्गीओ ॥ ७८ ॥

पार्श्वे स्थिताः । किंभूताः । मधूकवद् गुडपुष्पवद् गौर्यः गौराङ्ग्यः । मधूकवन्मधुरा मनोज्ञा गीर्यासाम् । वदन्तौ चङ्क्रमणवशात् सिञ्जानौ कनकस्य नूपुरौ मञ्जीरौ मणयः पद्मरागाद्याः तत्खचितौ नूपुरौ वज्राणि हीरकाणि तत्खचितौ च नूपुरौ यासाम् ॥

७६. कूष्माण्डीकुसुमवद् मृद्व्यः कोमलाङ्ग्यः । कामतूणीरवत् तद्वाणानां पुष्पाणां तत्र प्रक्षेपात् स्थूलाः कबर्यः घना वेणयो यासाम् । निर्मूल्याङ्गदमण्डितकूर्पराः अनर्घ्यकेयूरभूषितभुजमध्या गृहीतताम्बूलाः॥

७७. विभ्रमा विलासास्त एव गुडूची अमृता तत्र वृद्धिजनकत्वेन मेघाः । रम्भायाः स्थूणा[1] स्तम्भस्तत्संनिभा ऊरुस्थूणा यासां स्वयमेव तूणीभूय रतिपतेस्तूणमोचनाः ।

७८. शरदुद्गतमृगलाञ्छनसदृक्षवदनाः अकृशा सर्वत्र विस्तृतत्वाद् घना कान्तिर्यासाम् कृशाङ्ग्यस्तनुशरीराः ॥

महूअ महुअ । " मधूके वा " [१२२] इति ऊत उत् वा ।

नेउर निउराओ । "इदेतौ नूपुरे वा"[१२३]इति ऊत इत् एत् वा । पक्षे । नूउर ॥

कोहण्डि । तोणीर । थोर[2] । निम्मोल्ल । कोप्परया । तम्बोला । गलोइ । " ओत् कूष्माण्डी° " इत्यादिना [१२४] एषु ऊत ओत् ॥

---

१ BC स्थूणास्तम्भसंनिभा. २ BC थोरो.

मत्तेभ-मउअ-गमणे तस्सिं माउक्क-आसणासीणे।
माउक्के अमउत्ते वि सुइ-गिराणं फुड-गिरेहिं ॥ ७९ ॥
आसंसिअं दिएहिं किवालु-हिअओ हवेहि महि-वट्ठे।
तुह पिट्ठ-चरा देवा हवन्तु नागा वि पट्ठ-चरा ॥ ८० ॥
अह खग्गि-सिङ्ग-पत्ते मसिणे मसणेण चन्दणेण गहे।
अच्चिअ राय-मयङ्को अकासि तिलयं मिअङ्क-निहं ॥ ८१ ॥

थोणा थूणा। तोणी तूण। "स्थूणातूणे वा" [१२५] इति ऊत ओत् वा। मय। "ऋतोऽत्" [१२६] इति ऋतः अत्त्वम् ॥

७९. युग्मम् ॥ मत्तेभस्येव मृदुकं मन्थरं गमनं यस्य। मृदुकं हंसरूतपूरितत्वेन कोमलं यद् आसनं गष्टिकादि तस्मिन्नासीने उपविष्टे सति तस्मिन् राज्ञि श्रुतिगिरां वेदवाक्यानां मृदुत्वे अमृदुत्वेपि स्फुटगीर्भिः। वेदवाक्येषु यथास्थानम् उदात्तादिस्वरन्यासेन व्यक्तवाग्भिरित्यर्थः ॥

८०. द्विजैः इति आशंसितम् आशीर्वादः कृतः। तदेवाह। कृपालुहृदयो महीपीठे त्वं भव। तथा तव पृष्ठचराः पश्चाद्यायिनो देवाः पृष्ठचरा नागा अपि भवन्तु। तव क्षुद्रोपद्रवव्रातविकर्तनं सुरफणिपत्यादयः कुर्वन्त्वित्यर्थः। इतीत्यध्याहार्यम् ॥

अकास किसङ्गीओ। मउअ माउक्क। माउक्के अमउत्ते। "आत् कृशा०" इत्यादिना [१२७] एषु ऋत आत् वा।

किवालु। हिअओ। "इत् कृपादौ" [१२८] इति आदेः ऋत इत्त्वम् ॥

पिट्ठ पट्ठ। "पृष्ठ वानुत्तरपदे" [१२९] इति ऋत इत् वा ॥ अनुत्तरपदे इति किम्। महि-वट्ठ ॥

८१. अथ द्विजाशीर्वादानन्तरं मसृणे श्लक्ष्णे खड्गिनो गण्डकस्य शृङ्गं विषाणं तस्य पात्रे भाजने यच्चन्दनं तेन मसृणेन ग्रहान्

मिच्चु-अवमच्चु-हरणे दिजे विसज्जिअ निसामिआ तेण ।
रिउ-सङ्ग-भञ्जणेणं धिट्ठाधट्ठाण विन्नत्ती ॥ ८२ ॥
पुहवीस-उउ-वसन्तो निवुत्त[1]-तिलय-क्खणो कलि-निअत्तो ।
वन्दारय-वुन्दारय-समो पयट्टो तिहिं[2] सोउं ॥ ८३ ॥

अर्चयित्वा राजैव सौम्याह्लादकत्वादिगुणोपेतत्वाद् मृगाङ्कः मृगाङ्कनिभं वृत्तत्वशुक्लत्वाभ्यां चन्द्रतुल्यं तिलकम् अकार्षीत् ॥

८२. मृत्युः आयुषः परिसमाप्तौ मरणम् अपमृत्युः अकालमरणम् । तयोर्हरणान् विध्वंसकान् द्विजान् विसृज्य संमाननापूर्वं प्रेष्य रिपूणां शृङ्गस्य उत्कर्षस्य भञ्जकेन विनाशकेन [तेन राज्ञा] धृष्टा[3]धृष्टानां प्रगल्भाप्रगल्भानां विज्ञप्तयो निशामिताः परिभाविताः ॥

सिङ्ग सङ्ग । मसिणे मसणेण । मयङ्को मिअङ्क । मिच्चु मच्चु । धिट्ठाधट्ठाण । "मसृणमृगाङ्कमृत्युशृङ्गधृष्टे वा" [१३०] इति एषु ऋत इत् वा ।

८३. निवृत्तः समाप्तस्तिलकस्य मन्त्राभिमन्त्रितविशेषकस्य क्षणः अवसरः उत्सवो वा यस्य । निवृत्तः समग्रसचराचरलोकाभयप्रदानविधानाद् गतः कलिः कलियुगं यस्मात् । वृन्दारका देवास्तेषु योगक्षेमवाहित्वाद् वृन्दारकः श्रेष्ठः । इन्द्र इत्यर्थः । तेन समः सदृक्षः । पृथ्वीश एव निखिलभूमण्डलमोदकत्वाद् ऋतुवसन्तः तिथिं श्रोतुं प्रवृत्तः । वसन्तर्तुरपि निवृ[4]त्तः संजातस्तिलकानां तिलककुसुमानां क्षणः अवसरो यत्र । निवृत्तः कामवशे[5]वर्तित्वेन उपरतः कलिः कामिकलहो यत्र । वृन्दारकेषु निरतिशयरूपोपेतत्वेन वृन्दारको मनोहरः । कन्दर्प इत्यर्थः । तेन समः तादृक्प्रकारः विकारकारित्वात् मित्रं च मित्रेण समं भवतीति ॥ कलि-निअत्तो इत्यत्र प्राकृतत्वाद् निअत्तो इत्यस्य परनिपातः । यथा

"भूअङ्कुरावयंसं छणपसर-महग्घ-मण-हर-सुरामोअं ।
अपणामिअं पि गहिअं कुसुमसरेण महु-मास-लच्छीए मुहं ॥"

इत्यत्र महग्घेत्यस्य परनिपातः ॥

---

१ BCD निअत्त...°निवुत्तो. २ B तिहं. ३ D धृष्टानां प्रगल्भानाम्. ४ C निर्वृत्तः. ५ D कामवर्तित्वेन.

निव-उसहो दिय-वसहे पिउ-कम-माउ-हर-आगए तत्तो।
दाणेण तप्पिऊणं संपत्तो माइ-हरयम्मि ॥ ८४ ॥
माईण अमोसासीसयाण राया अमूस-परिवारो।
अमुसा-वाई वुट्ठो धण-वुट्ठी-रयण-विट्ठीहिं ॥ ८५ ॥
विट्ठ-घण निम्मलेणं देवाणं पिहय पुहय देवीणं।
तेणादिट्ठं गीअं मुईङ्गि-कर-ताडिय-मिइङ्गं ॥ ८६ ॥

उउ। उदत्वादौ [१३१] इति आदेर्ऋतः उत् ॥

निअत्तो निवुत्त। वन्दारय वुन्दारय। "निवृत्तवृन्दारके वा" [१३२] इति ऋत उत्त्वं [वा] ॥

८४. ततः तिथिश्रवणानन्तरं पितृक्रमात् पितृवंशात् मातृगृहात् मातृवंशाच्च आगतान् द्विजवृषभान् प्रधानब्राह्मणान् दानेन तर्पयित्वा संतोष्य नृपवृषभो मातृगृहे संप्राप्तः ॥ वृषभशब्दस्य उत्तरपदस्थस्य[1] प्रधानार्थाभिधायित्वम्। यद् अमरः।

स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥

उसहो वसहे। " वृषभे वा वा" [१३३] इति वेन सह ऋत उत् वा ॥

पिउ-कम। माउ-हर। "गौणान्त्यस्य" [१३४] [इति] गौणपदस्य योन्त्य ऋत् तस्य उत्।

८५. न विद्यते मृषा कूटभाषणं यस्य स परिवारो यस्य। अमृषावादी राजा अमृषा सत्या आशिषः प्रणामे कृते चिरं जीवेत्याद्याशीर्वचनानि यासां तास्तथा ताभ्यो [मातृभ्यः] धनवृष्टिरत्नवृष्टिभिर्वृष्टो वर्षति स्म। ताभ्यो धनं रत्नानि [च] ददावित्यर्थः ॥

माउ-हर माइ-हर। "मातुरिद्वा" [१३५] इति मातुर्गौणस्य ऋत इत् वा। क्वचिद् अगौणस्यापि। माईण ॥

अमोसा अमूस अमुसा। "उदूदोन्मृषि"[१३६]इति ऋत उत् ऊत् ओत् ॥

८६. देवानाम्। अग्रत इति शेषः। पृथक् असांकर्येण देवीनां

---

१ BCD मुअंगिकरताडियमिअंगं. २ BC °पदस्थस्याग्र°.

कुल-जरईणं नत्तिअ-नत्तुअ-सहिआण सो वसु अदासि ।
धरणि-बिहप्फइ-सीसो बुहप्फइ-सरिच्छ-गुरु-पुरओ ॥ ८७ ॥
सो कुसुम-विण्ट-तिक्ख-प्पण्णाइ बहप्फइ व्व लच्छीए ।
काही पूअं सह-वेण्ट-फलेहिँ स-वोण्ट-फुल्लेहिं ॥ ८८ ॥
रिद्धि-हय-अणत्त-रिणो राय-रिसी धणुह-वेअ-राम-इसी ।
रिज्जू सहुज्जुएहिं नर-उसहेहि चलिओ निवइ-रिसहो ॥८९॥

पृथग् वृष्टो मुक्तजलो यो घनस्तद्वन्निर्मलेन गतकलुषेण तेन राज्ञा गीतम् आदिष्टं कारितम् । कीदृशम् । मृदङ्गिकरैः मार्दङ्गिकहस्तैस्ताडिता आहता मृदङ्गा यत्र तत् तथाभूतम् ॥

८७. कुले जरत्यो वृद्धस्त्रियः ताभ्यः । नप्तृकैर्युक्ता नप्तृकाः ताभिः सहितास्ताभ्यः पौत्रपौत्रीयुक्ताभ्यो धरण्यां बृहस्पतेः शिष्य उद्धवः तद्वत् । हेयोपादेयविचारचतुरत्वात् । स राजा बृहस्पतेः सदृक्षः अद्भुतविशदप्रज्ञर्द्धियुक्तत्वेन समो यो गुरुः पुरोहितस्तस्य पुरतो वसु द्रव्यम् अदात् ॥

वुट्ठो विट्ठ । वुट्ठी विट्ठीहिं । पिहय पुहय । मुइङ्ग मिइङ्ग । नत्तिअ नत्तुअ । " इदुतौ वृष्ट० " इत्यादिना [१३७] एषु ऋतः इकारोकारौ ॥

८८. कुसुमवृन्तवत् तीक्ष्णा या प्रज्ञा तया नूनं बृहस्पतिः स राजा लक्ष्म्या सवृन्तफलैः सवृन्तपुष्पैश्च पूजाम् अकार्षीत् ॥

बिहप्फइ बुहप्फइ । "वा बृहस्पतौ" [१३८] इति ऋत इदुतौ वा । पक्षे बहप्फइ ॥

विण्ट वेण्ट वोण्ट । इदेदोद्वृन्ते" [१३९] इति ऋत इत् एत् ओच ॥

८९. ऋद्धया हतं स्वधनेन निवर्तितम् ऋणेन ऋताः पीडितास्तेषाम् ऋणं येन । राजैव जीवरक्षाविधायित्वेन ऋषिः । धनुर्वेदे धनुःकलाप्रतिपादकशास्त्रे रामर्षिः परशुरामः । ऋजुः अकुटिल ऋजुभि-

---

१ D धरिण्यां. २ BCD मुअंग मिअंग.

सो वसन्त-रिउ-सरि-विलासओ तह य गिम्ह-उउ-सरिस-लीलओ ।
महुर-तिव्व-तेआसरिच्छओ सम-हरं दरिअ-आढिअं गओ ॥९०॥

नरऋषभैः सह नृपतिऋषभश्चलितः गुणनिकां कर्तुं प्रस्थितः ॥ रिपुच्छन्दा छन्दः ॥

रिद्धि । " रिः केवलस्य" [१४०] इति व्यञ्जनेन असंपृक्तस्य ऋतो रिः ॥

९०. मधुरं सदाचारिप्रमोदकत्वेन प्रियं तीव्रं शत्रुसंतापकत्वेन प्रचण्डं यत् तेजो माहात्म्यं तेन असदृक्षः निरुपमः । अत एव वसन्तर्तुसदृक्षः विलासो विलसितं यस्य । तथा ग्रीष्मर्तुसदृक्षा लीला केलिर्यस्य च । मित्रामित्रेषु शान्ततीव्रवृत्तिरित्यर्थः । स राजा दृप्तादृतं बलिष्ठभटवृतं श्रमगृहं गुणनिकास्थानं गत इति उत्तरसर्गार्थसूचनम् ॥ पञ्चिमान्तिका छन्दः । वदनकं वा ॥

अण रिणो । रिसी राम-इसी । रिज्जू सहुज्जुएहिं । उसहेहि रिसहो । रिउ उउ । " ऋणर्ज्वृषभर्त्वृषौ वा " [१४१] इति ऋतो रिर्वा ॥

सरि । सरिस । सरिच्छ । " दृशेः किप्टक्सकः " । [१४२] किप् टक् सक् इत्येतदन्तस्य दृशो धातोः ऋतो रिरादेशः ।

आढिअं । " आदृते ढिः " [१४३] इति ऋतो ढिः ॥

दरिअ । " अरिर्दृप्ते " [१४४] इति ऋतः अरिः ॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रयमहाकाव्यवृत्तौ प्रथमः सर्गः समाप्तः ॥

द्वितीयः सर्गः

पङ्कय-केसर-कन्ती अकिलिन्नो हरि-चवेल-चविलो सो ।
स-किसर-किलित्त-दामो निवो पयट्टो समं काउं ॥ १ ॥
गुरु-मण-थेणो रेवइ-देअर-सीअ-दिअराण बल-थूणो ।
काही विअणं सो सयमवेअणो मल्ल-सेलाण ॥ २ ॥

१. त्रिक षट्क द्विक चतुष्क द्विक एक एक एक इत्येवं विंशत्या गाथाभिर्यथासंख्यं राज्ञो मल्लश्रमं धनुःश्रमम् असिश्रमं शक्तिश्रमं चक्रश्रमं सेल्लश्रमं परशुश्रमं शूलसीरश्रमम् आह ॥ पङ्कजकेसरः कमलकिञ्जल्कस्तद्वत् कान्तिः शरीरच्छविर्यस्य । स्वर्णवर्ण इत्यर्थः । अक्लिन्नः घर्मरहितः । हरिचपेटावत् सिंहतलप्रहारवत् चपेटा यस्य सकेसरं क्लप्तं कण्ठकन्दले स्थापितं दाम पुष्पमाला यस्य स नृपः श्रमं मल्लकलाभ्यासं कर्तुं प्रवृत्त इति ॥

अकिलिन्नो । किलित्त । "लत इलिः क्लप्तक्लिन्ने" [१५४]इति लत इलिः॥

२. गुरोः कलाचार्यस्य मनःस्तेनः निरवधिकलाकौशलकरणेन चित्तहारकः । बलस्य सामर्थ्यस्य स्तेनश्चोरः । कयोः । रेवती रामप्रिया तस्या देवरः कृष्णः स च सीताया जानक्या देवरो लक्ष्मणश्च तयोः । तद्वत्पराक्रमवान् इत्यर्थः । स राजा स्वयम् अवेदनः मल्ला एव उच्चत्वाद् दृढत्वाच्च शैलास्तेषां वेदनां संतापम् अकार्षीत् ॥

केसर किसर । चवेल चविलो । देअर दिअराण । विअणं वेअणो । "एत इद्वा°" [१४६] इति एत इत् वा ॥

थेणो थूणो । "ऊः स्तेने वा" [१४७] इति एत ऊत् वा ॥
सेलाण । "ऐत एत्" [१४८] इति आद्यैकारस्य एत् ॥

तस्स सणिच्छर-पिउणो व्व कर-हयं सिन्धवं व मल्ल-कुलं ।
घम्म-जलोल्लं जायं स-सिन्न-पर-सेन्न-महिअं पि ॥ ३ ॥
मुर-वेरिओ व्व रक्खिअ-दइच्च-कयं[1]-वइर-दइवय-सइन्नो ।
गेण्हीअ स तत्थ धणु कइलास-सओ व्व केलासे ॥ ४ ॥
देव्वालक्खो दइवे वि असङ्को महि-अले नव-दइव्वं ।
उच्चअ-नीचअ-लक्खे अणचुक्को अवर-धीर-हरो ॥ ५ ॥

३. तस्य राज्ञः शनैश्चरपिता रविस्तस्येव कराहतं हस्तताडितं किरणतापितं च सत् स्वसैन्यपरसैन्ययोर्महितं परा[2]क्रमवत्त्वेन श्लाघितमपि मल्लकुलं सैन्धवमिव लवणवद् घर्मजलार्द्रं क्षरत्स्वेदबिन्दु जातम् । अपिर्विस्मये ॥

सणिच्छर । सिन्धव । "इत् सैन्धवशनैश्चरे" [१४९] इति ऐत इत्त्वम् ॥
सिन्न सेन्न । "सैन्ये वा" [१५०] इति ऐत इत् वा ॥

४. मुरवैरीव नारायण इव रक्षितं दैत्यकृतवैरं दैवतसैन्यं येन [स इव] तत्र श्रमगृहे स राजा धनुरग्रहीत् । किंवत् । यथा कैलासे कैलासशयो हर इति ॥

दइच्च । दइवय । सइन्नो । "अइर्दैत्यादौ च" [१५१] इति सैन्ये दैत्यादिषु च ऐतः अइः ॥

वेरि वइर । कइलास केलासे । "वैरादौ वा" [१५२] इति ऐतः अइर्वा ॥

५. युग्मम् । स राजा शरान् वृष्टो वर्षति स्म । किंभूतः । शरग्रहसंधानादि कुर्वन् दैववद् अलक्ष्यः फलानुमेयप्रारम्भत्वात् । दैवेपि अशङ्कः लोकोत्तरधैर्यधारित्वाद् निर्भयः महीतले नवः साक्षाच्छिष्टप्रतिपालकत्वेन दुष्टनिग्रहेण च अपूर्वो दैवः । उच्चैर्नीचैश्च लक्ष्ये वेध्ये अभ्रष्टः सम्यक्कलाचातुरीचुञ्चुत्वाद्[3] अस्खलितः । अपरस्य विपक्षस्य धैर्यहरः ॥

---

१ BC °कइ. २ BC पराक्रमित्वेन. ३ BC °चञ्चु°.

अन्नन्नं जोहेहिं सलाहिओ तह बुहेहि अन्नोन्नं ।
मण-हर-सरलिअकुञ्चिअ-उहय-पवट्ठो सरे वुट्ठो ॥ ६ ॥
कण्णो वलिअ-मणोहर-पउट्ठ-कर-सररुहेण नर-वइणो ।
लम्बिर-नाल-सरोरुहवतंसिओ व्वासि संधाणे ॥ ७ ॥
कय-दुज्जण-सिर-विअणं सिर-कुसुमाहरणमणसिरो-विअणं[1] ।
आवज्जिअ-वाइअ-आउज्जस्सादिट्ठ-पुड-दलणं ॥ ८ ॥
सूसास-वलिअ-चिबुओ अकासि सो गउअपुच्छ पमुहेहिं ।
गाअङ्क-कोञ्चरिउ-सुन्देरं पत्तो धणुह-सुण्डो ॥ ९ ॥

६. अन्योन्यं योधैस्तथा बुधैश्च श्लाघितः प्रशंसितः । मनोहरसरलितः सरलः कृतः आकुञ्चितः कुटिलः कृतः उभयप्रकोष्ठः कलाचिको येन तथाविधः । स इति राजवाचकम् अनुक्तमपि प्रक्रमाज्ज्ञेयम् ॥

दव्वा दइवे दइव्वं । "एच्च दैवे" [१५३] इति ऐत एत् अइश्चादेशः ॥
उच्चअ । नीचअ । "उच्चैर्नीचैस्यअः" [१५४] इति ऐतः अअः ॥
धीर । " ईद्धैर्ये" [१५५] इति ऐत ईत् ॥

७. संधाने शरासनशरारोपे वलितः आकर्णाकर्षणे पश्चाद्गतो मनोहरप्रकोष्ठो यः करः स एव सरोरुहं तेन कृत्वा । उत्प्रेक्ष्यते । लम्बमाननालं यत् सरोरुहं तेन अवतंसितः शेखरितो नरपतेः कर्ण आस्ते ॥

८. युग्मम् । कृता दुर्जनानां शिरोवेदना संतापो यत्र । शिरसि कुसुमान्येव अलंकारो यत्र । शेषालंकारान् मुक्त्वेत्यर्थः । अशिरोवेदनं यथा भवति एवं राजा आतोद्यिकैर्वादितं यद् आतोद्यं मृदङ्गपटहादिकं तस्य अदृष्टपुटं[2] दलनं च गोपुच्छप्रमुखैः शरविशेषैरकार्षीत् ॥

९. किंभूतः । सोच्छ्वासं वलितं तिर्यग् नामितं चिबुकम् अधराधः-

---

१ C °वयणं. २ B °वअणं. ३ D मनोहरः सर° ४ BC ° पुटदलनं.

अह कुच्छेअय-हत्थो कोच्छेअय-कउसलेण सो दिट्ठो ।
कोवेस कउच्छेअय-सिद्धो त्ति असेस-पउरेहिं ॥ १० ॥
अब्भास-गारवेणं गोविअ-सव्वङ्ग-गउरवो फलए ।
नावाकारे तेरह-तेतीस-गुणो व्व सो आसि ॥ ११ ॥

प्रदेशो येन । धनुषि प्रसक्तः शौण्डः धनुःशौण्डः । सप्तमी शौण्डाद्यैरिति समासः[1] । धनुःकलाकुशल इत्यर्थः । अत एव गवाङ्कक्रौञ्चरिष्वोर्हरभार्गवयोः सौन्दर्यं सौभाग्यं प्राप्तः प्राप्नोति स्मेति ॥

अन्नन्नं अन्नोन्नं । मणहर मणोहर । पवट्ठो पउट्ठ । सररुहेण सरोरुह । सिर-विअणं सिरो-विअणं । आवज्जिअ आउज्जस्स । "ओतोऽद् वान्योन्य°" इत्यादिना [१५६] एषु ओतः अत्वं वा तत्संनियोगे च यथासंभवं कतयोर्वादेशः ॥

सूसास । "ऊत् सोच्छ्वासे" [१५७] इति ओत ऊत् ॥

गउअ गाअङ्क । "गव्यउआअम्" [१५८] इति ओतः अउ आअश्च ॥

कोञ्च । "औत ओत्" [१५९] इति आद्यौतः ओत् ॥

सुन्देरं । सुण्डो । "उत् सौन्दर्यादौ" [१६०] इति औत उत् ॥

१०. अथ अदृष्टपुटव्यधनानन्तरं कौक्षेयककौशलेन हेतुना कोपि लोकोत्तरः कश्चिदप्येषः कौक्षेयकसिद्धः खड्गविद्यासिद्ध इत्यशेषपौरैः निखिलनागरैः कौक्षेयकहस्तः सन् स राजा दृष्टः ॥

कुच्छेअय कोच्छेअय । "कौक्षेयके वा" [१६१] इति औत उर्वा ॥

कउसलेण । कउच्छेअय । पउरेहिं । "अउः पौरादौ च" [१६२] इति औतः अउः ॥

११. नावाकारे फलके अभ्यासगौरवेण शिक्षामहत्त्वेन गोपितसर्वाङ्गगौरवस्तिरोहितसमस्तगात्रगुरुत्वोपि स राजा आसीत् त्रयोदशत्रयस्त्रिंशद्गुण इव । स तदा अनेकभटप्रहारदानाद् अनेकस्तैर्ज्ञात इत्यर्थः । अपिः विरोधार्थोत्र द्रष्टव्यः । यः किल तिरोहितगात्रः स एकोपि

---

[1] BCD सः for समासः.

घडिआ अथेर-एक्कारएहि बहुएहिँ दुव्वहा सत्ती ।
वेइल्ल-केल-कन्नेरयं व भामिय भुवि निहित्ता ॥ १२ ॥
विअइल्ल-कण्णिआरय-कयलेहिं ऐ-अइ त्ति भणिरेहिं ।
जोहेहि बोर-पोप्फल-पोरं-मन्नेहिँ सा महिआ ॥ १३ ॥
नोमालिअ-नोहलिआ-सोमालाहिं सलोप-मोहाहिं ।
तस्सोब्भमिअं लवणं सुकुमाल-मऊह-मालिस्स ॥ १४ ॥

न लक्ष्यते कथं पुनस्त्रयोदशगुणस्त्रयस्त्रिंशद्गुणो वेति विरोधः । परिहारस्तु उक्त एव ॥

गारवेणं गउरवो । " आच्च गौरवे " [१६३] इति औत आत्वम् अउश्च॥

नावा । " नाव्यावः " [१६४] इति औत आवादेशः ॥

तेरह । तेतीस । " एत् त्रयोदशादौ° " इत्यादिना [१६५] त्रयोदशन् इत्येवंप्रकारेषु संख्याशब्देषु आदेः स्वरस्य सस्वरेण व्यञ्जनेन सह एत् ॥

१२. बहुभिः अस्थविरायस्कारैः दुर्वहा शक्तिः आयुधविशेषो घटिता निर्मापिता विचकिलकदलकर्णिकारमिव भ्रमयित्वा उपरि समन्ताच्चालयित्वा तेन राज्ञा भुवि निक्षिप्ता । तेनेति अत्र ज्ञेयम् ॥

१३. अयि अयि भो भो इति भणितृभिः ब्रुवाणैः बदरपूगफलपूतरवद् आत्मानं मन्यन्ते ये ते तथा । तैर्योधैः विचकिलकर्णिकारकदलैः पुष्पफलैः सा शक्तिः महिता अर्चिता ॥

अथेर । एक्कार । वेइल्ल । "स्थविरविचकिलायस्कारे" [१६६] इति पूर्ववद् एद्वा । विअइल्ल इत्याद्यपि दृश्यते ॥

केल कयलेहिं । " वा कदले " [१६७] इति पूर्ववद् एत् वा ॥

कन्नेरयं कण्णिआरय । "वेतः कर्णिकारे" [१६८] इति पूर्ववद् एत् वा ॥

ऐ-अइ । "अयौ वैत् " [१६९] इति पूर्ववद् ऐत् वा ॥

१४. नवमालिका यूथिका नवफलिका नूतनम् अल्पं फलं

चोद्दह-मणु-चोग्गुणओ भुवण-चउद्दहय-वइ-चउग्गुणओ।
चोत्थे वि जुगे ति-पुरिस-चउत्थओ लक्खिओ स तया॥१५॥
सागोक्खल-खइरोहल-लोहोऊखल-सिला-उलूखलया।
चक्केण तेण दलिआ चोव्वारं पुण चउव्वारं॥ १६॥
इअ रइअ-कोउहल्लो कोहल-दक्खेहिँ तक्किओ राया।
उअ कण्हो एस इहं भरहेसर-चक्कवट्टी ओ॥ १७॥

[यस्याः सा] तद्वत्सुकुमाराभिः सलवणा लावण्ययुक्ता मयूखाः कान्तयो यासां ताभिः स्त्रीभिः सुकुमारमयूखमालिनः दर्शनीयद्युतिधारिणस्तस्य राज्ञः लवणम् उद्भमितम् उत्तारितम्। विशेषणान्यथानुपपत्या अत्र स्त्रीभिरिति ज्ञेयम्॥

बोर। पोप्फल। पोरं। नोमालिअ। नोहलिआ। "ओत् पूतर°" इत्यादिना [१७०] पूर्ववद् ओत्।

१५. चतुर्दशानां मनूनां स्वायंभुवाद्यृषीणां समाहारश्चतुर्दशमनु। तस्माच्चतुर्गुणः। सर्वजनहितत्वेन अधिक इति भावः। भुर्भुवःस्वर्महर्जनस्तपः सत्येति सप्त। तान्येव सप्तभिर्वायुस्कन्धैः सह चतुर्दश भुवनानि। तेषां चतुर्दशकम्। तस्य पतिर्विष्णुः तस्माच्चतुर्गुणः। चतुर्थेपि युगे कलावपि त्रिपुरुषस्य ब्रह्मविष्णुमहेश्वररूपस्य सकललोकमहनीयत्वेन चतुर्थः स राजा तदा लवणोत्तारणक्षणे लक्षितः।

१६. शाकस्य उलूखलश्च खदिरस्य उलूखलश्च लोहस्य उलूखलश्च शिलाया उलूखलश्च ते तथा तेन राज्ञा चक्रेण आयुधविशेषेण दलिताः। कथम्। चत्वारो वारा यत्र दलने तत् तथा। पुनश्चतुर्वारं च। ते तेन भूयो भूयो भग्ना इति भावः॥

१७. इति धनुःखड्गशक्तिचक्रादिकलाकौशलप्रकारेण रचितकुतूहलो राजा कुतूहले कौतुकहेतुकर्मणि धनुःकलादौ दक्षैः प्रवीणैस्तार्कितः पर्यालोचितः। कथम्। इह पृथ्व्याम् उत किं कृष्णः उत अथवा भरतेश्वरचक्रवर्तीति॥

---

१ D उदूखलश्च. २ D उदूखलश्च.

ओआरे अवयार-क्खमेण तेणावसद्द-रहिएण ।
सेल्ल-कला-अवयासे भग्गो जोहाण ओआसो ॥ १८ ॥
पन्नास-पलोऽवगओ किं जलणो उअ रवि त्ति तस्स करे ।
उवहसिअ-परसुरामस्सूहसिअ-पवी महा-परसू ॥ १९ ॥

सोमालाहिं सुकुमाल । सलोण लवणं । मोहाहिं मऊह । चोद्दह चउद्दह्य । चोग्गुण चउग्गुणओ । चोत्थे चउत्थओ । सागोक्खल खइरोहल लोहोऊखल उलूखलया । चोव्वारं चउव्वारं । कोउहल्लो कोहल । "न वा मयूख०" इत्यादिना [१७१] पूर्ववद् ओत् वा ॥

१८. अपकारे अपकारक्षमेण । सापराधे शिक्षाकरणसमर्थेनेत्यर्थः । अपशब्देन अयशसा रहितेन । क्वचिदपि स्खलिताभावात् । तेन राज्ञा । सेल्लेति देश्यः प्रासवाची । तस्य कलावकाशे योधानाम् अवकाशः स्फूर्तिः भग्नः । प्रासेन वेध्यव्यधनम् अस्य विलोक्य तथाविधकला-विकलत्वेन सभोपहासपात्रं स्वं तर्कयन्तो भटा न प्रासं करेपि चक्रुरित्यर्थः ॥

१९. पञ्चाशत् पलानि मानम् अस्य स्यात् । °मात्रडिति संशये मात्रट् । द्विगोः संशये चेति तस्य लुप् । उपहसितः दीप्तितैक्ष्ण्याभ्यां तिरस्कृतः पविर्वज्रं येन स महापरशुः उपहसितस्तथाविधप्रहरणाङ्गीकारेण अनुकृतः परशुरामो येन स तथा तस्य राज्ञः करे गतः सन् ऊह्यते किं ज्वलनः उत रविरिति अवगतः ॥

उअ ओ । ओआरे अवयार । अवयासे ओआसो । "अवापोते" [१७२] इति पूर्ववद् ओत् वा ॥ क्वचिन्न । अवसद्द । अवगओ । उअ रवि ॥

उवहसिअ रामस्सूहसिअ रामस्सोहसिअ । "ऊचोपे" [१७३.] इति पूर्ववद् ऊत् ओच वा ॥

---

१ BC °स्सोह°. The author means that we should read ° रामस्सोहसिअ (=° रामस्स ओहसिअ°) as well as ° रामस्सूहसिअ ° (=°रामस्स ऊहसिअ.)

सूल-कलाइ णुमण्णो सीर-णिसण्णो अ कित्ति-पङ्गुरणो ।
सो किच्ची-पाउरणं सिइ-पावरणं च अणुकाही ॥ २० ॥
अह राय-वाडिअत्थं नाओ आणाइओ रिउ-घरट्टो ।
पुहइ-सईसेणागरु-सुरहि-मओ सुकुसुम-सुतारो ॥ २१ ॥
सचमर-कण्णो विदुरो गय-पावो देव-दुज्जओ विजणे ।
सो धरिओ पर-वारण-कवलण-नैत्तंचर-चरित्तो ॥ २२ ॥
बालक्क-मुहो सुहकर-गज्जी सुहयर-गई अ इअ थुणिओ ।
जग-आगमिओ बहुतर-आआमिअ-कलेहिं बहुअरयं ॥ २३ ॥

२०. कीर्तिस्त्रिजगतीश्लाघा प्रावरणं यस्य [स] राजा शूलकलायां निपण्णो व्याप्तः । सीरे हलरूपायुधे निषण्णश्च कृत्तिप्रावरणम् ईश्वरं शितिप्रावरणं बलभद्रं [च] अन्वकार्षीत् अनुकृतवान् ॥

णुमण्णो णिसण्णो । " उमो निषण्णे " [१७४] इति पूर्ववद् उमादेशो वा ॥ पङ्गुरणो पाउरणं पावरणं । " प्रावरणेऽङ्ग्वाऊ " [१७५] इति पूर्ववद् अङ्गु आउ इत्येतौ आदेशौ वा ॥

२१. अथ शस्त्राभ्यासानन्तरं रिपुषु उपमर्दकत्वेन घरट्टः अगरुरिव सुरभिर्मदो दानजलं यस्य सुकुसुमा सुतारा शोभन आभरणविशेषो यस्य स तथाविधो नागः कुञ्जरो राजपाटिकार्थं चतुरङ्गसैन्यश्रमकरणाय बहिर्गन्तुं पृथिवीशचीशेन पृथिवीन्द्रेण आनायितः ॥

२२. अधुना गाथादशकेन तद्वर्णनम् आह । सचमरौ समीपप्रेङ्खत्प्रकीर्णकौ कर्णौ यस्य विदुरः हस्तिपकाभिप्रेतकृत्यकरणाद् विचक्षणः गतं भद्रजातीयत्वेन नष्टं पापं कुचेष्टा यस्य देवदुर्जयः सुरैरपि दुरभिभवः । परेषां शत्रूणां परे अन्ये वा पराः प्रकृष्टा वा वारणास्तेषां कवलने ग्रसने नक्तंचरचरित्रः अत एव स गजो विजने एकान्ते धृतः॥

२३. बालार्क इव अरुणत्वाद् मुखं यस्य सुखकरा शुभकरा वा

---

१ BCD नक्क°.

जलयर-अजलचर-वई जस्स य इन्धं रुसा-पिसाजी सो ।
सुहदेसु वि सुहओ जइ एरिसओ सो उण सुरेहो ॥ २४ ॥
अमुगो कर-आउण्टण-रम्मो चाउँण्ड-काउँए तुट्ठे ।
लब्भइ अणिउँत्तय[1]-सुरहि-जउँण-जल-बहुल-मय-वट्टो ॥२५॥

गर्जिर्बृंहितं यस्य शुभे करगर्जी यस्येति वा शुभतरगतिः जगता आगमितो ज्ञातश्च स गजः इति वक्ष्यमाणप्रकारेण बहुतरा आगमिता ज्ञाता कला यैः पुरुषैस्तैर्बहुतरकम् अतिशयेन स्तुतः श्लाघितः । स इति प्रक्रमात् ज्ञेयम् ॥

२४. जलचराजलचरयोः । हस्तिनोरिति गम्यम् । उत्कृष्टत्वेन पतिः यस्य चिह्नं रुषापिशाची । कोपेन चण्डाल इत्यर्थः । शुभदेष्वपि राज्यसमृद्धिकृत्त्वेन शुभदः स गजः ॥ अथवा अलं बहुनोक्तेन । यदि पुनरीदृशः एतत्समः स त्रिभुवनप्रसिद्धः सुरेभ ऐरावणः । यदीति संभावने ॥

२५. अमुकोयं गजः करस्य शुण्डादण्डस्य आकुञ्चनं मण्डलीकरणं तेन रम्यः । अतिमुक्तकानीव माधवीलताकुसुमानीव सुरभिः यमुनाजलवद् बहुलः शितिः मदपट्टो दानप्रवाहो यस्य स तथा । चामुण्डाकामुके चन्द्रशेखरे तुष्टे परितोषं गते लभ्यते प्राप्यते ।

" स्वराद् असंयुक्तस्यानादेः [१७६] । अधिकारोयम् । यद् इत उर्ध्वम् अनुक्रमिष्यामः तत् स्वरात्परस्य असंयुक्तस्य अनादेर्भवतीति वेदितव्यम् ॥

राय-वाडिअत्थं । नाओ । आणाइओ । रिउ । पुहइ-सईसेण । मओ । "कग-चजतदपयवां प्रायो लुक् " [१७७] इति कादीनां लुक् ॥ प्रायोग्रहणात् क्वचिन्न॥ अगरु । सुकुसुम-सुतारो । समचर । विदुरो । गय-पावो । देव । विजणे ॥ स्वराद् इत्येव । नत्तंचँर[3] ॥ असंयुक्तस्येति किम् । दुजओ । चरित्तो । बालक्क[4] । गज्जी ॥ क्वचित् संयुक्तस्यापि । नत्तंचँर ॥ अनादेरिति किम् । विदुरो । गय । विजणे । परं । जग । यस्य तु जत्वम् आदौ वक्ष्यते ॥ समासे तु वाक्याविभक्त्यपेक्षया भिन्न-

---

१ B अणिउंतय; C आणिउतय. २ BC पूर्वोक्त°. ३ BCD नक्तं°. ४ BCD नक्तं°.

अइमुतंय-बिन्दु-करो अइमुत्तय-गोर-दन्तओ एस ।
सविमो खु साव-चविओ तिअस-गय-वरो महि-अलम्मि॥२६
अच्छ-कय-कण्ण-चिउओ महु-पिङ्गल-नयणओ मयङ्क-नहो ।
पियइ व लायण्णमिमो अखुञ्ज-कुम्भो पर-गयाण ॥२७॥

पदत्वमपि । तेन तत्र यथादर्शनम् उभयमपि । सुहकर सुहयर । आगमिओ आअमिअ । बहुतर बहुअर । जलयर अजलचर । सुहदेसु सुहओ ॥ क्वचिद् आदेरपि । इन्धं । उण ॥ क्वचित् चस्य जः । पिसाजी ॥ अमुगो इत्यादिषु तु "व्यत्ययश्च"[४.४४७]इति कस्य गत्वम्॥ आर्षे अन्यदपि दृश्यते । आउण्टण । अत्र चस्य टः ॥

२६. अतिमुक्तकानीव करे बिन्दवो यस्य अतिमुक्तकवद् गौरदन्तः एष राजगजो ज्ञायते । सोयं त्रिदशगजो मुनेः कस्यचिच्छापेन आक्रोशेन च्युतो भ्रष्टः स्वर्गाद् महीतले ॥ मनसा प्रत्यक्षमिव परिकल्प्य सुरेभम् इदमा निरदिक्षत् ॥

चाउँण्ड-काउँए । अणिउँत्तय । जउँण । "यमुना°" इत्यादिना [१७८]मस्य लुक् । लुकि च मस्य स्थाने अनुनासिकः ॥ क्वचिन्न । अइमुंतय अइमुत्तय ॥

साव । "नावर्णात् पः" [१७९] इति न पस्य लुक् ॥

२७. अच्छं मलरहितं कचकर्णचिबुकं यस्य । मधुवत् पिङ्गले नयने यस्य । मृगाङ्कवद् निर्मलत्वाद् नखा यस्य । अकुब्जौ उन्नतौ कुम्भौ यस्य स गजः परगजानां लावण्यं पिबतीव निखिललावण्यस्य तत्र दर्शनाद् इति भावः ॥

गय । कय । नयणओ । मयङ्क । लायण्ण । गयाण । "अवर्णो यश्रुतिः"[१८०] "कगचज"इत्यादिना[१७७]लुकि शेषोऽवर्णःअवर्णात् परो लघुप्रयत्नतरयश्रुतिः। अवर्ण इति किम् । चिउओ ॥ अवर्णादित्येव । तिअस॥ क्वचिद् भवति । पियइ ॥

---

१ BC कस्यचित्थानाज्ञासेन च्युतो. २ BC अणिउंतय.

खप्पर-खीलय-कुज्जय-कुसुम-समा जस्स सेल-खम्भ-दुमा ।
रुन्धिअ-खासिअ-छिक्कं पिक्खिज्जइ मय[1]-गलो एस ॥२८॥
मरगय-गेन्दु[2]अ-सरिसालि-गुच्छ-गण्डे निवो इहारूढो ।
जयइ चिलाए व्व परे सिरिकण्ठ-किराय-वीरे वि ॥२९॥
जिअ-घण-सीभर-गङ्गा-सीहर-चन्दिम-सुसीअ-सीअरओ ।
फलिहामल-वीस-नहो निहस-प्पह-चिहुरओ एस ॥३०॥

२८. कर्परश्च घटखण्डं कीलकश्च शङ्कुः कुब्जकः शतपत्रिकाविशेषः तस्य कुसुमानि च तैः समाः । एतान् अनायासेन उत्पाटयतीत्यर्थः । यस्य शैलस्तम्भद्रुमाः । एष मदकलो मदोत्कटः रुद्धकाशितक्षुतं यथा भवति एवं प्रेक्ष्यते ॥

अखुज । खप्पर । खीलय । "कुब्ज°" [१८१] इत्यादिना एषु कस्य खः। पुष्पं चेत् कुब्जाभिधेयं न । अपुष्प इति किम् । कुज्जय ॥ आर्षेन्यत्रापि । खासिअ ॥

२९. मरकतकन्दुकसदृशा अलिगुच्छा ययोस्तौ तथाभूतौ गण्डौ यस्य तस्मिन्निह गजे आरूढः स नृपः श्रीकण्ठकिरातवद्वीरानपि परान् शत्रून् किरातानिव पुलिन्दानिव जयति ॥

मय-गलो । मरगय । गेन्दुअ । "मरकत°" [१८२] इत्यादिना कस्य गः। कन्दुके तु आद्यस्य गः ॥

चिलाए। "किराते चः" [१८३] इति कस्य चः । कामरूपिणि तु नेष्यते ॥ किराय ॥

३०. जिताः शैत्येन अभिभूता घनशीकरा गङ्गाशीकराश्च यैः अत एव चान्द्रिकावत् सुशीताः शीकरा मदबिन्दवो यस्य । स्फटिक-

---

१ D गयवरो. २ BC °गेंडुअ°.

पिहु-जहणो साहु-मुहो सरिसव-खल-कडुअ-सलिलओ अथिरो।
इह एसो निव-जोग्गो पत्तो चोत्थिं मयावत्थं॥ ३१॥
निव-धम्म-रओ अह सो नभम्मि पाउस-घणो व्व पिधमिन्दो।
अपिहं व आसणाओ असङ्कलं तं समारूढो॥ ३२॥

वद् अमला विंशतिर्नखा यस्य। निकषः कषपट्टः। तस्य प्रभावत् चिकुरा यस्य स तथाभूत एष गजः॥

सीभर सीहर। "शीकरे भहौ वा" [१८४] इति कस्य भहौ वा। पक्षे सीअरओ॥

चन्दिम। "चन्द्रिकायां मः" [१८५] इति कस्य मः॥

फालिह। निहस। चिहुरओ। "निकषस्फटिकचिकुरे हः [१८६] इति कस्य हः। चिहुरः संस्कृतेपीति दुग्गः (दुर्गः)॥

३१. पृथुजघनो विकटकटीतटः साधुमुखः सौम्यवदनः सर्षपखलवत् कटुकं सलिलं मदजलं यस्य। अस्थिरः निरन्तरं हस्तकर्णतालचलनेन चञ्चलः एषः गजः चतुर्थीं मदेन उपलक्षिताम् अवस्थां प्राप्तः। त्रिंशद्वर्षदेश्यः संपन्न इत्यर्थः। अत एव नृपयोग्यः। एतावता भद्रजातीयत्वम् उक्तम्। तथा च तल्लक्षणम्।

महु-गुलिय-पिङ्गलक्खो अणुपुव्वि-सुजाय-दीह-नङ्गूलो।
पुरओ उदग्ग-धीरो सव्वङ्ग-समाहिओ भद्दो॥ इत्यादि॥

३२. [अथ] नृपस्य धर्मे दुष्टनिग्रहशिष्टप्रतिपालनादौ आचारे रतः। पृथक् भूतलस्थितत्वेन भिन्नः इन्द्रः स श्रीकुमारपालभूपः आसनाद् अपृथगिव शरीरसौस्थ्यकृत्त्वेन सिंहासनकल्पे अश्रृङ्खले अपासितनिगडे तस्मिन् हस्तीन्द्रे समारूढः। यथा नभसि प्रावृड्घनः। "सप्तम्या द्वितीया" [३.१३७] इति तम् इत्यत्र सप्तम्याः स्थाने द्वितीया॥

नहो। प्पह। पिहु। जहणो। साहु। मुहो। "खघथधभाम्" [१८७] इति

---

१ D गयावत्थं.

पुन्नाम-दामवन्तो पुलोइओ भामिणीहि पउरीहिं ।
छालङ्क-देव-तेओ सुहओ रइ-सूहवो व्व निवो ॥ ३३ ॥
इन्दो दुहओ चन्दो वि दूहवो आसि खेअर-वहूणं ।
तस्सिं दिट्ठे तइआ मणि-खसिआहरण-खइअङ्गे ॥ ३४ ॥

खादीनां हः । असंयुक्तस्यैव । चोत्थि । मयावत्थं ॥ प्राय इत्येव । सरिसव-खल । अथिरो । निव-धम्म । नभम्मि ॥

पिध अ हं । "पृथकि धो वा" [१८८] इति थस्य धो वा ॥

असङ्कलं । "शृङ्खले खः कः [१८९] इति खस्य कः ॥

३३. गाथासप्तकेन राजवर्णनम् आह । पुन्नागदामवान् सुरपर्णिका-कुसुममालायुक्तः । छागाङ्कदेवो वह्निः । तद्वद् द्विषद्दारुदाहकत्वात् तेजो यस्य । सुभगः अनुकूलाचरणेन जगज्जनप्रियः नृपः रतिसुभगः इव कन्दर्पवद् भागिनीभिः भाग्ययुक्ताभिः पौरीभिः नागराङ्गनाभिः प्रलोकितः सोत्कण्ठम् ईक्षितः ॥

पुन्नाम । भामिणीहि । "पुन्नागभागिन्योर्गो मः" [१९०] इति गस्य मः ॥

छालङ्क । "छागे लः" [१९१] इति गस्य लः ॥

३४. तदा राजवीथीचलन्मदकलपृष्ठतलारोहकाले मणिखचिताभरणैः पद्मरागेन्द्रनीलादिरत्नरोचिष्णुकटककेयूरमुकुटाद्यलंकारैः खचितानि युक्तानि अङ्गानि हस्तचरणोत्तमाङ्गप्रमुखा अवयवा यस्य तस्मिन् राज्ञि दृष्टे सति खेचरवधूनाम् इन्द्रो दुर्भगश्चन्द्रोपि दुर्भग आसीत् ॥ सौम्यसौभाग्यलावण्योपेततत्तनुविलोकने सर्वाङ्गीणनयनसहस्रेण भीषणत्वाद् इन्द्रः अन्तर्मलीमसत्वेन च चन्द्रस्तासां न प्रियंभावुकतां जगामेत्यर्थः ॥

सूहवो । दूहवो । "ऊत्वे दुर्भगसुभगे वः" [१९२] इति गस्य वः ॥ ऊत्व इति किम् । सुहओ । दुहओ ॥

वेस-पिसाओ मुत्ती-पिसल्लओ अ झडिलो अजडिलो य।
खट्टङ्ग-घण्ट-भूसो निवारिओ न जह अटइ पुरो ॥ ३५ ॥
केढव-सयढारि-सढाल-विक्कमो फालिह-विमल-नेवच्छो।
चविला-फालिअ-कुम्भो नहं व चविडाइ फाडन्तो ॥ ३६ ॥
अङ्कोल्ल-तेल्ल-णिद्धो असढो पिहडो कलाण सयलाण।
लहु-जढर-पिढर-पडियार-पाडणत्ताण कय-कीलो ॥ ३७ ॥

३५. वेषेण पिशाचः जीर्णविवर्णविकृतवेषवान् ग्रहिलप्रायः। मूर्त्या पिशाचश्च भीषणदर्शनः। जटिलः सर्वत्र उद्गतरोमा। अजटिलः मुण्डिताशिरमुण्डः कापालिकादिः। खट्वाङ्गघण्टाभ्यां भूषा यस्य। स च मृतकपालघण्टादिकलित ईश्वररूपधारी। जटाधर इत्यर्थः। निवारितो दुःशकुनकारणाद् निषिद्धः यथा येन पुरः अग्रे न अटति नागच्छति ॥

खसिअ खइअङ्गे। पिसाओ पिसल्लओ। "खचित०" इत्यादिना [१९३] यथासंख्यं सल्लौ वा ॥

झडिलौ अजडिलो। "जटिले जो झो वा" [१९४] इति जस्य झो वा। "टो डः" [१९५] इति टस्य डश्च ॥ स्वरादित्येव। घण्ट ॥ असंयुक्तस्येत्येव। खट्टङ्ग ॥ क्वचिन्न। अटइ ॥

३६. चतुर्भिः कलापकम्। कुमारेण कुमारपालेन कारितो विहारः कुमारविहारस्तस्मिन् श्रीपार्श्वनाथचैत्ये प्राप्तः। राजेति प्रक्रमात् ज्ञेयम्। कीदृशः। कैटभशकटौ दैत्यौ तयोर्यः अरिभूतः सटालो नरसिंहस्तद्वद् विक्रमो यस्य। स्फटिकवद् विमलनेपथ्यः। चपेटया पाटितस्ताडितः कुम्भो येन स तथाभूतः। श्यामकुम्भस्थलास्फालनात् अत्युच्चत्वेन[2] अदृश्यकुम्भस्थलदत्तचपेटोत्थप्रतिरवाद् वा उत्प्रेक्ष्यते नभश्चपेटया पाटयन्निति ॥

३७. अङ्कोठतैलवत् स्निग्धः अरूक्षकायः अशठः शाठ्यवर्जितः

---

१ D मृत्कपाल°. २ B अच्छव्युतत्वेन; C अव्यतत्वेन.

दढ-खन्ध-हार-नाडिं पेल्लन्तो निबिड-कच्छ-नालिमिभं ।
उव्वेलु-अचुच्छङ्कुस-अछुच्छ-वेणूहि आवरिओ ॥ ३८ ॥
अणतुच्छ-टयर-कप्पूर-धूव-महमहिअ-टसर-सुइ-वत्थो ।
कुमर-विहारे पत्तो टूवर-पडिहार-दिन्न-करो ॥ ३९ ॥

सकलानां कलानां पिठरो भाजनम् । लघु जठरं बुभुक्षाक्षामकुक्षिः तदेव पिठरस्तस्य प्रतीकारो भोजनलाभः तेन पातनम् इतस्ततो भ्रमणं तेन ऋताः । पीडिता इत्यर्थः । तेषां कृता मनोरथातिगवस्तुदानेन जनिता क्रीडा स्वेच्छाविलसनं येन स तथा ॥

३८. दृढा स्कन्धे हारभूता नाडिर्वरत्रा यस्य । निबिडा निश्चला कक्षायां मध्ये च नाडिर्यस्य स तथा । तम् इभं क्षिपन् प्रेरयन् । उद्वेणवः उद्वूर्णवंशदण्डास्ते च अतुच्छाङ्कुशाश्च एवंभूता ये अतुच्छा वेणवः प्रभूता राजविशेषास्तैरावृतः । वेणुर्वंशे नृपान्तरे इति वेणुशब्दो राजविशेषवाच्यपि ॥

३९. अतुच्छं तगरश्च सुरभिद्रव्यभेदः कर्पूरो घनसारः धूपश्च नानासुरभिद्रव्यक्षोदः तैः । अर्थात् तद्धूमैः प्रसृतानि व्याप्तानि त्रसरः सूत्रभेदस्तस्य शुचीनि वस्त्राणि यस्य । तूवरः अनुद्भिन्नश्मश्रुर्मुण्डित-श्मश्रुर्वा यः प्रतीहारस्तेन दत्तः करो यस्य स तथा ॥

केढव । सयढारि । मढाल । " सटोशकटकैटभे ढः " [१९६] इति टस्य ढः ॥ फालिह । " स्फटिके लः " [१९७] इति टस्य लः ॥

चविला चविडाइ । फालिअ फाडन्तो । " चपेटापाटौ वा " [१९८] इति चपेटायां ण्यन्ते पाटौ धातौ च टस्य लो वा ॥

जढर । " ठो ढः " [१९९] इति ठस्य ढः ॥

अङ्कोल्ल । " अङ्कोठे ल्लः " [२००] ॥

पिहडो पिढर । " पिठरे हो वा रश्च डः " [२०१] इति ठस्य हो वा तत्संनियोगे च रस्य डः ॥

---

१ BC अतुच्छाः २ D शटा°.

सुपइट्ठं सुपडायं वेडिस-दल-नील-भित्ति-गब्भिणयं ।
अणिउँत्तय[1]-फुल्ल-हरं बालाण वि रुण्ण-अवहरणं ॥ ४० ॥
बाहत्तरि-कल-सालाहण-सम-जणमलमि-कुसुम-कंय-सोहं ।
पलिल-सिर-पलिअ-पीवल-करण-घुसणुम्मीस[2]-ण्हवण-जलं ४१

कीलो । " डो लः " [२०२] इति डस्य लः ॥ क्वचिद् वा । नाडिं नालिं । क्वचिन्न । निविड ॥

उव्वेलु वेणुहि । " वेणौ णो वा " [२०३] इति णस्य लो वा ॥

अचुच्छ अछुच्छ अणतुच्छ । " तुच्छे तश्चछौ वा " [२०४] इति तस्य चछौ वा ॥

टयर । टसर । टूवर । " तगरत्रसरतूवरे टः " [२०५] इति तस्य टः ॥

४०. अधुना यादृशं तज्जिनमन्दिरं यादृशश्च सन् राजा प्रविष्टस्तद् गाथाद्वादशकेनाह ॥ द्वादशभिः कुलकम् । निजनाम्ना अङ्कितम् उपलक्षितं यद् निजकीर्तनम् । कुमारविहार इत्यर्थः । तद् भक्त्या आदरेण ततः प्राप्त्यनन्तरं स श्रीकुमारपालभूपः प्रविष्टः प्रविशति स्म । कीदृशं तत् । सुप्रतिष्ठं शास्त्रविधिविहितविधानविशेषम् अतिशयप्रसिद्धं वा । सुपताकं चञ्चद्वैजयन्तीकं वेतसो वानीरस्तस्य दलानीव नीलमणिनिर्मितत्वेन या नीला भित्तयस्ताभिर्गर्भितं गर्तापुरोर्ध्वशिखरान्तराले युक्तम् । अतिमुक्तकफुल्लानां गृहाणि पूजार्थं कृता गृहाकारा विच्छित्तयो यत्र । किं बहुना । बालानामपि रुदितापहरणम् कौतुकात् कृतसस्मितबालकम् इत्यर्थः ॥

४१. द्विसप्ततिः कला येषाम् अत एव सातवाहनसमा जनाः श्रावकलोका यत्र । अतसीकुसुमकृतशोभं क्षुमाप्रसूनजनितान्तराविच्छित्ति । पलितशिरसां यानि पलितानि तेषां पीतकरणं स्वर्णवर्णा-

---

१ BC अणिउंतय°. २ BCD °घुसणुम्मीस°. ३ BC अचुछं. ४ B गर्तो-पूरो°.

पीअल-धाउ-विणिम्मिअ[1]-विहत्थि-पम-माहुलिङ्ग-आहरणं ।
भरह-जिण-भवण-सरिसं मङ्गल-वसहिं सिरी-वसइं ॥ ४२ ॥
अध काहल-भव्व-जणं सिढिलिअ[2]-कलि-कालमसढिलाणन्दं ।
नयरस्स मेढिभूयं पढमं तित्थं व पुढवीए ॥ ४३ ॥
पुहवी-निसीढ-तम-भर-निसीहिणीनाह-सरिस-जिण-बिम्बं ।
खण्डिअ-डम्भिअ-दम्भं उद्दण्ड-सुवण्णमय-डण्डं ॥ ४४ ॥
डरिआणं दर-हरणं डड्ढागरु-दड्ढ-धूव-सुह-गन्धं ।
अहि-डसण-डट्ठ-सरणं दसण-कवाडंसु-दट्ठ-तमं ॥ ४५ ॥

पादनं यद् घुसृणं कुङ्कुमं तेन उन्मिश्रं स्नपनजलं यत्र तत् तथा । स्नानजलचन्दनेन यत्र पलितशिरसः स्वर्णवर्णकचा भवन्तीत्यर्थः ॥

४२. पीतधातुना गाङ्गेयेन विनिर्मितं वितस्तिप्रमं मातुलिङ्गाभरणं यत्र । भरतजिनभवनसदृशं मङ्गलानां कल्याणानां वसतिं स्थानं श्रियः शोभाया लक्ष्म्या वा वसतिम् ॥

४३. अथ कातराः पापभीरवो भव्यजना यत्र । शिथिलितः अनवरतधर्मनिष्ठजनतापूर्णत्वेन मन्दीकृतः कलिकालो येन । आशिथिलः निबिडः आनन्दो यस्मात् । नगरस्य मेथिभूतं नाभिभूतम् । अन्यतीर्थपरित्यागेन तदाराधनवार्मिकलोकदर्शनाद् उत्प्रेक्ष्यते । पृथिव्यां प्रथमं तीर्थम् ॥

४४. पृथिव्यां निशीथे अर्धरात्रे यस्तमोभरस्तत्र निशीथिनीनाथसदृशं निर्मूलकाषंकषत्वेन चन्द्रकल्पं जिनबिम्बं यत्र खण्डितदाम्भिकदम्भम् । विघ्नविधानेन ध्वस्तमायिकमायम् इत्यर्थः । उद्दण्डसुवर्णमयदण्डम् ॥

४५. दरितानां भीतानां दरहरणं भयध्वंसकम् । दग्धागरुदग्ध-

---

१ B °विणम्मिअ°; C °विणमिअ°; D omits विहत्थि...भव्वजणं.
२ BC सिढलिअ°.

डाहत्त-दाह-हरणं कय-डोहलयाण पुन्न-दोहलयं ।
कडण-मइ-चत्त-कदणं डब्भङ्कुर-नील-नीलमणिं ॥ ४६ ॥
दब्भग्ग-मई दर-डोलिर-सीसमदोलिरेण हिअएण ।
दूरमहरं डसन्ते डहमाणो मिच्छ-दिट्ठि-जणे ॥ ४७ ॥
थुणिरो देवं बारह-रवि-तेअं भत्ति-गग्गर-गिराए ।
धम्म-करि-करलि-हूओ कयलि-मिऊ कोह-अपलित्तो ॥४८॥

धूपाभ्यां शुभगन्धम् । अहिदशनदष्टानां शरणं त्राणस्थानम् । लग्न-गाढविषाशिषोपि तत्रागता जीवन्तीत्यर्थः । दशनानां दन्तिदन्तानां कपटानि तेषाम् अंशवः तैर्दष्टं ग्रस्तं तमो येन ॥

४६. दाहार्तदाहहरणं भवदावसंतापापनोदकम् । कृतदोहदानां संजातदोहदानां पूर्णदोहदम् । पूरिताभिप्रेतम् इत्यर्थः । कदनमतिभिः हिंसाबुद्धिभिः । पापिष्ठैरित्यर्थः । तैरपि त्यक्तं कदनं यत्र । दर्भाङ्कुरवद् नीला नीलमणयः प्राङ्गणादिषु यत्र तत् तथा ॥

४७. स च कीदृशः । दर्भस्य कुशस्य अग्रं तद्वत् सूक्ष्मार्थपरिच्छेदकत्वेन मतिर्यस्य । अदोलावता निश्चलेन हृदयेन उपलक्षितः । दरदोलावत् शीर्षं जिनबिम्बरामणीयकविलोकनविस्मयेन ईषच्चलन्मस्तकं यथा भवति एवं प्रविष्टः जिनप्रवचनप्रभावनामात्सर्येण विघ्नाशक्ततया च दूरम् अतिशयेन अधरं दशतो मिथ्यादृष्टिजनान् दहन् संतापयन् ॥

४८. द्वादशरवितेजसं देवं वीतरागं भक्तिगद्गदगिरा जयजयेत्यादिवाचा स्तोता स्तवनशीलः । धर्म एव करी तत्र कदलीभूतः शोभाकृत्त्वेन पताकातुल्यः । कदलीवद् मृदुः कोमलाङ्गः । क्रोधेन अप्रदीप्तः । प्रशान्त इत्यर्थः ॥

दोहल-दुउणिअ-धाराकयम्ब-धूलीकलम्ब-कण्टइओ ।
धिप्पिर-सुवन्न-दिप्पिर-तणु-कन्ति-कवड्ढिअन्न-पहो ॥ ४९ ॥
चइउं निव-कउहाइं निसंढाइ-निवाण धम्म-सिक्खाओ ।
ओसहमोसढिओ इव दिन्तो स निसीहिअं काउं ॥ ५० ॥
निअ-नामङ्किअ-णिअ-कित्तणयं अनिला व्व अतुल-थामेण ।
पज्जलिआनल-तेओ भत्तीइ तओ पइट्ठो सो ॥ ५१ ॥

४९. दोहदेन स्वसमयोद्भूतधूलिधाराधरधाराधोरणीछोटनरूपदौहृद-परिपूर्त्या द्विगुणितौ वृद्धिं गतौ यौ धाराकदम्बधूलीकदम्बौ ताविव कण्टकितः संजातरोमाञ्चः । दीप्रसुवर्णवद् दीप्रा या तनुकान्तिस्तया कदर्थितान्यप्रभः ॥ एकस्यैव कदम्बस्य द्विधा अभिधा । यदुक्तम् ।

ग्रीष्मसमये विकासी कथितो धूलीकदम्ब इति लोके ।
जलधरसमयप्राप्तौ स एव धाराकदम्बः स्यात् ॥

५०. नृपककुदानि छत्रखड्गवाहनमुकुटचामररूपराजचिह्नानि त्यक्त्वा निषधादिनृपेभ्यो धर्मशिक्षाः धर्मोपदेशान् ददत् वितरन् । किंवत् । यथा औषधानि पण्यम् अस्य औषधिकः गान्धिकः औषधम् इति । स चतुःसमुद्रवसुंधराप्रसिद्धः नैषेधिकीं कृत्वा ॥

५१. अतुलस्थाम्ना अमितबलेन कृत्वा अनिल इव वायुसदृक्षः प्रज्वलितानलतेजा जाज्वलितज्वलनप्रतिमप्रताप इति ॥

पडिहार सुपडायं । " प्रत्यादौ डः " [२०६] इति तस्य डः ॥ आर्षे दुक्कडादि ज्ञेयम् ॥ प्राय इत्येव । सुपइट्ठं ॥

वेडिस । " इत्वे वेतसे " [२०७] इति तस्य डः ॥

गब्भिणयं । अणिउँत्तय । "गर्भितातिमुक्तके णः [२०८] इति तस्य णः ॥

रुण्ण । " रुदिते दिना ण्णः " [२०९] इति दिना सह तस्य ण्णः ॥

बाहत्तरि । " सप्तरौ रः " [२१०] इति तस्य रः ॥

सालाहण । अलसि । "अतसीसातवाहने लः " [२११] इति तस्य लः ॥

---

१ BC निसिढाइ°. २ BC °धोरिणी. ३ BC °समय°. ४ BC प्राप्तौ स एव. ५ D निषेधिकीं. ६ BC अणिउंतय.

लिम्बासय-निम्बगिरा कालि-ण्हाविअ-पाव-नाविआदरिसा ।
धम्म-रिउणो वि तस्सिं दिट्ठे धम्मोम्मुहा हूया ॥ ५२ ॥

पलिल पलिअ । "पलिते वा" [२१२] इति तस्य लो वा ॥

[पीवल] पीअल । "पीते वो ले वा" [२१३] इति तस्य वो वा स्वार्थे ले परे॥

विहत्थि । माहुलिङ्ग । भरह । वसहिं । काहल । "वितस्ति°" [२१४] इत्यादिना तस्य हः ॥ बाहुलकात् क्वचिन्न । वसइं ॥

सिढिलिअ । असढिला । मेढि । पढमं । "मेथि°" [२१५] इत्यादिना थस्य ढः॥

पुढवीए पुहवी । निसीढ निसीहिणी । "निशीथपृथिव्योर्वा" [२१६] इति थस्य ढो वा ॥

डम्भिअ दम्भं । उद्दण्ड डण्डं । डरिआणं दर । डड्ढा दड्ढ । डसण दसण । डट्ठ दट्ठ । डाह दाह । डोहलयाण दोहलयं । कडण कदणं । डम्भ दम्भ । डोलिर अदोलिरेण । "दशन°" इत्यादिना [२१७] दस्य डो वा ॥दरस्य भयार्थवृत्तेरेव । अन्यत्र दर ॥

डसन्ते । डहमाणो । "दंशदहोः" [२१८] इति दस्य डः ॥

बारह । गग्गर । "संख्यागद्गदे रः" [२१९] इति दस्य रः ॥

करलि । "कदल्याम् अद्रुमे" [२२०] इति दस्य रः॥ अद्रुम इति किम् । कयलि॥

पलित्तो । दोहल । "प्रदीपिदोहदे लः" [२२१] । प्रदीप्यतौ धातौ दोहदे च दस्य लः ॥

कयम्ब कलम्ब । "कदम्बे वा" [२२२] इति दस्य लो वा ॥

पिप्पिर दिप्पिर । "दीपौ धो वा" [२२३] इति दस्य धो वा ॥

कवट्टिअ । "कदर्थिते वः" [२२४] इति दस्य वः ॥

कउहाइं । "ककुदे हः" [२२५] इति दस्य हः ॥

निसढाइ । "निषधे धो ढः" [२२६] इति धस्य ढः ॥

ओसहं ओसढिओ । "वौषधे" [२२७] इति धस्य ढो वा ॥

कित्तणयं । "नो णः" [२२८] इति नस्य णः॥ आर्षे अनिलो । अनल इत्यादि॥

निअ । णिअ । "वादौ" [२२९] इति नस्य णो वा ॥

५२. निम्बवत् कटुः । क्रूर इत्यर्थः । एवंभूत आशयः अभिप्रायः

सो फणस-फालिहद्दय-दीहर-भुअ-फलिह-जोडिअ-णडालो ।
अफरुस-गिराइ फालिअ-मोहो इअ जिण-थुइमकासि ॥५३॥
फलिहा-जलं वहुत्तम्बुजेहि जह जह वणं च नीमेहि ।
जग-सिरि-नीवावेडय संहइ मही तह तुह पएहिं ॥ ५४ ॥
तुह कय-कुसुमामेला पणट्ठ-पारद्धि-पमुह-पाव-मला ।
मुत्ताहल-विमला इह हवन्ति रेभ व्व मुद्धन्ना ॥ ५५ ॥

तथा निम्बवद् गौश्च येषाम् । कलिरेव कुत्सितकर्मणा नापितः पापमेव नापितः तयोः उपकरणभूतत्वेन ज्ञापकत्वेन च आदर्शाः अत एव धर्मरिपवोपि तस्मिंस्तथाविधनृपे दृष्टे सति धर्मोन्मुखा भूता जाताः । अपिर्विस्मये ॥

लिम्बा निम्ब । ण्हाविअ नाविअ । "निम्बनापिते लण्हं वा" [२३०] इति नस्य लण्हौ वा ॥ "पो वः" [२३१] इति पस्य च वः ॥ प्राय इत्येव । रिउणो ॥

५३. पनसपारिभद्राविव यौ दीर्घौ भुजपरिघौ ताभ्यां योजितं ललाटं भालस्थलं येन । ललाटयोजितकर इत्यर्थः । पाटितमोहो विनाशित-विपरीतावबोधः सन् अपरुषगिरा मृदुस्वरेण इति वक्ष्यमाणरीत्या स राजा जिनस्तुतिम् अकार्षीत् ॥

५४. स्तुतिमेव गाथाष्टकेनाह । परिखा खातिका तस्या जलं यथा प्रभूताम्बुजैः वनं च यथा नीपैः राजति । जगतां श्रियो नीपानां कदम्ब-कुसुमानाम् आपीड शोभाकृत्त्वेन [हे] शेखर तथा तव पादैर्महो राजति॥

फणस । फालिहद्दय । फलिह । अफरुस । फालिअ । फलिहा । "पाटि°" इत्यादिना [२३२] ण्यन्ते पटिधातौ परुषादिषु च पस्य फः ॥

वहुत्तं । "प्रभूते वः" [२३३] इति पस्य वः ॥

५५. तव कृतकुसुमापीडाः प्रनष्टपापर्द्धिप्रमुखपापमलाः अत एव मुक्ताफलवद् विमला विगतकर्ममला इह अस्मिन् जन्मनि भवन्ति

---

१ C तह सहइ मही तुह पएहिं.

सहलो जम्मो सभलं च जीविअं ताण देव फणि-चिन्ध।
जे तं चम्पय-सवलेहिँ भिसिणि-कुसुमेहिँ अच्चन्ति ॥ ५६ ॥
असिर-कमन्धे अकयन्ध-सिरे समरम्मि तुज्झ झाणेण।
केढव-रिउणो व्व निवा विसढाविसमं न जाणन्ति ॥ ५७ ॥
वम्मह-पिआहिवन्नू अहिमन्नु-पिआ य अहरिओ तेण।
तुह भसल-साम पय-पङ्कएसु भमराइअं जेण ॥ ५८ ॥

रेफवद् मूर्धन्याः सकललोकाग्रस्थाः। सिद्धा भवन्तीत्यर्थः। रेफोपि "ऋवर्णटवर्गरषा मूर्धन्याः" इति मूर्धन्यः ॥

नीमेहि। नीव। आवेडय कुसुमामेला। "नीपापीडे मो वा" [२३४] इति पस्य मो वा ॥

पारद्धि। "पापर्द्धौ रः" [२३५] इति अपदादौ पस्य रः ॥

५६. हे देव पार्श्व फणिचिह्न तेषां जन्म सफलम् जीवितं च सफलम्। ये त्वां चम्पकशबलैर्बिसिनीकुसुमैः अर्चन्ति पूजयन्ति ॥

क्वचिद् भः। रेभ॥क्वचित्तु हः। मुत्ताहल॥ क्वचिद् उभावपि। सहलो। सभलं। "फो भहौ" [२३६] इत्यनेन ॥अनादेरित्येव। फणि ॥

सवलेहिँ। "बो वः" [२३७] इति बस्य वः ॥

भिसिणि। "बिसिन्यां भः" [२३८] इति बस्य भः ॥

५७. आशिरांसि कबन्धानि यत्र अविद्यमानकबन्धानि शिरांसि यत्र तस्मिन् समरे तव ध्यानेन भवतः स्मरणेन कैटभरिपव इव विष्णव इव [नृपा] विषमाविषमं न जानन्ति ॥ सर्वत्र विजयवैजयन्तीं प्राप्नुवन्तीति भावः ॥ अशिर इति कबन्धविशेषणं स्वरूपभणनार्थम्। केढव-रिउणो इत्यत्र बहुत्वं मत्स्याद्यवतारापेक्षया ॥

कमन्धे अकयन्ध। "कबन्धे मयौ [२३९] इति बस्य मयौ ॥

केढव। "कैटभे भो वः" [२४०] इति भस्य वः ॥

विसढाविसमं। "विषमे मो ढो वा" [२४१] इति मस्य ढो वा ॥

५८. मन्मथपिता विष्णुः अभिमन्युः अर्जुनाङ्गजः अभिमन्यु

पहु तुम्हकेर-अह-खाय-संजमे सोवओगं-साहूण ।
न समो अह जाओ तव-किसङ्ग-लट्ठी वि हु कुदिट्ठी ॥५९॥
करणिज्जाकरणीअं पेआपिअं च जे न वि मुणान्ति ।
ते दोस-दुइआ वि हु गुण-बीआ हुन्ति तइँ दिट्ठे ॥ ६० ॥

पिता च तेन अधरितः न्यकृतः । स सर्वोत्कृष्ट इत्यर्थः । हे भसलवत् श्यामल तव पदपङ्कजयोः येन भ्रमरायितं चञ्चरीकवद् आचरितम् । यस्त्वां प्रणत इत्यर्थः ॥

वम्मह । " मन्मथे वः " [२४२] इति मस्य वः ॥
पिआहिवन्नू अहिमन्नु । " वाभिमन्यौ " [२४३] इति मो वो वा ॥
भसल भमराइअं । " भ्रमरे सो वा " [२४४] इति मस्य सो वा ॥

५९. हे प्रभो पार्श्व त्वदीये भवत्संबन्धिनि यथाख्यातसंयमे पञ्चम-चारित्रे सोपयोगसाधूनां सावधानयतीनाम् । हु इति निश्चितम् । न समो न सदृक्षः । कः।यथाजातः शीतातपादुपद्रवसहनाय प्रावरणरहितः तपसा कृशाङ्गयष्टिः दुर्बलगात्रोपि कुदृष्टिर्जमदग्न्यादिः ॥

जेण । " आदेर्यो जः [२४५] इति यस्य जः ॥ आदेरिति किम् । भमराइअं । बाहुलकात् सोपसर्गस्य अनादेरपि । संजमे ॥ क्वचिन्न । सोवओग ॥ आर्षे लोपोपि । अह-खाय । अह-जाओ ॥

तुम्हकेर । युष्मद्यर्थपरे तः " [२४६] इति यस्य तः ॥
लट्ठी । " यष्ट्यां लः " [२४७] इति यस्य लः ॥

६०. हे देव करणीयाकरणीयं पेयापेयं च ये नैव जानन्ति ते दोषद्वितीया अपि गुणद्वितीयाः सगुणास्त्वयि दृष्टे सति भवन्ति । संबोधनपदम् अत्र ज्ञेयम् ॥

---

१ BC सोवओअ°. २ C ° चारित्रे. ३ C शीतितापाद्यु°.

वेकक्ख-उत्तरीआ धवल-दुगूलोत्तरिज्ज-पिहिअ-मुहा ।
तुह कय-ण्हवणा घण-छाय-छत्त-छाहीओ माणन्ति ॥ ६१ ॥
इय सच्छाओ कइवाह-परिअणो कइअवं थुइं काउं ।
आइ-किडि व्व अभेडो जिण-ण्हवणे अह पयट्टो सो ॥६२॥
पल्लाणिअ-अपडायाणिअ-हयमाएहि अवर-राएहि ।
कणवीरच्चिय-कलसो हलिद्द-गोरो स किर दिट्ठो ॥ ६३ ॥

६१. हे देव वैकक्ष्ये उत्तरासङ्गे उत्तरीयम् उपरितनं वस्त्रं येषाम् धवलं तदेव धौतत्वाच्छुचि यद् दुकूलं क्षौमं तच्च तद् उत्तरीयं च तेन पिहितं विगन्धोष्णोच्छ्वासलगनाशातनाशङ्कया स्थगितं मुखं यैस्ते तथा । तव कृतस्नपना घना सान्द्रा छाया आतपाभावो यस्मात् तच्च तच्छत्रं च तेन याश्छायाः शोभास्ता अनुभुञ्जते अनुभवन्ति ॥

करणिज्जाकरणीअं । पेआपिज्जं । दुइजा वीआ । उत्तरीआ दुगूलोत्तरिज्ज । " वोत्तरीयानीयतीयकृत्ये जः " [२४८] इति यस्य जो वा ॥

६२. इति पूर्वोक्तरीत्या कतिपयां स्वशक्त्युचितां स्तुतिं कृत्वा सच्छायः शोभनकान्तिः कतिपयपरिजनः मितपरिवारः । आदिकिरिः आदिवराहः स इव अभेरः अकातरः स श्रीकुमारपालभूपः जिनस्नपने अथ स्तवनभणनानन्तरं प्रवृत्तः ॥ अत्र स्तुतिं कृत्वेति क्त्वाप्रत्ययेन स्नानप्रवृत्तेरानन्तर्यमात्रे उक्तेपि अत्यानन्तर्यप्रतिपादनार्थम् अथशब्दः । यथा देवदेवं प्रणम्यादौ इत्यत्र आदिशब्दः अतिसामीप्यप्रतिपत्त्यर्थः ॥

छाय छाहीओ । " छायायां होऽकान्तौ वा " [२४९] इति हो वा ॥ अकान्तौ इति किम् । सच्छाओ ॥

कइवाह कइअवं । " डाहवौ कतिपये " [२५०] इति यस्य डिदाह-वौ पर्यायेण ॥

किडि । अभेडो । " किरिभेरे रो डः " [२५१] इति रस्य डः ॥

६३. पर्याणं गृह्णन्ति हयाः । णिज् बहुलम् इत्यादिना णिच् । ते

तेण जिणम्मि दुवालस-रवि-तेए मुहल-घण्ट-थोर-रवं ।
णङ्गलि-लङ्गलिभायर-सरिसेण पलोट्टिआ कलसा ॥ ६४ ॥
णङ्गूलि-णाहलत्तण-अपुण-भवत्थं निवेण करुणाए ।
लङ्गूलि-लाहला वि हु सित्ता जिण-ण्हवण-सलिलेण ॥६५॥

सैन्यपालैः प्रयुज्यन्ते स्म । प्रयोक्तृव्यापारे णिगि क्तः । ततः पर्याणिता ग्राहितपल्ययना अपर्याणिताश्च हया यत्रेति । एवम् आयातैः अपरराजैः करवीरैः करवीरकुसुमैः अर्चितकलशः । हरिद्रावद् गौरः स राजा किल दृष्टः । सविस्मयोत्कण्ठं विलोकितः । किलेति प्रसिद्धौ ॥

पल्लाणिअ अपडायाणिअ । "पर्याणे डा वा" [२५२] इति रस्य डा वा ॥ कणवीर । "करवीरे णः" [२५३] इति आद्यरस्य णः ॥

६४. लाङ्गलिलाङ्गलिभ्रातृसदृशेन बलभद्राच्युततुल्येन तेन राज्ञा मुखराः प्रतिरवैर्वाचाला या घण्टास्तासां स्थूलो रवो यत्र इत्येवं जिने जिनबिम्बे द्वादशरवितेजसि पर्यस्ताः कर्पूरकुङ्कुमादिसुरभिद्रव्यक्षोदामिश्र-जलमोचनाय अवाञ्चः कृताः कलशाः सुवर्णमणिमृन्मयादिकुम्भाः ॥

हलिद्द । मुहल । "हरिद्रादौ लः" [२५४] इति रस्य लः ॥ आर्षे दुवालस । थोर । "स्थूले लो रः" [२५५] इति लस्य रः ॥

६५. लाङ्गूलिलाहलत्वयोः तिर्यक्त्वम्लेच्छविशेषत्वयोः अपुनर्भवार्थं पुनरप्रादुर्भावाय नृपेण करुणया । आस्ताम् अन्ये । लाङ्गूलिलाहला अपि । हु इति निश्चितम् । सिक्ताः आर्द्राः कृता जिनस्नपनसलिलेन ॥

णङ्गलि लङ्गलि । णङ्गूलि । णाहल लाहला । "लाहललाङ्गललाङ्गूले वादेर्णः" [२५६] । एषु आदेर्लस्य णो वा ।

---

१ D सुवर्णदुर्वर्णमणि°.

ससि-खण्ड-णडालाहिं समरी-भासाइ दूसिमिण-हरणं ।
सिविणे वि दुलहमणुजिणमकारि संगीयमित्थीहिं ॥ ६६ ॥
दाढिआ सुनीविआहिं नीमीओ नच्चणीहिँ तक्कालं ।
सविसेस-सद्द-गीए सज्जाइ-कमोक्कम-पयट्टे ॥ ६७ ॥

६६. शशिखण्डवद् अष्टमीचन्द्रवत् ललाटं भालस्थलं यासां ताभिः स्त्रीभिः शबरीभाषया गायनप्रसिद्धपुलिन्दीभाषया उपलक्षितं दुःस्वप्नहरणम् । जिनगुणगणोत्कीर्तनाकर्णनैर्दुःस्वप्नसूचितोपद्रवविघातात् । स्वप्ने[1] किल दुःप्रापमपि प्राप्यते । परं तत् स्वप्नेपि दुर्लभं जिनमनु पार्श्वनाथं लक्षीकृत्य संगीतकं प्रेक्षणीयकम् अकारि प्रारब्धम् ॥

[णडालाहिं । "ललाटे च" [२५७] इति आदेर्लस्य णः ॥]

समरी । "शबरे बो मः" [२५८] इति बस्य मः ॥

६७. गाथैकादशकेन तद्वर्णनम् आह । शोभनाः । रचनया बन्धुरा इत्यर्थः । नीवयो वस्त्रग्रन्थयो यासां ताभिर्नर्तनीभिः नीवयः तत्कालं प्रेक्षणक्षणे द्रढिताः नर्तनाय निश्चलीकृताः । कदा । षड्भ्यो जातः षड्जः । यदुक्तम्

नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संस्पृशन् ।
षड्भ्यः संजायते यस्मात् तस्मात् षड्ज इति स्मृतः ॥

स आदिर्येषाम् ऋषभादिस्वराणां तेषां क्रमेण नादाध्यारोहपरिपाट्या उत्क्रमेण च तथैव व्याघुटनेन ताभ्यां प्रवृत्ते । एतेन शुद्धरागयुक्तत्वम् अत्रोक्तम् । सविशेषा निर्दोषसदृशसार्थकत्वेन रम्याः शब्दा यत्र तच्च तद् गीतं च तस्मिन् सति ॥

दूसिमिण सिविणे । सुनीविआहिं नीमीओ । "स्वप्ननीव्योर्वा" [२५९] इति वस्य मो वा ॥

सविसेस । सद्द । सजाइ । "शषोः सः" [२६०] इति शषयोः सः ॥

---

१ BC स्वप्नेपि.

तइआ वणिअ-सुसाहिं निव-सुण्हा-वल्लहाओं ता दिट्ठा ।
पाहाण-पुत्तिआहि व पासाण-त्थम्भ-लग्गाहिं ॥ ६८ ॥
वञ्जिअ-दस-विह-धाऊ जणणी लासस्स दह-विहस्सावि ।
दिवसे दिवहावगमे अ सुह-यरी वाइआ वीणा ॥ ६९ ॥
रञ्जिअ-नर-सिंघेणं वंसिअ-सीहेण वाइओ वंसो ।
दाघत्त-दाह-हरणो छुह-धवले जिण-गुणे गाउं ॥ ७० ॥

६८. तदा प्रेक्षणीयकक्षणे नृपस्नुषाणां राजवधूनामपि वल्लभाः विलोकनाय ईप्सितास्ता नर्तक्यः पाषाणस्तम्भे लग्नाभिः संकीर्णत्वेन प्रेक्षणीयकस्य दुर्दर्शत्वेन संबद्धाभिर्वाणिजस्नुषाभिः दृष्टाः । नर्तनरामणीय[1]कलोलुपत्वेन निर्निमेषनिश्चलत्वादिना तथावस्थानात् पाषाणपुत्तिकाभिरिवेत्युत्प्रेक्ष्यते ॥

सुसाहिं सुण्हा । "स्नुषायां ण्हो न वा" [२६१] इति षस्य ण्हो वा ॥

६९. व्यञ्जितः तत्प्रदेशकोणसारणया प्रकटितो दशविधो दशभेदो धातुः भरतादिशास्त्रप्रसिद्धः आलत्तिका[2]विशेषो यया । दशविधो गेयपदाद्यङ्गभेदेन दशप्रकारः । यदुक्तम्

गेयपदं स्थित[3]पाठ्यं आसी[4]नं पुष्पगण्डिका ।
प्रच्छेदकस्त्रिमूढं च सैन्धवाख्यं द्विमूढकम् ॥
उत्तमोत्तमकं चैव उक्तप्रत्युक्तमेव च ।

इति दश लास्याङ्गानि । तस्यापि लास्यस्य जननी उत्पादिका । तत्स्वरानुसारेण नर्तकीनां नर्तनात् । दिवसे दिवसापगमे च । अहर्निशम् इत्यर्थः । अमृतास्वादकल्पस्वरकलितत्वेन सुखकरी वीणा वादिता काणिता ॥

पाहाण पासाण । दस दह । "दशपाषाणे हः" [२६२] इति शषयोर्यथादर्शनं हो वा ॥

दिवसे दिवहा । "दिवसे सः" [२६३] इति सस्य हो वा ॥

७०. रञ्जितः आह्लादितः नरसिंहः कुमारपालराजो येन तेन

1 BC omit 'रामणीयक...त्प्रेक्ष्यते'. २ C आलतिक्य°. ३ C स्थितं. ४ BC पाठ्यं मासीनं.

छमि-छत्तिवण्ण-गोरी छट्ठी भल्लि व्व पञ्च-बाणस्स ।
मय-छावच्छी वर-मुहर-गायणी गिण्हउं तालं ॥ ७१ ॥
अमय-छिरा-महुर-सरा अमय-सिरोवम-सराहि अणुगमिआ ।
जिण-गाणम्मि पयट्टा गुण-भायण-दाण-भाणं तो ॥ ७२ ॥
दणु-कुल-दणुअ-कुलाराइ-दुल्लहं तीइ रा-उल-विहारे ।
राय-उल-पियमवीअं गीअं सोउं न को आओ ॥ ७३ ॥

वांशिकसिंहेन वंशवादनं शिल्पम् अस्य वांशिकश्रेष्ठेन । दाहार्तानां दाहस्य हरणः श्रुतिसुखकृत्त्वेन संतापस्य विनाशको वंशो वेणुर्वादितः सुधावत् मक्कोलवत् निर्मलान् जिणगुणान् गातुम् ॥

सिंघेणं सीहेण । " हो घोऽनुस्वारात् " [२६४] इति हस्य घो [वा] ॥ क्वचिद् अननुस्वारादपि । दाघत्त दाह ॥

७१. युग्मम् । ततः वीणावेणुवादनानन्तरं वरमुखरगायनी तालं कांस्यिकां[1] गृहीत्वा जिनगाने प्रवृत्ता । कीदृशी । शमिसप्तपर्णवत् शमीसप्तच्छदपुष्पवद् गौरी गौरवर्णा । पञ्च बाणाः उन्मादनमदन-मोहनतापनशोषणाख्याः शरा यस्य स पञ्चबाणः कन्दर्पस्तस्य षष्ठी भल्लिरिव । तया हि बाणैरिव स सर्वं स्ववशं करोतीति भावः । मृग-शावस्येव आक्षिणी यस्याः ॥

७२. अमृतशिरावत् सुधाधारावत् मधुरः स्वरो यस्याः सा तथा अमृताशिरोपमः स्वरो यासां ताभिः अनुगता । आलतिकाक्षणे अन्यगायनीभिः कृतपृष्ठनिनादेत्यर्थः । गुणभाजनानां गुणपात्राणां यद् दानं जिनसद्गुणोत्कीर्तनोत्थपरितोषाद् धनवितरणं तस्य भाजनम् ॥

छुह । छमि । छत्तिवण्ण । छट्ठी । छावच्छी । " षट्शमी° " [२६५] इत्यादिना आदेर्वर्णस्य छः ॥

छिरा सिरो । " सिरायां वा " [२६६] इति आदेश्छो वा[2] ॥

७३. दनुजकुलस्य दैत्यसमूहस्य दनुजकुलारातयो देवास्तेषां च

१ BC कांस्यिकां. २ BCD शिरायां.

सक्कय-वारण-पाइअ-वायरण-पउत्त-सद्द-कय-गीए ।
आउञ्जिअ-पायारे रङ्गे पुण आसि गुणि-पारो ॥ ७४ ॥
तत्थागओ अ कालायस-सम-कालास-अहिअ-हिअओ जो ।
सो केलि-किसलयासोअ-किसल-कोमल-हिओ आसि ॥७५॥
दुग्गावी-पा-वीढं दुग्गा-एवीस-पाय-वीढं च ।
मोत्तुं गण-गन्धव्वा तं गीअं सोउमोच्छरिया ॥ ७६ ॥

दुर्लभं राजकुलस्य नरनाथयूथस्य प्रियं श्रोत्रसुखकृत्त्वेन हृद्यम् अद्वितीयं तस्या वरमुखरगायन्या गीतं श्रोतुं राजकुलविहारे कुमारविहारे को नायातः । किं तु सर्वोप्यायातः ॥

भायण भाणं । दणु दणुअ । रा-उल राय-उल । " लुग् भाजन° " [२६७] इत्यादिना सस्वरस्य जस्य लुग् वा ॥

७४. संस्कृतव्याकरणप्राकृतव्याकरणयोः प्रयुक्ताः प्रतिपादिता ये शब्दास्तैः कृतं गीतं यत्र आतोद्यिकानां मृदङ्गादिवादकानां प्राकारो मण्डलं यत्र तस्मिन् रङ्गे पुनः गुणिप्राकार आसीत् ॥ संगीतकाकर्णनाय समागतसमस्तलोकेपि प्रासादे रङ्गभूमौ विचक्षणा एव उपवेशिता इति पुनःशब्दार्थः ॥

७५. तत्र च रङ्गे कालायसं लोहजातिस्तेन समं कालायसाद् अधिकं च हृदयं यस्य स तथाविधो य आगतः स केलिकिसलया-शोककिशलयवत् रम्भाकङ्केलिदलवत् कोमलहृदय आसीत् ॥ चित्त-चमत्कारकारिजिनेन्द्रगुणस्फीतगीतश्रवणात् सोपि सार्द्रहृदयः संवृत्त इति यावत् ॥

वारण वायरण । पायारे पारो । आओ तत्थागओ । " व्याकरणप्राकारा-गते कगोः " [२६८] इति को गश्च लुग् वा ॥

कालायस कालास । किसलया किसल हिअओ । हिओ । " किसलय° " [२६९] इत्यादिना यस्य लुग् वा ॥

७६. दुर्गादेव्याः गौर्याः पादपीठं पादासनम् । अत्र च सामीप्यात्

जिण-पाय-वडण-गुरु-पा-वडणाइं चइअ तत्थ उब्भ-जणो
पुलयङ्कुरेहि कलिओ उउम्बरो उम्बरेहिं व ॥ ७७ ॥
जाव निवो कय-पूओ आरत्तिय-मङ्गलं न जा कुणइ।
ता देव-उले मरुवय-पूअं अणुसोइउं लग्गो ॥ ७८ ॥
मइ ताव देउलमिमं निम्मविअं सहल-जीविअमणेण।
सव्व-रिउ-कुसुम-पूआ नो जइ जीअं न मे सहलं ॥ ७९ ॥

चरणान्तिकम् इत्यर्थः। दुर्गादेवीशस्य पादपीठं मुक्त्वा गणा नन्दिवन्दि-प्रभृतयस्ते च ते ते गन्धर्वाश्च किंनरास्तद् गीतं श्रोतुं कर्णाञ्जलिभिः पातुम् अवस्तृता आगताः ॥

७७. जिनपादपतनगुरुपादपतनानि त्यक्त्वा तत्र रङ्गस्थाने ऊर्ध्व-जनः आसीत्। किंभूतः। पुलकाङ्कुरैः कलितो युक्तः। किंवत्। यथा उदुम्बरो जन्तुफलः उदुम्बरफलैरिति ॥

दुग्गावी दुग्गा-एवी। पा-वढि पाय-वीढं। पाय-वडण पा-वडणाइं। उउ-म्बरो उम्बरेहिं। "दुर्गादेवी°" [२७०] इत्यादिना दस्यान्तर्मध्ये लुग् वा। अन्तरिति किम्। दुर्गादेव्याम् आदौ मा भूत् ॥

७८. यावत् कृतपूजो नृपः तथा आरात्रिकेन[1] सहितं मङ्गलं आरात्रिकमङ्गलम्[2]। आरात्रिकं माङ्गलिक्यं चेत्यर्थः। न यावत् करोति तावद् देवकुले कुमारविहारे मरुबकपूजाम् अनुशोचितुं लग्नः। पूजा-विषयं पश्चात्तापं कर्तुं प्रवृत्तः ॥

७९. अनुशोचनमेवाह। मया तावद् देवकुलम् इदं निर्मापितम्। अनेन च सफलं जीवितं निर्मापितम्। मम चेत्यर्थात्। परं सर्वर्तु-कुसुमपूजा नो यदि चेन्न तदा जीवितं न मे सफलम् ॥ देवगृहविधाना-ज्जीवितं सफलमपि तथाविधपूजाया अभावाद् नातिशयेन सफलम् इति यावत् ॥

---

१ D आरत्रिकेन. २ D आरात्रिक°.

अह भणिअं खे सासण-देवीए एवमेव मा जूर ।
आवत्तमाण-जस तुममेमेअ किमेत्तमाण-मणो ॥ ८० ॥
गुणि-पावारय-पारय दुह-अड-चिन्तावडेसु मा पडसु ।
होही तुह उज्जाणं सइ सव्व-रिऊहि कय-कुसुमं ॥ ८१ ॥

८०. अथ इत्थं चिन्तानन्तरं खे गगनाङ्गणे शासनदेव्या भणितम् । आवर्तमानं त्रिलोक्यां बम्भ्रम्यमाणं यशो यस्य । तस्य आमन्त्रणम् । हे आवर्तमानयशः त्वम् एवमेव मा खिद्यस्व निरर्थकं मा दैन्ययुक्तो भव । तथा एवमेव किम् आवर्तमानमनाः सर्वर्तुकुसुमपूजा भविष्यति वा न वेति किं चिन्तापरचित्तः ॥

८१. खेदचिन्तयोर्निरर्थकत्वमेवाह । गुणिन एव प्रावारकाः पटास्तेषां प्रावारक अनुपमागणितगुणयुक्तत्वेन आच्छादक । दुःखं खेदः तदेव अवटश्च कूपः । चिन्ता अभीप्सितार्थं प्रति संदेहः सैव अवटश्च । तयोस्त्वं मा पत मा निमज्ज ॥ ननु किमिति भगवत्या एवं निषिध्यते तत्राह । तव उद्यानं भवेत् आरामवनं सदा सर्वकालं सर्वर्तुभिः कृतकुसुमं जनितप्रसूनं भविष्यति । मम प्रसादाद् इति शेषः ॥

जाव जा ता । ताव । देव-उले देउल । जीविअ जाअं । एवमेव एमेअ । आवत्तमाण अत्तमाण । पावारय पारय । अड चिन्तावडेसु । "यावत्तावः" [२७१] इत्यादिना यावदादिषु वकारस्य अन्तर्वर्तमानस्य लुग् वा ॥ अन्तरित्येव । एवमेवेति अन्त्यस्य न ॥

इति प्राकृतद्व्याश्रये महाकाव्ये अष्टमस्याध्यायस्य उदाहरण-
प्रतिपादनद्वारेण प्रथमः पादः संपूर्णः ॥

---

१ B किमित्त°; C किमेत्त°. २ D सय.

आरत्तियमह काउं मुक्क-मलो अपरिमुत्त-माउक्को।
तव-सत्तं गुण-सक्कं माउत्त-निहिं गुरुं पणओ ॥ ८२ ॥
विश्चुअ-डक्कोरग-दट्ठ-जीव-जीवाउ-चरण-रेणु-कणं।
लुक्क-कलिं लुग्ग-भवं तं समुपासिअ गओ राया ॥८३॥
लक्खण-पुण्णमखीणं अछीण-गमणं अझीण-तणु तेअं।
खन्धाइ-सत्त-पिहुलं पोक्खर-गन्धं धुवावत्तं ॥८४॥

८२. अथ अभीप्सितार्थसाधकशासनदेवीवचनानन्तरम् आरात्रिकं कृत्वा मुक्तमलः गतविकल्पकालुष्यः। अपरिमुक्तमृदुत्वः आर्जवयुक्तो राजा श्रीकुमारपालः तपसि "अणसणमूणोअरिआ" इत्यादिसिद्धान्तप्रसिद्धे शक्तं समर्थम्। तन्निष्ठम् इति यावत्। गुणेषु क्षान्त्यादिषु शक्तं मृदुत्वनिधिं गुरुं प्रणतः प्रणमति स्म ॥

८३. वृश्चिकदष्टाश्च उरगदष्टाश्च ये जीवास्तेषां[2] जीवातवो जीवनौषधानि चरणरेणुकणा यस्य। रुग्णः सावद्यव्यापारप्रध्वंसकत्वेन भग्नः कलिः कलहः कलिकालो वा येन। रुग्णभवं मुक्तपदवीप्रदाभयदानादिधर्मानुष्ठानविधापनेन निर्दलितचातुर्गतिकसंसारं तं गुरुं समुपास्य संसेव्य। तदन्तिके देशनाश्रवणादिधर्मानुष्ठानं कृत्वेत्यर्थः। राजा श्रीकुमारपालो गतः देवगृहान्निःसृतः ॥

"संयुक्तस्य" [१]। अधिकारोयम् "ज्यायाम् ईत्" [२.११५] इति यावत् ॥

मुक्क मुत्त। माउक्को माउत्त। सत्तं सक्कं। डक्को दट्ठ। लुक्क लुग्ग। "शक्त-मुक्त°" [२] इत्यादिना एषु को वा ॥

८४. अथ नृपाध्वारोहार्थम् आनीतस्य अश्वोरसस्य गाथासप्तकेन वर्णनम् आह। सप्तभिः कुलकम्। अश्वम् आरूढः। राजा इति प्रक्रमात्। कीदृशम्। लक्षणपूर्णं शालहोत्रशास्त्रोक्तसमस्तप्रशस्यचिह्नभृतम् अक्षीणं परिपूर्णसर्वाङ्गोपाङ्गम् अक्षीणगमनम् ॥

---

१ BC विश्चुअ°. २ BC जीवाश्च तेषां; D ते जीवास्तेषां.

खन्दपिउ-कन्द-सरिसावणीस-जुग्गं असुक्क-रोम-छविं ।
अणसुक्ख-मउलि-कुसुमं खेडय-जर खेडअङ्ग-रजं ॥८५॥

सिहि-सीह-वसह-वग्घाण हत्थि-हंसाण चास-नउलाण ।
तह तित्तिरस्स सरिसी सुहा गई होइ तुरयाण ॥

इति शास्त्रोक्तगतिसंपूर्णम् इत्यर्थः । अक्षीणतनुतेजसम् अन्यूनकायकान्तिम् । स्कन्धादिषु सप्तसु सप्तस्थानेषु पृथुलं विस्तृतम् । यदुक्तम् ।

वच्छ-यल-भाल-कक्खन्तराइँ तह कडिअ-खन्ध-गत्ताइं ।
पिहुलाइँ सत्त सुपसत्थ-पाय-पट्ठीय-सहियाइं ॥

पुष्करगन्धं कमलवत् सुरभिम् । यदुक्तम् ।

महु-कमल-कुट्ठ-कुङ्कुम-कयम्ब-कप्पूर-कुज्जय-सुअन्धा ।
घय-चन्दण-बिल्लोसीर-जाइ-गन्धा सुहा तुरया ॥

ध्रुवा ध्रुवनामानः आवर्ता दशसंख्या भ्रमरका यस्य स तथा तम् । यदुक्तम् ।

दो सीसे दुन्नि उरे इक्को भालम्मि फुरणए इक्को ।
दो रन्धे दो अवरन्धयम्मि इअ धुअ-दसावत्ता ॥
तुरय-मत्थइ बे जि आवत्त ते चन्द-सूरइं ।
पयड बिन्नि उरह अस्सिणि-कुमारइं ।
[2]वेयसन्नरु भाल-यलि वसइ ।
वाउ फुरणम्भिं[3] सारइ ।
रन्धह उवरन्धहँ[4] जि ठिअ बिण्णि बिन्नि आवत्त ।
तिहिँ तिहिँ कमि निवसहिँ सयल सोमि[5] विसाह पवित्त ॥
जो हीणो धूआवत्तएहिँ सो हीण-लक्खणो तुरओ ।
जो तेहिँ जुओ सो कुल कोसल-जस-सुक्ख-संजणणो ॥

८५. स्कन्दपितृस्कन्दाभ्यां श्रीकण्ठकार्तिकेयाभ्यां सदृशा ये अवनीशास्तेषां योग्यः अर्हः तम् । अशुष्का अरूक्षा । लावण्योपेतेति यावत् । इत्थंभूता रोम्णां छविः कान्तिर्यस्य । अशुष्कमौलिकुसुमं सार्द्रशिरोमाल्यम् । श्वेटकज्वरस्फेटकं देवताधिष्ठितत्वेन विषतापविध्वंसकम् अङ्गरजो यस्य स तथा तम् ॥

---

१ BCD निउ°. २ C वेय°. ३ BC °म्गि. ४ B उवरंध. ५ D सामि.

थाणु-पिया-जल-पुण्णं अखाणु-वायं जणेहि दीसन्तं ।
पडिखम्भिअट्ट-थम्भय-थम्भिअ-तणु-ठम्भिअच्छेहिं ॥ ८६ ॥
रग्गं पिग-रत्त-सरं रवि-हय-सुक्कं व नील-किच्चि-छविं ।
सुङ्ग-करणग्ग-चच्चर-चइत्त-ठिअ-दिट्ठि-दुच्चज्जं ॥ ८७ ॥
पच्चूहा पच्चूसं पि पञ्च-धारासु अकय-णिव्वेअं ।
णच्चा बुज्झा पिच्छीइ वाणिअं सिक्ख-विज्जं ति ॥ ८८ ॥

८६. स्थाणोः ईश्वरस्य प्रिया गङ्गा तस्या यज्जलं तद्वत् पुण्यम् । अविद्यमानः स्थाणौ पातो यस्य जात्यत्वात् तम् । यद्वा अस्थाणुवातं रोगविशेषरहितम् । प्रतिस्तम्भिता इव तत्क्षणे तदङ्गसङ्गाद् दत्तान्यस्तम्भा इव ये अट्टानां हट्टानां स्तम्भकास्तेषु स्तम्भिता अवष्टब्धास्तनवो यैस्ते च ते स्तम्भिताक्षाश्च निश्चलनेत्रास्तैर्जनैर्दृश्यमानं भ्रूक्षेपम् ईक्ष्यमाणम् ॥

८७. रक्तं सादिशिक्षास्वनुरक्तम् । पिकवद् रक्तः कलः । गम्भीर इत्यर्थः । एवंभूतः स्वरो हेषारवो यस्य स यथा तम् । यदुक्तम् ।

अच्छिन्न-गाहिर-सद्दा सुपसत्था हयवरा हुन्ति ॥

नीलकृत्तिच्छविं नीलवर्णत्वक्कान्तिम् । यदुक्तम् ।

सेअङ्ग-सामकन्नो अण्णो जो सेअ-चरण-नयणो य ।
सिअ-केसरो अ नीलो ते तिण्णि वि सुप्पसत्थाइं ॥

अत उत्प्रेक्ष्यते । रवेर्ये हया अश्वास्तेषां शुल्कमिव दानमिव । यथा अन्यो वणिग् मण्डपिकायां दानं दत्त्वा चलति तथा रविणापि एतद्देशोपरि विचरता एतद् अनुष्ठितमेवेत्यभिप्रायः । शुल्ककरणस्य मण्डपिकाया अग्रे चत्वरे बहुमार्ग्यां चैत्येषु देवकुलेषु [च] स्थितानां दृष्टिभिर्दुस्त्यजम् । कौतुकाद् निर्निमेषम् ईक्ष्यमाणम् इत्यर्थः ॥

८८. प्रत्यूषात् प्रत्यूषमपि । प्रतिप्रभातम् इत्यर्थः । पञ्चधाराः ।

---

१ C पच्चूसेवि; पच्चूसा पच्चूसं पि. २ From °क्ष्यते C wants the Commentary and grammer (not the text), up to लि° in लिच्छूहिं under 91 as also the couplet 91. See note 2 on page 76. ३ B प्रत्यूषेपि.

विञ्छुअ-अहिविञ्छिअ-अच्छीविस-विस-हरण-छेत्त-सेअ-जलं।
खुर ताडण-अखम-छमं रिक्ख-पवङ्गेस-सम-वेगं ॥ ८९ ॥
अवि रिच्छ-सरिच्छेहिं सणिच्छयं सच्छणं च लोएंहि।
अच्छी-पच्छं लिच्छूहिं पेच्छिअं आसमारूढो ॥ ९० ॥

आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम्।

इति गतिविशेषाः। तासु अकृतनिर्वेदम्[1]। तत्रासक्तम् इत्यर्थः। तथा ज्ञत्वाद् विचक्षणत्वाद् बुद्ध्वा अवगम्य पृथ्व्या पृथ्वीस्थजनेन वर्णितं श्लाघितम्। कथम्। शिक्षया विद्वान् इति सर्वगतिकरणनिपुण इति ॥

८९. वृश्चिकाश्च घुणाः। अहिमूत्रोद्भवा वृश्चिका अहिवृश्चिकाश्च तीव्रविषघुणविशेषाः[3]। अक्षिषु विषं येषां ते च ते अक्षिविषाः सर्पविशेषाः। तेषां यद् विषं गरलं तस्य हरणं ध्वंसकं क्षेत्रस्य शरीरस्य स्वेदजलं घर्माम्बु यस्य। खुराणां ताडने आघाते अक्षमा असमर्था। वेपमानेति यावत्। इत्थंभूता क्षमा पृथिवी यस्मात्। ऋक्षाश्च जाम्बवदादयः। प्लवङ्गाश्च हनूमदादयः। तेषाम् ईशः सुग्रीवः तेन समवेगं तुल्यत्वरितगतिम् ॥

९०. ऋक्षसदृक्षैरपि चापल्याद् अच्छभल्लकल्पैरपि सनिश्चयम् एकाग्रचित्तम्। यद्वा ऋक्षसदृक्षैरपि चञ्चच्चारुहारादिमनोहरत्वेन तारककल्पैरपि सक्षणं सोत्सवं च यथा भवति एवम् अक्षिपक्ष्यं लिप्सुभिर्लोकैः प्रेक्षितम्।

लक्खण अखीणं। "क्षः खः°"[३]इति क्षस्य खः॥ क्वचित्तु छझावपि। अच्छीण। अझीण ॥

---

१ C लोगेहिं. २ B निर्वेदः. ३ B °घुणशेषाः. ४ B छत्सावपि.

धवलगेहमइ-निच्चलाकिदी वच्छलो चुलुग-वंस-दीवओ ।
तच्च-देवय-वरेण तक्खणोसारिआखिल-दुहो पहुत्तओ ॥ ९१ ॥

खन्धाइ । पोक्खर । "ष्कस्कयोर्नाग्नि" [४] इति खः ॥

खन्द कन्द । असुक्क अणसुक्ख । "शुष्कस्कन्दे वा" [५] इति खो वा॥

खेडय । खेडअ । "श्वेटकादौ" [६] इति खः ॥

अखाणु । "स्थाणावहरे" [७] इति खः । अहर इति किम् । थाणु ॥

पडिखम्भिअं[1] अट्ट-थम्भय । "स्तम्भे स्तो वा" [८] इति स्तस्य खः ॥

थम्भिअ । ठम्भिअ । "थठावस्पन्दे" [९] इति स्तम्भे स्तस्य थठौ ॥

रग्गं रत्त । "रक्ते गो वा" [१०] इति गो वा ॥

सुक्कं सुज्ज । "शुल्के ज्जो वा" [११] इति ज्जो वा ॥

किच्चि । चच्चर । "कृत्तिचत्वरे चः" [१२] इति चः ॥

दुच्चजं । "त्योऽचैत्ये" [१३] इति त्यस्य चः । अचैत्य इति किम् । चइत्त॥

पच्चूहा[2] पच्चूसे । "प्रत्यूषे षश्च हो वा" [१४] इति त्यस्य चः । तत्संनियोगे षस्य हो वा ॥

णच्चा । बुज्झा । पिच्छीइ । विजंति । "त्वथ्वद्ध्वां चछजझाः क्वचित्" [१५] । एषां यथासंख्यम् एते क्वचित् ॥

विच्छुअ विच्छिअ । "वृश्चिके श्चेश्छुर्वा" [१६] इति च्छुः ॥

अच्छी । छेत्त । सरिच्छेहिं । अच्छी । "छोऽक्ष्यादौ" [१७] इति खस्या-पवादश्छः ॥ आर्षे तु इक्खू । खीरं । सारिक्खं[3] । इत्याद्यपि दृश्यते ॥

छमं । "क्षमायां कौ" [१८] इति छः । काविति किम् । अखम ॥

रिक्ख रिच्छ । "ऋक्षे वा" [१९] इति छो वा ॥

९१. अतिनिश्चलाकृतिः अतिस्थिरस्वभावः वत्सलः जीवदया-प्रवर्तकत्वात् सर्वजनीनः चौलुक्यवंशस्य प्रकाशकत्वाद् दीपक इव तथ्यः सत्यो यो देवतायाः शासनदेवताया वरः । होही तुह उज्जाणं

---

१ B पडिखंभि. २ D पच्चूहा पच्चूसं. ३ B श्चेश्चुर्वा. ४ BD सरिक्खं.

सइ सव्व-रिऊहिं कय-कुसुममिति [८१] प्रसादस्तेन कर्त्रा तत्क्षणे तस्मिन्नेव काले उत्सारिताखिलदुःखः अपगतसमस्ताचिन्तः धवलगेहं प्रासादं प्राप्तः । राजेति शेषः ॥ वैतालीयापरान्तिका छन्दः । वदनकं[1] वा छन्दः । "तच्च-देवय-वरेण" इति उत्तरसर्गार्थसूचनम् ॥

सच्छणं । "क्षण उत्सवे" [२०] इति छः । उत्सव इति किम् । तक्खणो॥

सणिच्छयं । पच्छं । लिच्छूहिं[2] । वच्छलो । "ह्रस्वात् थ्यश्चत्सप्साम् अनिश्चले" [२१] इति ह्रस्वात् परेषाम् एषां छः । अनिश्चल इति किम् । निच्चला ॥ आर्षे तथ्ये चोपि । तच्च ॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृताद्व्याश्रयमहाकाव्यवृत्तौ द्वितीयः सर्गः समाप्तः ॥

---

१ BD have षचचाद्दो वदनकमिति before वदनकं २ See note 2 on page 73.

तृतीयः सर्गः

कय-वम्मह-सामच्छं वर-सामत्था कओसवमुऊहि ।
नयणोच्छवमुज्जाणं गओ निवो उच्छुओ दट्ठुं ॥ १ ॥
जय-छिह-ऊसुअ-मयणो अवज्ज-निप्पिह-सभज्ज-जुव-लोओ ।
अलि-सेज्ज-चूअ-कलिओ तओ पयट्टो वसन्त-उऊ ॥ २ ॥

१. कृतमन्मथसामर्थ्यम् उद्दीपनविभावत्वाज्जनितकन्दर्पप्रकर्षम् वर-सामर्थ्यात् देवताप्रसादोत्कर्षाद् ऋतुभिर्वसन्ताद्यैः कृतोत्सवं युगपत् तत्तत्पुष्पफलप्रवालपटलैः प्रारब्धमहामहिम । नयनानां रम्यत्वाद् उत्सवम् उद्यानं क्रीडाकाननम् उत्सुकः सोत्कण्ठो नृपो द्रष्टुम् ईक्षितुं गतः ॥

२. तत्र युगपत् सर्वर्तुप्रादुर्भावेपि वाचः क्रमवृत्तित्वाद् ऋतुषु च वसन्तस्य सम्राट्कल्पत्वाद् अष्टाशीत्या गाथाभिरादौ तमेव वर्णयति ॥ जयस्पृहायां धर्मार्थादिपराभवेच्छायाम् उत्सुको मदनो यत्र । अवद्ये कुव्यापारे निःस्पृहाः विमुखाः सभार्या युवलोकास्तरुणपुरुषा यत्र । अलिशय्या भ्रमरवसतयो ये चूता आम्रवृक्षास्तैः कलितः । ततः देवतावरानन्तरं वसन्तऋतुः प्रवृत्तः ॥

सामच्छं सामत्था । कओसव नयणोच्छव । उच्छुओ ऊसुअ । " सामर्थ्यो-त्सुकोत्सवे वा " [२२] इति छो वा ॥

छिह । " स्पृहायाम् " [२३] इति फस्य अपवादश्छः ॥ बाहुलकात् क्वचिद् अन्यदपि । निप्पिह ॥

अवज्ज । सभज्ज । सेज्ज । " द्यर्य्यर्यो जः " [२४] इति एषां जः ॥

अहिमज्जु-जणय-अहिमञ्जु-माउ-भायाहिमन्नु-पमुहाण ।
अहिउच्चिआसि मयणो अणवञ्झासज्झ-कुसुम-सरो ॥ ३ ॥
गय-सज्झसस्स मयरद्धयस्स कुसुमज्झओउ-दुइअस्स ।
कङ्केल्लि-पल्लव-मिसा आसि पयावो समिज्झन्तो ॥ ४ ॥
पट्टण-वहु-वलयाइअ-वट्ट-पयट्टालि-मण्डलो चूओ ।
पवण-कवट्टिअ-कुसुम-रज-सुरहि-महि-मट्टिओ जाओ ॥ ५ ॥

३. अभिमन्युजनकश्च अर्जुनः अभिमन्युमातृभ्राता बलदेवः अभिमन्युश्च ते प्रमुखा धुर्या येषां वीराणां ते तथा तेभ्यः अवन्ध्याः कार्यसाधकत्वेन सफलाः असह्याः क्षन्तुम् अशक्याः कुसुमान्येव शरा यस्य स तथाभूतो मदनः अधिक एव त्रैलोक्यवशवर्तिकारित्वेन अभ्यर्हित एवासीत् ॥ अधिकापेक्षया अनुपात्तक्रियेपादाने पमुहाणेति पञ्चमीप्रासौ " क्वचिद् द्वितीयादेः " [३. १३४] इति षष्ठी ॥

अहिमज्जु अहिमञ्जु । " अभिमन्यौ जञ्ञौ वा " [२५] इति जो ञश्च वा। पक्षे । अहिमन्नु ॥

४. गतसाध्वसस्य स्वरिपोरीश्वरस्यापि तदाज्ञाविधायित्वेन निर्भयस्य मकरध्वजस्य कुसुमान्येव ध्वजचिह्नं यस्य स चासौ ऋतुश्च स द्वितीयो यस्य । वसन्तर्तुयुक्तस्येत्यर्थः । कङ्केल्लिपल्लवमिषात् प्रतापः समिन्धान समन्ताद् दीप्यमान आसीत् ॥ प्रतापो हि आरक्तो वर्ण्यते । अशोककिशलयानि च तथा । इतीत्थम् उत्प्रेक्ष्यन्ते ॥

अणवञ्झ । असज्झ । सज्झसस्स । "साध्वसश्वभ्रां झः"[२६] इति झः॥
द्धयस्स °ज्झओ । " ध्वजे वा " [२७] इति झो वा ॥
समिज्झन्तो । " इन्धौ झा " [२८] इति इन्धौ धातौ झा ॥

५. पत्तनमेव वधूः कान्ता तस्या वलयायितं कङ्कणवद् आचरितम् यतः वृत्तं यथा भवति एवं प्रवृत्तं गन्तुम् उद्यतम् आलिमण्डलं

कामिणि-धुत्तिम-वत्ता-निवत्तणो वल्लि-नट्टईण नडो ।
पयडिअ-वम्मह-वट्टो सिढिलिअ-वासन्तिआ-वेण्टो ॥ ६ ॥
विरहिणि-विसण्ठुलट्ठी-करणो रइणाह-रइ-महु-चउट्ठो ।
कामट्ठत्थो सुहओ चउत्थ-पुरिसत्थगाणं पि ॥ ७ ॥
ठीणम्बु-सीअलो थीण-चूय-लट्ठि-महु-बिन्दु-चुम्बणओ ।
वम्मह-संदट्टेसुं इट्ठाघाओ महुट्ठिअओ ॥ ८ ॥

यस्मिन् । पवनेन कदर्थितानि प्रेङ्खोलितानि यानि कुसुमानि तेषां यद् रजः परागस्तेन सुरभिः सुगन्धिर्मही मृत्तिका यस्मात् स तथाभूतश्चूतो जातः ॥

पट्टण । वट्ट । पयट्ट । कवट्टिअ । मट्टिओ । "वृत्तप्रवृत्त°"[२९] इत्यादिना टः॥

६. गाथादशकेन वसन्तर्तुसर्वस्वभूताः[1] सुरभिशीतमृदुगुणयुक्ता मलयानिला वर्ण्यन्ते ॥ दशभिः कुलकम् । पर्यस्तलतम् इतस्ततः प्रेङ्खोलितशाखं यथा भवति एवं मलयानिलो वातो वाति स्म । कीदृशः । कामिनीनां धूर्तत्ववार्तायाः मानहेतुप्रावीण्य[3]वृत्तान्तस्य निषेधकः । मलयानिले हि वाति निर्विचारं तासां प्रियाभिसरणात् । वल्लय एव नर्तक्यस्तासु नटः पल्लवकरप्रेङ्खकत्वेन नृत्योपाध्यायः । प्रकटितमन्मथवार्तः प्रख्यापितकन्दर्पोदन्तः शिथिलितानि कम्पनाद् अदृढीकृतानि वासन्तिकावृन्तानि माधवीलताप्रसव[4]बन्धनानि येन स तथा ॥

७. विरहिणीनाम् अचैतन्याङ्गसादादिकृत्त्वेन विसंस्थुलास्थिकरणः । रतिनाथरतिमधूनां कन्दर्पतत्प्रियावसन्तानां पृष्ठानुचरत्वेन चतुर्थः । कामस्य अर्थः प्रयोजनम् अर्थो धनं यस्य । चतुर्थपुरुषार्थगानामपि मोक्षमार्गप्रवृत्तानामपि शरीरसंतापनिर्वापणात् सुखदः ॥

८. स्त्यानाम्बु हिमं तद्वच्छीतलः । स्त्याना घना ये चूतयष्टिमधुबिन्दवः आम्रलतामकरन्दविप्रुषः तेषां चुम्बनः अन्तर्वहनात् स्पर्शकः ।

---

१ BC °सर्वर्तु° २ BC माने हेतु°. ३ C °प्रावीण्यं. ४ C °प्रसूनप्रसव°

मुह-गड्ड-निबुड्डेहिँ व उच्च-विअड्डि-ट्ठिएहिँ पिज्जन्तो ।
छड्डिअ-मलउज्जाणो मड्डिअ-वेइल्ल-विच्छड्डो ॥९॥
रय-संमड्ड-सम-हरो कवाड्डि-सिर-सरिअ-सलिल-सीअलओ।
लंघिय-गड्डहवाहण-पुरो मयण-गद्दहिअ-लोओ ॥१०॥
मलयाचल-कण्डलिआ-आउह-सालाउ भिण्डिवालो व्व ।
ठड्ढेण वुड्ढ-जग-जय-छिहाइ गहिओ महु-भडेण ॥११॥

मन्मथसंदष्टेषु इष्टाघातः कामार्तप्राणिपीडाप्रद इत्यर्थः । मधोर्वासन्तस्य कार्यकरणाद् औष्ट्रिकः । भृत्य इत्यर्थः ॥

९. मुखस्य गर्तोपचाराद् बाहुल्यम् । तत्र निमग्नैरिव । अनवरत-सुरतव्यासक्तैरित्यर्थः । उच्चा चासौ वितर्दिश्च वेदिस्तत्र स्थितैर्मत्तवारण-भूमिगतैः पीयमानो रतक्लमापनोदार्थं सेव्यमानः । छर्दितं तदानीं दक्षिणस्या उत्तरस्यां गमनाद् वान्तम् । त्यक्तम् इत्यर्थः । मलयोद्यानं येन । मर्दितः अन्तर्भ्रमणेन कदर्थितः विचकिलानां विच्छर्दो विस्तारो येन स तथा ॥

१०. रतसंमर्दात् सुरतासक्तेः श्रमः खेदस्तस्य हरो विध्वंसकः । यतः किंभूतः । कपर्दी ईश्वरः तस्य यच्छिरस्तत्र या सरिद् गङ्गा तस्या यत् सलिलं तद्वत् शीतलः । लङ्घितं गर्दभवाहनस्य रावणस्य पुरं लङ्काख्या नगरी येन । मदनेन गर्दभितो गर्दभवद् आचरति स्म लोको यत्र स तथा ॥

११. मलयाचलकन्दरिकैव आयुधशाला तस्यां भिन्दपालः शस्त्र-विशेषः स इव स्तब्धेन साहंकारेण वृद्धा महती या जगज्जयस्पृहा तया मधुभटेन वसन्तवीरेण गृहीतः ॥

दड्ढोज्जीविअ-मयणो विरहिणि-नीसास-वुड्ढि-परिविद्धो।
अविअड्ढ-असड्ढ-अणिड्ढीणं पि विइण्ण-रइ-सद्धो ॥ १२ ॥
रिद्धिं पत्तो कम्पिअ-लवली-मुड्ढो वसन्त-मुद्धन्नो।
अड्ढद्धीकय-माणिणि-माणो पज्जुण्ण-दिण्णाणो ॥ १३ ॥
पण्णास-गुणं मयणं पण्णरह-गुणं महुं च पयडन्तो।
मन्तुमइ-मन्नु-दलणो समत्त-लय-तम्ब-वित्थरणो ॥ १४ ॥
अविरहि-विरहि-थवातव-पत्तं पल्लत्थ-लयमपल्लट्टो।
उच्छाहकरोणुत्थारयाण मलयाणिलो वाऊ ॥ १५ ॥

१२. दग्धोपि ईश्वरतृतीयनेत्रार्चिषा भस्मसात्कृतोपि उज्जीवितः शरीरीकृतो मदनो येन विरहिणीनिःश्वासवृद्ध्या परिवृद्धः विस्तृतः। अविदग्धाश्च कामप्रवृत्तौ अनिपुणाः अश्रद्धाश्च तदनिच्छवः अनृद्धयो दरिद्रास्तेषामपि वितीर्णरतिश्रद्धः उत्पादितसुरताभिलाषः ॥

१३. ऋद्धिं सौरभ्यादिसंपदं प्राप्तः कम्पिता अन्दोलिता लवली-लतानां मूर्धानः शिरांसि येन। वसन्ते[1] मूर्धन्यः प्रधानः। अर्धार्धीकृतः रतोत्कण्ठाकरणात् खण्डशो[2] विहितो मानिनीनां मानो येन। प्रद्युम्नस्य कन्दर्पस्य दत्ता आज्ञा येन। जनानाम् इति शेषः। कन्दर्पराज्यम् अधुना जनेषु उदघोषयद् इत्यर्थः ॥

१४. पञ्चाशद्गुणं मदनं पञ्चदशगुणं मधुं च प्रकटयन्। तयोराधिक्यं जनयन्नित्यर्थः। मन्युमतीनां प्रियविप्रियेण सक्रोधानां प्रेयसीनां मन्यु-दलनः। सख्यादिचाटुकारम् अन्तरेणापि प्रसादनकारक इत्यर्थः। समस्तलतास्तम्बानां विस्तरणः अनुकूलत्वेन वृद्धिजनकः ॥

१५. अविरहिणश्च युवतियुक्ताः विरहिणश्च तद्विपरीताः। तेषां

---

१ B omits 'वसन्ते...आज्ञा येन. २ C संखत्सो; B wanting.

स्तवास्तवयोः शीतसंतापोद्दीपकत्वेन प्रशंसाप्रशंसयोः पात्रम्। पर्यस्ता लता यस्मिन् कर्मणि तथा अपर्यस्तः। इतरवायुभिरसंमिश्र इति भावः। अनुत्साहानां कामार्थे अनुद्यमानाम् उत्साहकरः आसक्तिजनकः॥

नट्टईण। "र्तस्याधूर्तादौ" [३०] इति र्तस्य टः। अधूर्तादाविति किम्। धुत्तिम। वत्ता। निवत्तणो॥ बाहुलकाद् वट्टो॥

वेण्टो। "वृन्ते ण्टः" [३१] इति ण्टः॥

विसण्ठुलट्ठी। "ष्ठोऽस्थिविसंस्थुले" [३२] इति ठः॥

चउट्ठो चउत्थ। अट्ठत्थो। पुरिसत्थ। ठीण थीण। "स्यानचतुर्थार्थे वा" [३३] इति ठो वा। परम् अर्थशब्दे व्यवस्थितविभाषया ठत्वम्। धनार्थे न भवति॥

लट्ठि। "ष्टस्यानु°" [३४] इत्यादिना ष्टस्य ठः। अनुष्टेष्टासंदष्ट इति किम्। संदट्ठेसुं। इट्ठा। महुट्ठिअओ॥

गड्ढु। "गर्ते डः" [३५] इति र्तस्य डः। टापवादः॥

विअड्ढि। छड्ढिअ। मड्ढिअ। विच्छड्डो। संमड्ढु।। कवड्ढि। 'संमर्द°"[३६] इत्यादिना र्दस्य ड्ढत्वम्॥

गड्ढह गद्दहिअ। "गर्दभे वा" [३७] इति र्दस्य ड्ढो वा॥

कण्डलिआ। भिण्डिवालो। "कन्दरिकाभिन्दिपाले ण्डः" [३८] इति ण्डः॥

ठड्ढेण। "स्तब्धे ठढौ" [३९] इति यथाक्रमं ठढौ॥

वुड्ढु। दड्ढो। वुड्ढि। अविअड्ढ। "दग्ध°" [४०] इत्यादिना ढः॥ क्वचिन्न। परिविद्धो॥

असड्ढ सद्धो। अणिड्ढीणं रिद्धिं। मुड्ढो मुद्धओ। अड्ढद्धी। "श्रर्द्धि°" [४१] इत्यादिना ढो वा॥

पज्जुण्ण। आणो। "म्रज्ञोर्णः" [४२] इति णः॥

दिण्णा। पण्णास। पण्णरह। "पञ्चाशत्पञ्चदशदत्ते" [४३] इति णः॥

मन्तु मन्नु। "मन्यौ न्तो वा" [४४] इति न्तो वा॥

---

१ BC सात°. २ BC omit 'पर्यस्ता...तथा'. ३ BC omit मुड्ढो.

भमरालिद्धे झसचिन्धय-चिण्हे आसि सिन्दुवारम्मि।
भस्सिय-झसिन्ध-जीवाउ-भप्प-चुन्नं किर पराओ ॥ १६ ॥
अप्पाणत्ता मुक्को भरियप्प-पिएहि पहिअ-सत्थेहिं।
कङ्किल्लि-कुम्पलं रुप्पिणि-सुअ-बाणं व दट्ठूण ॥ १७ ॥
रुच्चिम-निव-सरिस-जोव्वण-गुणेहि तस्सिं कया जुआणेहि।
पुप्फिअ-असोअ-विपिणे परोप्पर-प्फद्धमन्दोला ॥ १८ ॥

वित्थरणो। "स्तस्य°" [४५] इत्यादिना स्तस्य थः। असमस्तस्तम्ब इति किम्। समत्त। तम्ब ॥

थवातव। "स्तवे वा" [४६] इति स्तस्य थो वा।

पल्लत्थ पल्लट्टो। "पर्यस्ते थट्टौ" [४७] इति पर्यायेण थट्टौ ॥

उच्छाह अणुत्थारयाण। "वोत्साहे थो हश्च रः" [४८] इति थो वा। तत्संनियोगे च हस्य रः ॥

१६. भ्रमरैरालिष्टे सौरभ्यलोभाद् आलिङ्गिते झषचिह्नकस्य कामस्य चिह्ने उत्कण्ठादायकत्वेन व्यञ्जके सिन्दुवारे निर्गुण्डे भस्मितः समाधिभङ्ग-प्रकुपितोऽयम्बकतृतीयनेत्रज्वाज्वल्यमानज्वलनज्वालया भस्मसात्कृतो यो झषचिह्नस्तस्य जीवातोर्जीवनौषधस्य भस्मसदृशचूर्णमिव संभाव्यते परागः॥

आलिद्धे। "आश्लिष्टे लघौ" [४९] इति यथासंख्यं लघौ ॥

चिन्ध झसिन्ध। "चिह्ने न्धो वा" [५०] इति न्धः। ण्हापवादः। पक्षे सोपि। चिण्हे ॥

१७. रुक्मिणीसुतबाणमिव जगन्मोहनात् पञ्चशरशरमिव कङ्केल्लि-कुड्मलम् अशोकाविकसितकुसुमं तत्प्रवालं वा दृष्ट्वा स्मृता सौस्थ्याय अनुध्याता आत्मप्रिया यैस्ते तथा तैः पथिकसार्थैः आत्मनः आत्मा स्वजीवो मुक्तः। ते तदा तद्दर्शनात् क्षोभेण मृता इत्यर्थः ॥

भस्सिय भप्प। अप्पाणत्ता अप्प। "भस्मात्मनोः पो वा" [५१] इति इति पो वा ॥

१८. पुष्पिताशोकविपिने तस्मिन् उद्याने रुक्मी रुक्मिणीभ्राता

१ D जाज्वलज्ज्वलन°.

सो वि बुहप्फइ-सीसो बुहप्पई सो वि तत्थ ओच्छरिओ ।
निप्पहिअ-तिअस-लीलं दोला-लीलोसवं दट्ठुं ॥ १९ ॥
विरहिअ-भिप्फं असिलिम्ह-कण्ठयं विगय-सेफ-कण्ठेहिं ।
तम्बम्ब-दलोत्तंसं दोलिर-तरुणीहि अह गीअं ॥ २० ॥

स चासौ नृपश्च तेन सदृशं यौवनं गुणाश्च येषां तैर्युवभिः परस्परम् अन्योन्यं स्पर्धा अभिभवेच्छा यत्र तद् यथा भवति एवम् अन्दोल्यते अस्याम् इत्यन्दोला प्रेङ्खा कृता ॥

कुम्पलं । रुप्पिणि । "ङ्मोः" [५२] [इति]पः ॥ क्वचित् न्मोपि । रुक्मि ॥

१९. अथ वसन्तक्रीडापीडं दोलाविलासं गाथाष्टकेन वर्णयति । सोपि भूमण्डलाखण्डलत्वेन प्रसिद्धोपि बृहस्पतेः बृहस्पतिनामोपाध्यायस्य शिष्यः श्रीकुमारपालनृपः सोपि तदुपाध्यायत्वेन विशदप्रज्ञार्द्धियुक्तत्वेन च उत्कृष्टोपि बृहस्पतिः तत्र उद्याने निष्प्रभिताः स्वातिशयात् पराभूतास्त्रिदशानां लीलाः क्रीडा येन तत् तथाभूतं दोलालीलोत्सवं द्रष्टुम् अवस्तृतः आगतः । अपिशब्दः समुच्चये ॥

पुप्फिअ । °प्फद्ध । "ष्पस्पयोः फः" [५३] इति फः ॥ बाहुलकात् क्वचिद् वा । बुहप्फइ । बुहप्पई ॥ क्वचिन्न । परोप्पर । निप्पहिअ ॥

२०. विरहितं त्यक्तं भीष्मं श्रुतिकटुकत्वं येन तत् । सुकुमारम् इत्यर्थः । अथवा विरहितानां वियुक्तानां भीष्मं भयावहं विरहोद्दीपकत्वात् । अविद्यमानः श्लेष्मा कफो यत्र स तथा एवंभूतः कण्ठो यत्र । ताम्राणि यान्याम्रदलानि तेषाम् उत्तंसः आपीडो यत्र तद् यथा भवति एवम् । विगतश्लेष्मकण्ठैः । तरुणैः सहेत्यर्थात् । दोलयन्तीत्येवंशीला दोलयिष्यः । ताश्च ताः तरुण्यस्ताभिः अथ दोलाध्यारोहानन्तरं गीतं गीयते स्म ॥ कान्तैः सह दोलाध्यारूढाभिस्तरुणीभिर्गीतं कृतम् इत्यर्थः ॥

---

१ BC स्पर्धा यत्र अन्दोलने तद्.

अखलिअ-जिब्भं पइ-नाम पुच्छिआ तत्थ खलिअ-जीहाओ ।
मय-विहलाहिं मय-भिब्भलाओ लट्ठीहि विब्भलिआ॥२१॥
उब्भमणुद्धं च ठिआ दोलासुं विज्ज-विजिय-कम्हारा ।
कम्भारजम्म-पीवल-कर-जुग्गय-चरण-जुम्माओ ॥ २२ ॥
कय-बम्भचेर-भङ्गा सुन्देरेणं स-ब्रम्हचरिआण ।
चल-नेउर-जय-तूराहिअ-सर-सोडीर-धीराओ ॥ २३ ॥

भिष्मं । " भीष्मे ष्मः " [५४] इति ष्मस्य फः ॥
असिलिम्ह सेफ । " श्लेष्मणि वा " [५५] इति ष्मस्य फो वा ॥
तम्बम्ब । " ताम्राम्बे म्बः " [५६] इति मयुक्तो बः ॥

२१. षड्भिः कुलकम् । धरणिबृहस्पतिशिष्येण पृथ्वीपुरंदरेण । राज्ञेत्यर्थः । सकलकलाकौशले बृहस्पतिना सुराचार्यसदृशेन उपनतानि आरामिकैर्ढौकितानि वनस्पतीनि वनस्पतिफलानि यस्य स तथा । तेन वनस्पतिवने वृक्षवने । वनं जलाद्यपीति तद्व्यवच्छेदार्थं वनस्पतिग्रहणम् । वनिता अङ्गना दृष्टाः ॥ कीदृश्यः । स्खलिताः पतिपुरतः पतिनामप्रच्छनोद्भूतलज्जया अविस्पष्टा जिह्वा रसना यासां तास्तथा । यतो मदेन क्षीबतया विह्वला विसंस्थुला यष्टिभिर्यष्टिघातैः कृत्वा विह्वला व्याकुलीकृता अस्खलितजिह्वम् । व्यक्तम् इत्यर्थः । एवं तत्र उद्याने मदविह्वलाभिः । वयस्याभिरिति गम्यते । पतिनाम पृष्टाः ॥

२२. विद्यया जितकाश्मीराः[1] कलाकौशल्येन विजितसरस्वतीदेशकश्मीरपण्डिताः । कश्मीरजन्मना कुङ्कुमेन पीतं पीतवर्णं करयुग्मं चरणयुग्मं च यासां ताः । तथा दोलासु प्रेङ्खासु उर्ध्वम् अनूर्ध्वं च स्थिताः ॥ काश्चिद् उपविष्टा अन्दोलयन्ति काश्चिद् ऊर्ध्वा एवेति भावः ॥

२३. सब्रह्मचर्याणां नियमितमैथुनसेवानां सौन्दर्येण अङ्गोपाङ्ग-

१ D °कश्मीराः.

धिज्ज-गुरु-घुम्मण-समुन्नय-पय-पेरन्त-हणिअ-पज्जन्ते ।
खण-पुप्फिए असोए अच्छेरस्स वि कयच्छरिआ ॥ २४ ॥
अच्छअर-सोअमल्ला कयच्छरीआ पिअच्छरिज्जाण ।
पल्लत्थ-दीहरोरुअमभिपल्लाणिअ-पिअ-कडीओ ॥ २५ ॥

द्भुतरम्यत्वेन कृत्वा कृतब्रह्मचर्यभङ्गा जनितब्रह्मव्रतलोपाः । चला नूपुरा एव जयतूर्याणि तैः आहिते स्मरस्य शौण्डीर्यं च पराक्रमो धैर्यं च अकातरत्वं यकाभिः ॥ वीराणां हि जयतूरश्रवणात् समराय उत्साह-धैर्ये प्रादुर्भवतः तथा मञ्जीरझङ्कारे च स्मरस्य अत्यन्तोल्लासाद् इत्थम् उक्तिः ॥

२४. धैर्येण गुरुघूर्णनं बहुभ्रमणं यस्य स चासौ समुन्नतपादश्च तस्य पर्यन्तेन प्रान्तेन हतः पर्यन्तो यस्य । अत एव क्षणपुष्पिते तत्काल-मेव संजातकुसुमे अशोके सति । आश्चर्ययोगात् पुमानप्याश्चर्यः । तस्यापि तादृक्कान्तादर्शनेन सकौतुकस्यापि कृताश्चर्याः । तत्कालं स्व-पादप्रहारमात्रेण अशोकपुष्पोत्पादनेन जनितकौतुकान्तरा इत्यर्थः ॥

२५. आश्चर्यम् अत्यद्भुतं सौकुमार्यं मृदुत्वं यासाम् । प्रियाश्चर्या-णां कृताश्चर्याः उत्पादितकुतूहलाः । पर्यस्तौ पार्श्वतः क्षिप्तौ दीर्घौ ऊरू सक्थिनी यत्र इत्येवम् अभिपर्याणिताः पल्ययनीकृताः प्रियाणां कट्यो यकाभिस्तास्तथा ॥

जिब्भं जीहाओ । " ह्वो भो वा " [५७] इति ह्वस्य भो वा ॥
विहलाहिं भिब्भलाओ विब्भलिआ । " वा विह्वले वौ वश्च " [५८] इति ह्वस्य भो वा तत्संनियोगे च वेर्वस्य वा भः ॥
उब्भं अणुद्धं । " वोर्ध्वे " [५९] इति भो वा ॥
कम्हारा कम्भार । " कश्मीरे म्भो वा " [६०] इति म्भो वा ॥
जम्म । " न्मो मः " [६१] इति न्मस्य मः । अधोलोपापवादः ॥

---

१ BC °ओउमल्ला°.

धराणि-बहस्सइ-सीसेण सयल-कल-कोसले बहप्फइणा ।
विलया वणस्सइ-वणे दिट्ठा उवणय-वणप्फइणा ॥२६॥
बप्फुल्ल-वयण-बाहुल्ल-लोयणीकय-पउत्थमुल्लसिअं ।
दस-काहावण-वीस-कहावण-मुल्लं तिलय-फुल्लं ॥२७॥

जुग्गय जुम्माओ । "ग्मो वा" [६२] इति ग्मस्य मो वा ॥

बम्भचेर । सुन्देरेणं । सोडीर । तूरा । "ब्रह्मचर्य°" [६३] इत्यादिना र्यस्य रः । जापवादः । चौर्यसमत्वाद् बम्हचरिआण ॥

धीराओ धिज । "धैर्ये वा" [६४] इति र्यस्य रो वा ॥

पेरन्त । " एतः पर्यन्ते" [६५] इति एकाराद् र्यस्य रः । एत इति किम् । पज्जन्ते ॥

अच्छेरस्स । " आश्चर्ये " [६६] इति एकाराद् र्यस्य रः । एत इत्येव । कयच्छरिआ । अच्छअर । कयच्छरीआ । पिअच्छरिजाण । " अतो रि° " [६७] इत्यादिना अकाराद् र्यस्य रिअ अर रिज रीअ इत्यादेशाः । अत इति किम् । अच्छेरस्स ॥

सोअमल्ला[1] । पल्लत्थ । अभिपल्लाणिअ । "पर्यस्त°"[६८] इत्यादिना र्यस्य ल्लः॥

बहस्सइ बहप्फइणा । वणस्सइ वणप्फइणा । "बृहस्पतिवनस्पत्योः सो वा" [६९] इति सो वा ॥

२७. बाष्पेण ऊष्मणा । प्रियाविरहसंतापोत्थस्वेदेनेति यावत् । आर्द्राणि क्लिन्नानि वदनानि येषां ते च बाष्पैः कान्ताबियोगोत्थाश्रुभिः आर्द्राणि लोचनानि च येषां ते च । ततश्चिवप्रत्यये बाष्पार्द्रवदनबाष्पार्द्रलोचनीकृताः प्रोषिता येन । दश कार्षापणाः विंशतिः कार्षापणाश्च मूल्यं यस्य तत् तथाभूतं तिलकफुल्लं वृक्षविशेषपुष्पम् उल्लसितं विकसितम् ॥

बाहुल्ल । "बाष्पे होऽश्रुणि" [७०] इति हः । अश्रुणीति किम् । बप्फुल्ल ॥

काहावण । "कार्षापणे" [७१] इति हः ॥ कथं कहावणेति । "ह्रस्वः संयोगे" [१.८४.] इति प्रागेव ह्रस्वत्वे पश्चात् हादेशे कहावणेति भविष्यति ॥

---

१ BC सोमल्ला.

दुहिआण दुक्ख-हरणम्मि दक्खिणो काम-दाहिण-करो व्व।
उम-तित्थिआण तूहं फुड-फुल्लो आसि महुअ-तरू ॥२८॥
पायाहओ असोओ कोहलि-सामाहिं पम्हलच्छीहिं।
कोहण्डी-कुसुमो कम्हारज-किसलो अ हवइ म्ह ॥२९॥
नव-रवि-रस्सि-पसूणो सर-उम्ह-करो अलक्खि बम्ह-तरू।
रोलम्ब-सण्ह-रव-कय-सागय-पण्हो महु-सिरीए ॥३०॥

२८. दुःखितानाम् अननुकूलकलत्रत्वेन पीडितानां दुःखहरणे दक्षिणः तदभीप्सितार्थसाधकत्वेन हितः। अत उत्प्रेक्ष्यते कामस्य दक्षिणकर इव। तत्करसाध्यकार्यस्य तेनापि निष्पादनात्। उमा-तीर्थिकानां गौरीभक्तानां तीर्थम्। तत्र गौरी वसतीति श्रुतेः। तेषां भक्तिस्थानम् स्फुटफुल्लो विकसितकुसुमः मधूकतरुरासीत्॥ उमेति "दीर्घह्रस्वौ मिथो वृत्तौ" [१.४] इति ह्रस्वः॥

दुहिआण दुक्ख। दक्खिणो दाहिण। तित्थिआण तूहं। "दुःखदक्षिणतीर्थे वा" [७२] इति हो वा॥

२९. कूष्माण्डीवत् श्यामाः श्यामवर्णास्ताभिः पक्ष्मलाक्षीभिः अशोकः पादेन आहतः। ततः कूष्माण्डीकुसुमवत् कुसुमानि यस्य स तथा। कश्मीरजं कुङ्कुमं तद्वत् किशलयानि च यस्य स तथाभूतश्च भवति स्म। स्वदोहदसंप्राप्तिः शाङ्वलः संवृत्त इति भावः॥

कोहलि कोहण्डी। "कूष्माण्ड्यां ष्मो लस्तु ण्डो वा" [७३] इति ष्मा ह्त्यस्य हः। ण्ड इत्यस्य तु वा लोऽपि॥

३०. नवरविरश्मिवद् रक्तानि प्रसूनानि यस्य। स्मरस्य उष्मकरः दर्शनकारिलोकस्य स्मरज्वरजनकः। मधुश्रियाः वसन्तलक्ष्म्या रोलम्बा भ्रमरास्तेषां सूक्ष्माः श्लक्ष्णा वा ये रवा गुञ्जितानि तैः कृतस्वागतप्रश्न इव ब्रह्मतरुः पलाशः अलक्षि मन्यते स्म॥

---

१ BCD हे for वा.

जण्हवि-जल-ससि-जुण्हा-सीयलमलि-पडल-कसण-कसिण-दलं
अवरण्ह-विअसिअं आसि पाडलं रइअ-पल्हायं ॥ ३१ ॥
अक्खलिअ-सुत्त-निच्चल-अणिट्ठुरोग्गीव-छच्चरण-भुत्तं।
विरहिणि-दुक्खोप्पायन्तप्पायं कुरवयं फुडिअं ॥ ३२ ॥
खग्गि-पिअ-सेर-मुद्धय-सिरीस-लग्गा अलक्खि भमरोली।
नासीकय व्व भल्ली विक्कमि-कन्दप्प-वीरेण ॥ ३३ ॥

पम्हल। कम्हार। म्ह। उम्ह। बम्ह। "पक्ष्मश्म°" [७४] इत्यादिना पक्ष्मस्थस्य क्ष्मस्य श्मष्मह्मां च म्हः ॥ क्वचिन्न। रस्सि। सर ॥

३१. जाह्नवीजलशशिज्योत्स्नावत् शीतलम् अलिपटलैः कृत्वा कृष्णानि नीलानि कृत्स्नानि समस्तानि दलानि यस्य तत् तथा अपराह्णकाले विकसितं रचितप्रह्लादं सौरभ्यादिना कृतप्रमोदं पाटलं पाटलिपुष्पम् आसीत् ॥

सण्ह। पण्हो। जण्हवि। जुण्हा। अवरण्ह। "सूक्ष्म°" [७५] इत्यादिना सूक्ष्मस्थस्य क्ष्मस्य श्मष्णस्नह्नक्ष्णां च ण्हः ॥ विश्लेषे तु कृष्णकृत्स्नयोः कसण कसिण ॥

पल्हायं ॥ "ह्लो ल्हः" [७६] इति ह्लस्य ल्हः ॥

३२. अस्खलितं निरुपद्रवं यथा भवति एवं सुप्ता अत एव निश्चला अप्रकम्पा अनिष्ठुरोद्वीवाः कोमलोर्ध्वकन्धरा ये षट्चरणास्तैर्भुक्तम् आस्वादितमधु। विरहिणीनां दुःखोत्पादे कष्टविधाने अन्तप्रायं मृत्युप्रायं कुरबकं स्फुटितं विकसितम् ॥

३३. खड्गिनां गण्डकानां प्रियाणि स्मेराणि विकचानि मुग्धकानि मनोज्ञानि यानि शिरीषाणि शिरीषपुष्पाणि तेषु लग्ना मकरन्द-

---

१ BCD कुरुवयं. २ D सूक्ष्मस्थक्ष्मस्य. ३ B दुःखोत्पादेकविधानोऽन्तप्रायं.

भव्व-सरा वण-वारे सद्दिअ-विक्कव-पउत्थ-वहु-वन्द्रा ।
भद्दं व भद्द-सिरिणो पढिउं लग्गा पिगी महुणो ॥ ३४ ॥
वक्कलि-दिआण सव्वाणोव्वेय-करी अकम्मसाणं पि ।
आबल्ल-विरत्ताणं[1] वि दारन्ती हियय-दाराइं ॥ ३५ ॥

लोभाद् आसक्ता भ्रमरालिः अलक्षि उत्प्रेक्षिता । यदुत विक्रमिकन्दर्पवीरेण पराक्रमकलितस्मरसुभटेन भल्लिर्बाणविशेषः सैव न्यासीकृता प्रस्तावे ग्रहीष्ये [इति] स्वमित्रवसन्तर्तुप्रधाने शिरीषवृक्षे स्थापिता ॥

अक्खलिअ । सुत्त । निच्चल । अणिट्ठुरीग्गोवि । छच्चरण । भुत्तं दुक्खोप्पाय । अन्तप्पायं । खग्गि । मुद्धय । "कगट०" [७७] इत्यादिना एषाम् ऊर्ध्वस्थितानां लुक् ॥

सेर । लग्गा । नासी । "अधो मनयाम्" [७८] इति मनयाम् अधःस्थानां लुक् ॥

३४. युग्मम् । वनद्वारे काननमुखे शब्दितानि कूजितव्याजेन नूनम् अधुना युष्मत्प्रेयानागमिष्यतीति वार्तितानि विकूवानि स्मरविह्वलानि प्रोषितवधूनां वन्द्राणि [वृन्दानि] यया सा तथा । भव्यस्वरा सती । उत्प्रेक्ष्यते । भद्रश्रियः सर्वर्तुरम्यत्वेन मनोज्ञलक्ष्मीकस्य मधोर्वसन्तस्य भद्रमिव मङ्गलवाक्यमिव पठितुं लग्ना पिकी कोकिला । अन्यापि गाथिकी ईश्वरगृहद्वारे मङ्गलं गायतीति ॥

३५. भूयः किंभूता । सर्वेषां वल्कलिद्विजानां तरुत्वक्परिधानतापसानाम् उद्वेगकरी संतापजननी । स्मरज्वरोत्पादनात् । अकलुषाः शुभध्यानक्षिप्तपापाः तेषामपि आबाल्यं शैशवाद् आरभ्य विरक्ता भवभीरवस्तेषामपि हृदयद्वाराणि चित्तमध्यानि दारयन्ती पीडयन्ती ॥

विक्कमि । कन्दप्प । सद्दिअ । विक्कव । वक्कलि । "सर्वत्र लबराम् अवन्द्रे" [७९] इत्यूर्ध्वाधःस्थितानाम् एषां लुक् ॥ संयुक्तानाम् उभयप्राप्तौ यथादर्शनं लोपः ।

---

१ BC °विरत्ताणं. २ BC युष्मत्प्रिया नागमिष्यन्तीति.

अगणिअ धाइं धारी-सुआणुसरिआओं कोउहल्लेण ।
फुल्लन्धुअ-धत्तिं धाविआओं बाला नवं लवलिं ॥३६॥
मायन्द-निउञ्जे कूजिएहिँ अन्नाण-जाणि-मण-हरणा ।
मत्ता अतिण्ह-सर-सर-तिक्खण-विण्णाणिणि व्व पिगी ॥३७

क्वचिद् ऊर्ध्वम् । सव्वाणो । अकम्मसाणं ॥ क्वचित्त्वधः । दिआण । आबल्ल ॥ क्वचित् पर्यायेण । वारे दाराइं । अवन्द्र इति किम् । वन्द्र । संस्कृतसमोयं प्राकृतशब्दः । अत्र उत्तरेण विकल्पोपि न निषेधसामर्थ्यात् ॥

भद्दं भद्द । "द्रे रो न वा" [८०] इति द्रे रस्य वा लुक् ॥

३६. धात्रीम् आमलकीं बालधारिकां वा अगणयित्वा अनादृत्य धात्रीसुताभिः अनुसृताः पृष्ठतोनुगता बालाः कुमारिकाः । फुल्लन्धुअ इति देश्यो भ्रमरार्थः । तेषां मकरन्ददुग्धदायित्वेन धात्रीमिव नवां तत्क्षणप्रादुर्भूतकोरकत्वेन प्रत्यग्रां लवलीं धाविताः कुतूहलेन । पुष्पादिरामणीयकातिशयकौतुकेन तां प्रति गताः ॥

धाइं धत्तिं । "धात्र्याम्" [८१] इति रस्य लुक् । पक्षे धारी ॥

३७. चूतनिकुञ्जे आम्रगहने कूजितैः कृत्वा अज्ञाना मूर्खाः ज्ञानिनो विद्वांसः । तेषां मनसां हरणी । रणरणककृत्त्वेन वैक्लव्यकारिकेत्यर्थः । अतस्तर्क्यते । अतीक्ष्णाः स्वकार्यकरणासमर्थत्वेन कुण्ठा ये स्मरशरास्तेषां तीक्ष्णने उत्तेजने विज्ञानिनीव विचक्षणेव । मत्ता आम्रमञ्जरीस्वादनेन पुष्टा पिकी अस्ति ॥ चूतस्य माकन्दादेशो "गोणादयः" [२.१७४] इत्यनेन । संस्कृतेपीत्यन्ये ॥ तीक्ष्णं करोति "णिज् बहुलम्" [हे० ३.४] इति णिजि अन्त्यस्वरलोपे तीक्ष्ण्यते इति धुटि तीक्ष्णनम् ॥

अतिण्ह तिक्खण । "तीक्ष्णे णः" [८२] इति णस्य लुग् वा ॥

अन्नाण जाणि । "ज्ञो ञः" [८३] इति ञस्य लुग् वा ॥ क्वचिन्न । विण्णाणिणि ॥

मज्झण्हतरू मज्झण्ण-पुप्फ-जीविअ-दसार-वइ-पुत्तो ।
महु-जुव-मंसु-सरिच्छालि-गुच्छओ आसि मण-हरणो॥३८॥
हरिअन्द-रुप्पि-सरिसाण वि पहिआणं वणं मसाणं व ।
रत्तीसु अराईसु वि कसिण-पलासेहि खोहयरं ॥ ३९ ॥

३८. मध्याह्नपुष्पैर्मध्याह्नकालविकासिभिः प्रसूनैर्जीवितः समाधिभङ्गप्रकुपितत्रिनेत्रतृतीयनेत्रज्वालया भस्मितोपि प्राणितः दशार्हपतेर्विष्णोः पुत्रः अनङ्गो येन स तथा । मधुयूनो वसन्ततरुणस्य श्मश्रुसदृशो दंष्ट्रिकाकल्पः अलिगुच्छो भ्रमरस्तबको यत्र स तथा मध्याह्नतरुः अत्यन्तरक्तमध्याह्नविकाशिपुष्पो वृक्षभेदो मनोहरणः अतिरम्यत्वात् सकललोकचित्तावर्जक आसीत् ॥

मज्झण्ह मज्झण्ण । " मध्याह्ने हः " [८४] इति हस्य लुक् वा ॥

दसार । " दशार्हे " [८५] इति हस्य लुक् ॥

३९ हरिश्चन्द्रो राजर्षिः रुक्मी च रुक्मिणीभ्राता । तयोः सदृक्षाणामपि । निःप्रकम्पानामपीत्यर्थः । पथिकानां[1] वनं काननं श्मशानवत् पितृवनवत् । रात्रिषु अरात्रिष्वपि । अहर्निशम् इत्यर्थः । कृत्स्नपलाशैः समस्ततरुजातिपर्णैः समस्तकिंशुकैर्वा कृत्वा क्षोभकरं प्रियावियोगवेदनाजनकम् आसीत् । श्मशानमपि पलाशैर्मांसास्वादिभिर्भूतशाकिनीप्रभृतिभिर्धीराणामपि भीतिम् आवहति ॥

मंसु । मसाणं । " आदेः श्मश्रुश्मशाने " [८६] इति आदेर्लुक् ॥ आर्षे श्मशानस्य सीआणं सुसाणं इत्यपि ॥

हरिअन्द । " श्चो हरिश्चन्द्रे " [८७] इति श्च इत्यस्य लुक् ॥

रत्तीसु अराईसु । " रात्रौ वा " [८८] इति लुग् वा ॥

रुप्पि । रत्तीसु । "अनादौ शेषादेशयोर्द्वित्वम् "[८९] इति द्वित्वम्॥ क्वचिन्न। कसिण । अनादाविति किम् । खोह ॥

---

१ BC मज्झण्णतरू. २ D पथिकानां पान्थानां वनं.

मुच्छिर-सरा कय-गुणक्खाण व्व अविग्घ-कट्ठमहु-पाणे।
नीसास-निज्झरा इव चउ-कट्ठं सिसिर-सिरि-मुक्का ॥ ४० ॥
निब्भर-महद्धि-गन्धे वण-सिरि-गुप्फत्थ-नील-मणि-निउरा।
अच्छि-पडिक्खण-मज्झे अवुड्ढ-बउले गया अलिणो ॥ ४१ ॥
भसलालिद्ध-पसत्थोग्गय-पुप्फो आसि कामि-भिब्भलणो।
दिग्घामोओ दीहं ऊससिअ-रईसरो सिरिसो ॥ ४२ ॥

४०. युग्मम्। अवृद्धबकुले नवकेसरे अलयो गताः। मूर्च्छितो वर्धनशीलः स्वरो गुञ्जितं येषां ते तथा सन्तः। उत्प्रेक्ष्यन्ते। कृत-गुणाख्याना[1] इव विहितमाधुर्यादिप्रशंसा इव। क। अविघ्नं निरुपद्रवं यत् काष्ठमधुनः कुसुममकरन्दस्य पानं स्वादनं तत्र। तथा निःश्वास-निर्झरा इव। वसन्तश्रीपराभूतत्वेन सकष्टत्वाद् निःश्वसनप्रवाहा इव चतुःकाष्ठं चतसृषु दिक्षु शिशिराश्रिया शीतकाललक्ष्म्या मुक्ताः ॥

४१. वनश्रियो गुल्फस्थाश्चरणग्रन्थिस्था गुञ्जितश्यामलत्वयुक्त-त्वेन नीलमणीनां नूपुरा इव निर्भरः सकलदिक्चक्रव्यापी महर्द्धिगन्धो यस्य तस्मिन् आक्षिप्रतीक्षणमध्ये। चक्षुर्निमेषमात्र इत्यर्थः ॥

४२. भसलैः आश्लिष्टानि मकरन्दपानाय आश्रितानि प्रशस्तानि मनोहराणि प्रादुर्भूतानि उद्गतानि पुष्पाणि यस्मिन् स तथा कामिनां विह्वलनः। प्रियां प्रति उत्कण्ठाजननाद् अभिमानहारक इत्यर्थः। दीर्घामोदः सर्वत्र प्रसृमरपरिमलः। दीर्घम् अत्यर्थं यथा भवति एवम् उच्छ्वसितरतीश्वरः[3] उज्जीवितकन्दर्पः शिरीष आसीत् ॥

मुच्छिर। गुणक्खाण। अविग्घ। कट्ठ। निज्झरा। कट्ठं। निब्भर। महद्धि। गुप्फत्थ। अच्छि। पडिक्खण। मज्झे। अवुड्ढ। आलिद्ध। पसत्थो। पुप्फो।

---

१ C उत्प्रेक्ष्यते. २ BD गुणख्या° ३ C उच्छ्वासित°.

वम्महतंससरोवमसंझासुन्देरहारिकुंपलओ ।
विहलिअपहिओ धट्ठज्जुणभाउसमे वि कामकरो ॥ ४३ ॥
कणिआरतरू नवकण्णिआरसुन्देरदरिअसब्भावो ।
हरखन्दजुग्गकुसुमो जाओ रञ्जिअहरक्खन्दो ॥ ४४ ॥

भिब्भलणो । "द्वितीयतुर्ययोरुपरि पूर्वः" [९०] इति द्वित्वप्रसङ्गे उपरि पूर्वः ।
दिग्घा दीहं । " दीर्घे वा " [९१] इति घस्योपरि पूर्वो वा ॥

४३. युग्मम् । हरस्कन्दयोर्योग्यानि पूजार्हाणि कुसुमानि यस्य अत एव रञ्जितहरस्कन्दः प्रमोदितशंकरकार्तिकेयः कर्णिकारतरुः जातः । कीदृशः । मन्मथस्य त्र्यस्राखिकोणा ये शरास्तैरुपमा येषां तानि तथा । ताम्रत्वेन संध्यासौन्दर्यस्य हारीणि [अपहर्तृणि] कुड्मलानि उद्भिद्यमानपत्राणि यस्मिन् स तथा । विह्वलिताः प्रियास्मरणाद् उद्वेजिताः पथिका येन स तथा । आस्ताम् अन्यस्मिन् । धृष्टद्युम्नभ्राता शिखण्डी नपुंसको द्रुपदपुत्रस्तेन समस्तुल्यः तस्मिन्नपि कामकरः सुरतेच्छोत्पादकः ॥

४४. नवानि यानि कर्णिकाराणि स्वपुष्पाणि तेषां यत् सौन्दर्यं चारुता तेन दग्नसद्भावः अन्यवृक्षपुष्पसमृद्ध्याधिक्यात् साहंकारप्रकृतिः ॥

ऊससिअ । रईसरो । तंस । संझा । कुंपलओ । "न दीर्घानुस्वारात्" [९२] इति न द्वित्वम् ॥

सुन्देर । विहलिअ । रहोः " [९३] इति न द्वित्वम् ॥

धट्ठज्जुण । " धृष्टद्युम्ने णः [९४] इति न द्वित्वम् ॥

कणिआर कण्णिआर । " कर्णिकारे वा " [९५] इति वा न द्वित्वम् ॥

दरिअ । " दृप्ते " [९६] इति न द्वित्वम् ॥

पिअ-कुसुम-पयर-पूरिअ-कुसुम-प्पयरो पमुक्क-मेर-सिरी ।
तेल्ल-सणिद्धालि-कुलापम्मुक्को आसि वेइल्लो ॥ ४५ ॥
कोल्ला-सोत्त-पडिच्छन्दीकय-रय-सेव्व-घम्म-सलिलाण ।
पुप्फिअ-लवली जाया सेवा-जुग्गा मयच्छीणं ॥ ४६ ॥
महु-नक्ख-आउह-नह व्व आसि सारङ्गि-वत्थ-कन्तीइं ।
छमरुह-रयण-पलासे कुसुमाइँ सलाह-पत्ताइं ॥ ४७ ॥

४५. प्रियः केशकलापादिसौरभ्याय अभिप्रेतः कुसुमप्रकरो येषां ते तथा तेषां पूरितः संपादितः कुसुमप्रकरो येन। प्रमुक्तमेरश्रीः निरवधिसमृद्धिः । तैलवत् स्निग्धम् अरूक्षकान्ति यद् अलिकुलं तेन मधुपानलोभाद् अप्रमुक्तः विचकिल आसीत् ॥

[हर-खन्द हर-क्खन्दो] । कुसुम-पयर कुसुम-प्पयर । "समासे वा"[९७] इति द्वित्वम् ॥ बाहुलकाद् अशेषादेशयोरपि । पमुक्क । पम्मुक्क इत्यादि ॥

४६ कुल्या कृत्रिमा सरित् तद्रूपं यत् स्रोतः प्रवाहस्तस्य प्रतिच्छन्दीकृतं सदृशं रतसेवया घर्मसलिलं यासां तासां मृगाक्षीणां पुष्पितलवली सेवायोग्या रतिश्रमापनोदाय सेवनीया जाता ॥

तेल्ल । वेइल्लो । सोत्त । " तैलादौ [९८] इति द्वित्वम् । आर्षे । पडिसोओ। विस्सोअसिआ ।

४७. मधुर्वसन्तः स एव पान्थभीषकत्वाद् नखायुधः सिंहः तस्य आरक्तकुटिलत्वेन मन्यन्ते नखा इव । शार्ङ्गी पीताम्बरस्तस्य वस्त्राणामिव कान्तिः । पीतरक्तयोः कविसमये ऐक्यात् । प्रभा येषाम् क्षमारुहा वृक्षास्तेषु सश्रीकत्वाद् रत्नम् । प्रधान इत्यर्थः । यः पलाशस्तस्मिन् कुसुमानि श्लाघापात्राणि रम्यत्वादिविषयलोकप्रशंसास्थानानि आसन् ॥

सेव्व । सेवा । नक्ख । नह । "सेवादौ वा " [९९] इति वा द्वित्वम् ॥

---

१ BC येषां पूरितः.

जुव-जण-जणिअ-संणेहा पउत्थ-विरहागणिम्मि णेह-समा।
मयण-पयावग्गि-णिहा पलक्ख-तरु-पल्लवा जाया ॥ ४८ ॥
सिरि-नन्दण-किरिआरिह-तरुणीहिं चइअ-कसिण-हिरिआहिं।
अह कुसुमावचय-कलाओ दंसिआ दिट्ठिआ भणिउं ॥ ४९ ॥

सारङ्गि। "शार्ङ्गे ङात् पूर्वोऽत्" [१००] इति ङात् पूर्वः अत्।

छम। रयण। सलाह। "श्मश्लाघा०" [१०१] इत्यादिना अन्त्यव्यञ्जनात् पूर्वः अत्॥

४८. युवजनानां जनितस्नेहाः प्रियायाम् उत्पादिताभिलाषाः प्रोषितानां विरह एव प्रियावियोग एव संतापकत्वाद् अग्निस्तस्मिन् स्नेहसमाः तद्वृद्धिजननाद् घृतादिसदृशाः। मदनप्रताप एव सोढुम् अशक्यत्वेन अग्निः तेन निभास्तुल्याः प्लक्षतरोः पल्लवाः किशलयानि जाताः॥

सणेहा णेह। अगणिम्मि अग्गि। "स्नेहाग्न्योर्वा" [१०२] इति संयुक्तान्त्यात् पूर्वः अत्॥

पलक्ख। "प्लक्षे लात्" [१०३] इति लात् पूर्वः अत्॥

४९. त्यक्तकृत्स्नह्रीकाभिः मुक्तसख्यादिसक्तसमस्तलज्जाभिः। श्रीनन्दनः स्मरः तस्य याः क्रियाः कटाक्षविक्षेपसहास्यकथाद्यास्तासाम् अर्हा योग्या यास्तरुण्यस्ताभिः अथ सर्ववनराजिपुष्पोद्गमान्तरं कुसुमावचयकला भणित्वा एवमेवं क्रियन्ते इति परस्परम् उक्त्वा दिष्ट्या आनन्देन दर्शिताः प्रकटिताः॥

सिरि। किरिआरिह। कसिण। हिरिआहिं। दिट्ठिआ। "र्हश्री०" [१०४] इत्यादिना एषु संयुक्तान्त्यात् पूर्व इः।

---

१ BC °सिणेहा°.

वासेणं वरिसेहि वि नामरिसो किर पियाइ जो गमिही ।
सो दरिसिअ-नव-चूए पिए गओ झत्ति हरिस-वसा ॥ ५० ॥
मयण-वइरग्गि-तत्तेण तोसिआ सुदढ-माण-तविअ-पिआ ।
क वि वज्ज-कढिण[1]-हिअया केण वि दाउं बउल-दामं ॥ ५१ ॥
कीइ वि किलन्त-कम-विप्पव-हरणा मल्लिआण मालाओ ।
महु-सुक्क-पक्ख-जुण्हा-पव व्व उप्पाविआ गयणे ॥ ५२ ॥

५. वसन्तकुसुमोच्चयमेव गाथात्रयोविंशत्या प्राह ॥ वर्षेण एकेन वर्षैरपि बहुभिः । किलेति संभावने । प्रियाया योऽमर्षः मानो नागमत् स दर्शितनवचूते इतः पश्येत्यङ्गुल्या प्रकटितमाकन्दे प्रिये झटिति तत्क्षणादेव हर्षवशात् चूतदर्शनोद्भूतरणरणकोपशमप्रियदर्शनोत्थप्रमोदाद् गतः ॥

५१. मदन एव वज्राग्निः अनुपशमकवह्निस्तेन तप्तेन दग्धेन केनापि [सुदृढमानतप्तप्रिया] सुदृढमानेन अनिवर्तकाहंकारेण तप्ता अत्यन्तम् असहना वज्रकठिनहृदया प्रिया कापि बकुलदाम दत्त्वा तोषिता ॥

दंसिआ दरिसिअ । वासेणं वरिसेहि । वइर वज्ज । तत्तेण तविअ । "शर्ष°" [१०५] इत्यादिना संयुक्तान्त्यात् पूर्व इर्वा ॥ व्यवस्थितविभाषया क्वचिन्नित्यम् । नामरिसो । हरिस ॥

५२. [कयापि] क्लान्तानां खिन्नानां क्लमः खेदः तेन विप्लवः अङ्ग-विसंष्ठुलता[2] तस्य हरणीः[3] शैत्याद् अपहारिका मल्लिकानां विचकिल-कुसुमानां मालाः स्रजो गगने उत्प्लाविता उत्क्षिप्ताः सत्यः उत्प्रेक्ष्यन्ते मधुरेव सर्वत्र पुष्पोद्गमैः शौक्ल्यकरणात् शुक्लपक्षः । तस्य ज्योत्स्नाप्लवा इव चन्द्रिकापूरा इव ॥

किलन्त । "लात्" [१०६] इति संयुक्तान्त्यलात् पूर्व इः । क्वचिन्न । कम । विप्पव । सुक्क-पक्ख । पव । उप्पाविआ ॥

---

१ BD°कढण°. २ B °संस्थुलता. ३ B हरणी शौ°.

गुम्फन्ती जव-दामं भविअ-सिआवाइ-चेइअ-निमित्तं ।
का वि जुवई जुवाणय-मण-थेरिअ-चोरिअमकासि ॥ ५३ ॥
सिविणम्मि वि अइदुलहा सिणिद्ध-कुसुमा सणिद्ध-मयरन्दा ।
परिमल-णिद्धा कीइ वि रइआ वासन्तिआ-माला ॥ ५४ ॥
कण्ह-कसिणालि-कसणा लवली गन्धारिहा वि नोच्चिणिआ ।
केण वि कज्जल-कण्हं सुमरिअ कबरिं पिअयमाए ॥ ५५ ॥

५३. भव्यं यत् स्याद्वादिनो जिनस्य चैत्यं तन्निमित्तं जपादाम गुम्फन्ती ग्रथ्नती कापि युवतिः युवमनसां यत् स्थैर्यं निर्विकारतादार्ढ्यं तस्य सलीलपुष्पग्रहणगुम्फादिना हरणम् अकार्षीत् ॥

भविअ । सिआवाइ । चेइअ । थेरिअ । चोरिअ । "स्याद्भव्य°"[१०७] इत्यादिना स्यादादिषु चौर्यसमेषु च यात् पूर्वं इः ॥

५४. स्वप्नेप्यतिदुर्लभा तथाविधाया आजन्माप्यदर्शनात् । स्निग्धानि अरूक्षाणि । सरसानीत्यर्थः । एवंभूतानि कुसुमानि यस्यां सा तथा स्निग्धमकरन्दा सार्द्रपरागा अतएव परिमलेन स्निग्धा भ्रमराणां प्रिया वासन्तिकामाला माधवीलतास्रक् कयापि रचिता ग्रथिता ॥

सिविणम्मि "स्वप्ने नात्" [१०८] इति नात् पूर्वं इः ॥

सिणिद्ध सणिद्ध । "स्निग्धे वादितौ" [१०९] इति नात् पूर्वौ आदितौ वा । पक्षे णिद्धा ॥

५५. कृष्णवत्कृष्णा ये अलयस्तैः कृष्णा । मकरन्दपानाय षट्-पदाच्छादितेत्यर्थः । गन्धेन सौरभ्येण अर्हा पुष्पोच्चययोग्यापि कज्जल-वत्कृष्णां प्रियतमायाः कबरीं वेणिं स्मृत्वा सादृश्यात् केनापि लवली नोच्चिता । प्रियानुध्यानविह्वलत्वेन न तत्कुसुमावचयः कृत इत्यर्थः ॥

अणरह अणरुह-दामं रे मुक्ख-मुरुक्ख करासि इअ भणिउं।
पोम्मच्छीए हणिओ को वि पिओ पाय-पउमेण ॥ ५६ ॥
छउमेण अछम्मेण य साम-दुवारेण दण्ड-वारेण।
केण वि का वि अगेज्झा बउलेहि पसाइआ तणुवी ॥ ५७ ॥
गरुवीओ लवलीओ सुहुमे वत्थे सुरुग्घजे खित्ता।
कीए वि हु मुद्धाए सुवे विहसिरा वि कलिआओ ॥ ५८ ॥

कसिण। कसणा कण्हं। "कृष्णे वर्णे वा" [१११०] इति संयुक्तान्त्यात् पूर्वौ *अदितौ वा। वर्ण इति किम्। विष्णौ कण्ह ॥*

५६. अनर्ह विप्रियकरणाद् अयोग्य रे मूर्खमूर्ख वठरवठर अनर्ह-दाम अमनोज्ञत्वाद् मम अयोग्यां मालां करोषीति भणित्वा पद्माक्ष्या कोपि प्रियः पादपद्मेन हतः ॥ मुक्ख-मुरुक्ख इत्यत्र कोपे "संमत्यसूया°" [हे० ७.४] इत्यादिना द्विरुक्तिः ॥

अरिहा अणरह अणरुह। "उच्चार्हति" [१११] इति संयुक्तान्त्यात् पूर्व उत् अदितौ च ॥

५७. छद्मना शाठ्येन अच्छद्मना आर्जवेन सामद्वारेण प्रियवाक्य-मुखेन दण्डः यदि त्वं मदुक्तं न करिष्यसि तदा न त्वं मम प्रिया नाहं तव प्रियेः इत्यादिरूक्षवाक्यद्वारेण च कापि तन्वी मृद्वङ्गी अगृह्या अनावर्जनीया केनापि बकुलैः केसरकुसुमैः प्रसादिता प्रसन्नी-कृता ॥

मुक्ख मुरुक्ख। पोम्म पउमेण। छउमेण अछम्मेण। [दुवारेण वारेण] "पद्मच्छद्ममूर्खद्वारे वा" [११२] इति संयुक्तान्त्यात् पूर्व उत् वा ॥

५८. सूक्ष्मे स्रुघ्नजे देशविशेषोत्पन्ने वस्त्रे। हु इति निश्चितम्। कया-पि मुग्धया अविचक्षणया गुर्वीतो महत्या लवलीतः श्वः आगामि-दिने विहसित्र्योपि विकसनशीला अपि कलिकाः कोरकाः क्षिप्ताः

१ B सुहमे; C सुहुमे. २ BD प्रेयान्.

कुसुमाकर-रिउ-स-जणा सुवे जणा पारिजाय-तरुणो व्व ।
सर-जीआभालि-कुला सर-ठग-वाणारसि-पएसा ॥ ५९ ॥
आणाल[1] व्व कणेरूहि कुरवेया[2] दढयरं[3] समालिद्धा ।
वर-विलयाहि अहरिआलचपुर-मरहट्ठ-जुवईहिं ॥ ६० ॥

न्यस्ताः । विचक्षणा हि प्रतीक्ष्य स्वयं विकसिता एव ता गृह्णाति तया तु अन्यथा कृतम् इति मुग्धत्वम् ॥

तणुवी । गरुवी । उकारान्ता ङीप्रत्ययान्तास्तन्वीतुल्यास्तेषु "तन्वीतुल्येषु" [११३] इति संयुक्तान्त्यात् पूर्व उः ॥ क्वचिद् अन्यत्रापि । सुरुग्घ ॥ आर्षे । सुहुमं ।

५९. युग्मम् । कुसुमानाम् आकरः उत्पत्तिस्थानं य ऋतुः । वसन्त इत्यर्थः । तस्य स्वजना इव तदुदये तेषां समृद्धिभावाद् बन्धव इव । तथा पुष्पपत्रादिसादृश्याद् मन्यन्ते स्वजना इव सहोदररूपा वान्धवा इव पारिजाततरोर्देववृक्षस्य । स्मरस्य ज्या प्रत्यञ्चा तदाभम् अलिकुलं येषु ते तथा । स्मर एव ठको विप्रतारकस्तस्य वाराणसीप्रदेशा इव । यथा वाराणसी ठकानां स्थानं तथा एते दंपत्योरुत्कण्ठादिजननात् स्मरस्येति भावः ॥

६०. एवंवर्णितस्वरूपाः कुरबकाः अधरिता लावण्यप्रशस्यसंस्थानादिना पराभूताः अचलपुरं च नगरविशेषः । महाराष्ट्रं च सुराष्ट्रम् । तयोर्युवत्यो यकाभिस्ताभिर्वरवनिताभिः दृढतरम् अत्यर्थं पुष्पोच्चयाय समाश्लिष्टाः । यथा आलानानि आलानस्तम्भाः करेणुभिः ॥ "वाक्यार्थवचनाद्याः" [१.३३] इति आलानस्य पुंस्त्वम् ॥

सुवे । सुवे । "एकस्वरे श्वः स्वे" [११४] इति श्वःस्वयोरन्त्यव्यञ्जनात् पूर्व उत् । एकस्वर इति किम् । सज्जणा ॥

जीआ । "ज्यायाम् ईत्" [११५] इति अन्त्यव्यञ्जनात् पूर्व ईत् ॥

वाणारसि । कणेरूहि । "करेणू°" [११६] इत्यादिना रणयोर्व्यत्ययः । करेणू इति स्त्रीलिङ्गनिर्देशात् पुंसि न ॥

---

१ D आलाण. २ BD कुरु°. ३ BD दढतरं. ४ D °त्कण्ठाधिज°. ५ D सुराष्ट्रा तयोर्युवतयो. ६ BD सयणा.

लवणिम-जल-द्रह निह-नाहि-मण्डले उच्चिणेसु लहुअमिमं ।
हलिआर-गोरि हरिआल-वन्नयं हलुअममिलायं ॥ ६१ ॥
वण-सिरि-णडाल-तिलयं तिलयं गेय्हं तए वर-णलाडे ।
गेज्झाथोव-परिमलं अथोक्क-जहणे अथेव-सिरि ॥ ६२ ॥
दाही अथोअ-कुसुमेहि सेहरं दिट्ठिएहं[1] बिम्बोट्ठि ।
धूआ-बहिणी-भइणी-दुहिअ व्व तुह प्पिआ लवली ॥ ६३ ॥

आणाल । "आलाने लनोः" [११७] इति लनोर्व्यत्ययः ॥

अलचपुर । "अचलपुरे चलोः" [११८] इति चलयोर्व्यत्ययः ॥

मरहट्ठ । "महाराष्ट्रे हरोः" [११९] इति हरयोर्व्यत्ययः ॥

६१. [७२] द्वादशभिः कुलकम् । बहिः अबहिः स्फुटप्रेमभिः मनोवाक्कायेषु व्यक्तानुरागैः कैरपि तरोरधः रतेर्मातृष्वस्तृदुहितर इव निरतिशयसौन्दर्याद् उत्प्रेक्ष्यन्ते स्मरप्रियाया जननीभागिनीपुत्रिका इव प्रेयस्यो वल्लभाः इति पूर्वोक्तरीत्या आलपिताः सस्नेहं भणिताः ॥ [६१] । आलपनप्रकारमेवाह । लवणिमा लावण्यं स एव दृष्ट्याप्यायकत्वेन जलं तस्य ह्रदनिभं नदकल्पं नाभिमण्डलं यस्यास्तस्या आमन्त्रणम् । तथा हरितालवद् गौरि गौरवर्णे हरितालवद् वर्णो यस्य तत् लघुकं सूक्ष्मम् इदं पुरोवर्ति अमिलातकं वर्णपुष्पं लघुकं शीघ्रं यथा भवति एवम् उच्चिनु त्रोटय ॥

६२. हे वरललाटे रम्यभालस्थले अस्तोकजघने विसंकटकटीतटाग्रभागे त्वया वनश्रीललाटस्य तिलकमिव शोभाकृत्त्वात् पुण्ड्रकमिव । ग्राह्यो नासिकापेयः अस्तोकः परिमलो यस्य तत् तथा अस्तोकश्रिग्रभूतशोभं तिलैककुसुमं ग्राह्यम् ॥

६३. दुहिता च पुत्रिका भगिनी च स्वसा भगिनीदुहिता च ता इव प्रिया लवली । बिम्बवद् ओष्ठौ यस्यास्तस्या आमन्त्रणम् । हे

---

१ BC हि. २ D तिलकं कुसुमं.

छूढासव--गण्डूसे खित्त-पउत्ताडणे समुच्चिणसु ।
पुप्फाइँ बउल-वच्छे असोअ-रुक्खे अ विलय-वरे ॥ ६४ ॥
सुर-वणिआ-नाग-त्थी-अकूर-कय-हरिसमीसि-उल्लसिअं ।
पिच्छेत्थी-धिइ-जणइं दिहि-मइ हिन्ताल-मञ्जरिअं ॥ ६५ ॥
सिसु-मञ्जर-जुव-वञ्जर-जर-मञ्जारेहिँ पल-भमा दिट्ठं ।
वेरुलिअ-केसि वेडुज्ज-भूसणे किंसुअं लेसु ॥ ६६ ॥
एण्हिं पिच्छेत्ताहे गिण्हसु रम्भं कुणेसु अ इमाए ।
पुरिमाणं पि अपुव्वं आमेलं हित्थ-हरिणच्छि ॥ ६७ ॥

बिम्बोष्ठि तव इह अत्र उद्याने अस्तोककुसुमैः शेखरं दिष्ट्या प्रीत्या दास्यति । लवल्याः कुसुमभरनम्रत्वाद् इत्थम् उक्तिः । बन्धुश्च बन्धवे पुष्पशेखरादि ददाति ॥

६४. क्षिप्तासवगण्डूषे बकुलवृक्षे । क्षिप्तं कृतं पदोत्ताडनं यत्र तत्र अशोकवृक्षे च हे वनितावरे अङ्गनाश्रेष्ठे पुष्पाणि समुच्चिनु । त्वद्गण्डूषक्षेपपदाघाताभ्यां पूर्णदोहदत्वेन बकुलाशोकयोः सांप्रतं पुष्पावचयसमयः संवृत्त इति भावः ॥

६५. सुरवनितानागस्त्रीणाम् अनीषत् अत्यर्थं सौरभ्यादिना कृतहर्षाम् ईषत् मनाग् उल्लसिताम् उद्भिन्नकोरकां स्त्रीणां धृतेः सौस्थ्यस्य शैत्यात् जनिकाम् । धृतिः संतोषो विद्यते यस्या यद्वा धृतौ मतिर्यस्यास्तस्याः संबोधनम् । हे धृतिमति धृतिमते वा पश्य हिन्तालस्य मञ्जरिकां पुष्पितलताम् ॥

६६. शिशुमार्जारयुवमार्जारजरन्मार्जारैः बालतरुणवृद्धबिडालैः पलभ्रमात् आरक्तत्वेन मांसभ्रान्त्या दृष्टं किंशुकं पलाशकुसुमम् हे वैडूर्यकेशि नीलमणितुल्यचिकुरे हे वैडूर्यभूषणे मरकतखचितालंकारे लाहि गृहाण ॥

६७. इदानीं सांप्रतं पश्य रम्भाम् इदानीं गृहाण रम्भाम् कुरुष्व

१ C° उब्भसिअं. २ BD रब्भं; C रस्तं. ३ D अङ्गनाप्रधाने.

तट्ठातत्थालि-कुलो भयस्सई अट्ठमो व्व पहिआण ।
तुह जुग्गो पुन्नामो रूवेण बहस्सइ-घरिल्ले ॥६८॥
अमइल-तणु परिगुम्फिअ-पोप्फलि-मउरेण भसल-मलिणेण ।
अवह-कुचोवह-हत्थोभय-चलेणे[1] तुज्झ भूसेमि ॥ ६९ ॥
सिप्पि-पिहु-नयण-छुत्तोत्तंसे आढत्त-संझ-रायमिमं ।
उच्चिणसु भमर-छिक्कं महु-पाइक्कं जवा-कुसुमं ॥ ७० ॥

च अस्या अनया वा रम्भाया रम्भया वा पूर्वासामपि पूर्वं[2] कृतापीडानामपि नायिकानाम् अपूर्वम् असंजातपूर्वम् । आश्चर्यकारीति भावः । आपीडम् अवतंसम् हे त्रस्तहरिणाक्षि चकितकुरङ्गनेत्रे ॥

६८. त्रस्तात्रस्तमिव चञ्चलत्वान्मन्यते चकिताचकितमिव अलिकुलं यत्र स तथा बृहस्पतिरिव अष्टमः पीडाकारित्वात् पथिकानाम् । यदुक्तम्

द्वादशदशमचतुर्थे जन्मनि षष्ठाष्टमे तृतीये च ।
व्याधिं विदेशगमनं मित्रविरोधं च सुरगुरुः कुरुते ॥ १ ॥

पुन्नागस्तव योग्यः । विकस्वरपुष्पभास्वरत्वात् कुसुमावचयोचित इत्यर्थः । हे रूपेण कृत्वा बृहस्पतिगृहिणि ॥

६९. भसलैर्मलिनेन मकरन्दपानासक्तैः षट्पदैः श्यामलेन । परिगुम्फितो यः पूगफल्या मुकुरो बालपुष्पं तेन कृत्वा हे अमलिनतनु विशदमूर्ते तव उभयकुचोभयहस्तोभयचरणान् भूषयामि अलंकरोमि ॥

७०. शुक्तिवत् पृथुनी विस्तीर्णे ये नयने ताभ्यां छुप्तौ स्पृष्टौ उत्तंसौ कर्णपूरौ यया तस्याः संबोधनम् । हे शुक्तिपृथुनयनच्छुप्तोत्तंसे आरब्धः अरुणत्वात् प्रकृतः संध्यारागः इव येन तत् तथा भ्रमरैः सौरभ्यात् छुप्तं मधोर्वसन्तस्य पदातिं कामिमोहनादितत्कर्मकारित्वेन भृत्यम् इदं पुरोवर्ति जपाकुसुमम् उच्चिनु ॥

---

१ BD° चरणे. २ BC पूर्वकृता°.

आरद्ध-बहल-परिमल-केलि-पयाईकयन्न-तरु-कुसुमं ।
किडि-दाढ-सुत्ति-भङ्गोज्जलमुच्चिण फुल्ल-वेइल्लं ॥ ७१ ॥
बाहिं अबाहिरे फुंड-पेमेहिं पेअसीओं तरु-हेट्ठे ।
केहिं पि इआलविआ रईइ माउच्छ-धूअ व्व ॥ ७२ ॥

७१. आरब्धा या बहलपरिमलस्य केलिर्विलासः तया पदातीकृतानि । अधःकृतानीत्यर्थः । अन्यतरूणां कुसुमानि येन तत् तथा । किरिः शूकरस्तस्य दंष्ट्रा च शुक्तिश्च तयोर्यो भङ्गश्छेदः तद्वद् उज्ज्वलं फुल्लविचकिलं विकसितमालिकाकुसुमं त्वम् उच्चिनु ॥

द्रह । "ह्रदे हदोः"[१२०]इति हदयोर्व्यत्ययः । आर्षे हरए मह-पुण्डरिए॥

हलिआर हरिआल । "हरिताले रलोर्न वा"[१२१]इति रलयोर्व्यत्ययो वा ।

लहुअं हलुअं । "लघुके लहोः" [१२२] इति लहोर्व्यत्ययो वा ॥

णडाल णलाडे । "ललाटे लडोः" [१२३] इति लडोर्व्यत्ययो वा । आदेर्लस्य णविधानाद् [१. २५७] द्वितीयो लः स्थानी ॥

गेय्हं गेज्झ । "ह्ये ह्योः" [१२४] इति हययोर्व्यत्ययो वा ।

अथोव अथोक्क अथेव । "स्तोकस्य थोक्कथोवथेवाः" [१२५] इति स्तोकस्य त्रय आदेशा वा । पक्षे अथोअ ।

धूआ दुहिअ । बहिणी भइणी । "दुहितृभगिन्योर्धूआबहिण्यौ" [१२६] इति अनयोः एतावादेशौ वा ॥

छूढा खित्त । वच्छे रुक्खे । "वृक्षक्षिप्तयो रुक्खछूढौ" [१२७] इति अनयोर्यथासंख्यं रुक्खछूढौ वा ॥

विलय वणिआ । "वनितायां विलया" [१२८] इति विलयादेशो वा । विलयेति संस्कृतेपीति केचित् ॥

अकूर । "गौणस्य°" [१२९] इत्यादिना ईषतो गौणस्य कूरो वा । पक्षे ईसि॥ थी [इत्थी]। "स्त्रिया इत्थी" [१३०] इति स्त्रिया इत्थी वा ॥

---

१ BC फुडपेम्मेहिं पीअसीओ.

निअ-माउसिआ-पिउसिअ-पिउच्छ-तणया-घरे व्व उज्जाणे ।
मिहुणेहिं हित्थ-तिरिच्छि-पिच्छिरेहिं रमिअमेअं ॥ ७३ ॥

धिइ दिहि । "धृतेर्दिहिः" [१३१] इति धृतेर्दिहिर्वा ॥

मज्जर वज्जर । "मार्जार°" [१३२] इत्यादिना मार्जारस्य मज्जरवज्जरौ । पक्षे मज्जारेहिं ॥

वेरुलिअ वेडुज्ज । "वैडूर्यस्य वेरुलिअं" [१३३] इति वेरुलिअं वा ॥

एण्हिं एत्ताहे । "एण्हिं एत्ताहे इदानीमः" [१३४] । पक्षे इआणिं ।

पुरिमाणं । "पूर्वस्य पुरिमः" [१३५] । पक्षे अपुव्वं ॥

हित्थ तट्ठा । "त्रस्तस्य हित्थतट्ठौ" [१३६] । पक्षे तत्थ ॥

भयस्सई । "बृहस्पतौ बहो भयः" [१३७] पक्षे बहस्सइ ॥

मइल मलिण । अवह उभय । सिप्पि सुत्ति । छुत्तो छिक्कं । आढत्त आरद्ध । पाइक्कं पयाई । "मालिनोभ°" [१३८] इत्यादिना एषां यथासंख्यं मइलादयो वा । उवहं इत्यपि केचित् ॥ आर्षे उभओकालं इति ज्ञेयम् ॥

दाढ । "दंष्ट्राया दाढा" [१३९] । दाढा संस्कृतेप्यस्ति ॥

बाहिं अबाहिरे । "बहिसो बाहिंबाहिरौ" [१४०] ॥

हेट्ठे । "अधसो हेट्ठं" [१४१] ॥

७३. निजा चासौ मातुःस्वसा च पितुःस्वसा च पितृष्वसुस्तनया च तासां गृहं तस्मिन्निव उद्याने परस्परं तारामेलके सति त्रस्तं सभयं तिर्यक् तिरश्चीनं यथा भवति एवं प्रेक्षणशीलैर्मिथुनैः स्त्रीपुरुषरूपद्वन्द्वैः एतद् वक्ष्यमाणं रतं रमणं कृतम् ॥

माउच्छ माउसिआ । पिउसिअ पिउच्छ । "मातृपितुः°" [१४२] इत्यादिना मातृपितृभ्यां परस्य स्वसुः सिआ छा इत्यादेशौ ॥

तिरिच्छि । "तिर्यञ्चस्तिरिच्छिः" [१४३]॥ आर्षे तिरिआ इति ज्ञेयम्॥

---

१ BC तिर्यञ्च°.

आसण ठिआइ घरिणीइ गह-वई झम्पिऊण अच्छीइं ।
हसिरो मोत्तुं सङ्कं चुम्बिअ अन्नं सढो[1] मुइओ ॥ ७४ ॥
मा सोउआण अलिअं कुप्प मईआ सि तुम्हकेरो हं ।
इअ केण वि अणुणीआ णिअय-पिआ पाणिणीअजडा ॥७५॥
किं हवसि पारकेरा न हु पारक्को तुहाहमिअ भणिआ ।
राइक्क-वार-विलया केणावि हु रायकेरेण ॥ ७६ ॥

७४. रमणमेव गाथाषोडशकेनाह । आसनस्थिताया उपविष्टाया गृहिण्या अक्षिणी झम्पिऊणेति हस्ताभ्यां पिधाय शङ्कां भीतिं मुक्त्वा अन्याम् अपरां स्त्रियं चुम्बित्वा हसिता चस्करिकरणशीलः शठो गूढापराधो गृहपतिर्मुदितः ॥ " भ्रमेष्टिरिटिल्ल० " [४.१६१] इति भ्रमेर्झम्पादेशे " धातवोऽर्थान्तरेपि " [४.२५१] इति पिधानार्थत्वम् ॥

घरिणी । " गृहस्य घरोऽपतौ " [१४४] इति घरः । अपताविति किम् । गह-वई ॥

पिच्छिरेहिं । हसिरो । " शीलाद्यर्थस्येरः " [१४५] इति " तृन् शील° [हे० ५.२] इत्यादिभिर्विहितस्य प्रत्ययस्य इरः ॥

७५. अलीकं सख्याद्युक्तकूटं श्रुत्वा आकर्ण्य त्वं मा कुप्य मा रोषं कुरु । मदीया त्वम् त्वदीयोहम् इति अनया रीत्या केनापि पाणिनीयेन पाणिनीयव्याकरणेन अजडा विचक्षणा निजकप्रिया स्ववल्लभा अनुनीता प्रसादिता । विचक्षणो हि सुखेनैव प्रसाद्यते ॥

झम्पिऊण । मोत्तुं । चुम्बिअ । सोउआण । "क्त्वस्तुम°" [१४६] इत्यादिना तुम् अत् तूण तुआण इत्येते आदेशाः ॥ वन्दित्तु इति अनुस्वारलोपात् । वन्दित्ता [इति] सिद्धसंस्कृतस्यैव वलोपेन । कट्टु इत्यार्षे ज्ञेयम् ॥

तुम्हकेरो । " इदमर्थस्य केरः " [१४७] इति इदमर्थस्य केरः । न च भवति । मईआ । पाणिणीअ ॥

७६. किं त्वं परकीया भवसि यतः । हु इति निश्चितम् । नाहं

---

१ BD सठो.

तुम्हेच्चया य अम्हेच्चया य एगव्व होउ तणु-लट्ठी ।
इअ जम्पिऊण दइआ केण वि सव्वङ्गिअं गहिआ ॥ ७७ ॥
तुह पय-पह-पहिओ हं अप्पणयो पीणिम-प्पणइ-जहणे ।
पीणत्तण-सालि-थणे इअ केण वि तोसिआ रमणी ॥ ७८ ॥

तव परकीयः । किं तु तावकीन इत्यर्थः । ततस्त्वयापि मदीययैव भवितव्यम् इति भावः । इति अनया रीत्या केनापि राजकीयेन राज-संबन्धिना राजवारवनिता भणिता ॥

पारकेरा । पारक्को । राइक्क । रायकेरेण । "परराजभ्यां क्कडिक्कौ च"[१४८] इति आभ्यां यथासंख्यं क्क डित् इक्कश्च । चकारात् केरश्च ॥

७७. यौष्माकी च आस्माकी च तनुयष्टिः एकवद् भवतु । आवयोः संयोगो जायताम् इति भावः । इति पूर्वोक्तं कथयित्वा केनापि सर्वाणि अङ्गानि व्याप्नोति यद् ग्रहणं तत् सर्वाङ्गीणं यथा भवति एवं दयिता प्रिया गृहीता[1] ॥

तुम्हेच्चया । अम्हेच्चया । "युष्मद°" [१४९] इत्यादिना अज एच्चयः ॥

एगव्व । "वतेर्व्वः" [१५०] इति वतेः प्रत्ययस्य व्वः ॥

सव्वङ्गिअं । "सर्वाङ्गादीनस्येकः"[१५१]इति"सर्वादेः पथ्यङ्ग°"[हे०७.१] इत्यादिना विहितस्य ईनस्य स्थाने इकः ॥

७८. पीनत्वप्रणयि काठिन्ययुक्तं जघनं यस्यास्तस्याः संबोधनम् । तथा हे पीनत्वशालिस्तनि तव अहम् आत्मीयः स्वकीयः पदपथपान्थः । अनुचर इत्यर्थः । इति अनया रीत्या केनापि रमणी तोषिता तोषं नीता ॥

पहिओ । "पथो णस्येकट्" [१५२] । "नित्यं णः" [हे० ६.४] इति यः पथो णो विहितस्तस्येकट् ॥

अप्पणयो । "ईयस्यात्मनो णयः" [१५३] इति ईयस्य णयः ॥

---

१ D गृहीता आलिङ्गिता.

पीणत्त-निहि-निअम्बे तिलेल्ल-अङ्कोल्लतेल्ल-कन्तिल्ले ।
मा तित्तिएण कुप्पेत्ति इत्तिअं को वि पियमाह ॥ ७९ ॥
जित्तिअमत्तं रत्तो म्हि[1] एत्तिअं रच्च एत्तिलं किमिमं ।
केण वि एद्दहमुत्ता तुण्हिक्का माणिणी जाआ ॥ ८० ॥
सिहिओ सि जेत्तिअं जेत्तिलं च भणिओ सि जेद्दहं थविओ ।
न हु तेत्तिएण होसि त्ति पई कीइ वि उवालद्धो ॥ ८१ ॥

७९. पीनत्वस्य निधिः स्थानं नितम्बो यस्यास्तस्याः संबोधनम् । तिलस्य स्नेहस्तिलतैलं तच्च अङ्कोठतैलं च ते इव कान्तिमति तद्वत्स्निग्ध-कान्तियुक्ते त्वं तावता सख्याद्युक्तालीकव्यलीकमात्रेण मा कुप्य । इति इत्थम् एतावत् इयन्मात्रं कोपि कश्चित् प्रियाम् आह ॥

पीणिम पीणत्तण । "त्वस्य डिमात्तणौ वा" [१५४] इति त्वस्य डिमात्तणौ। पक्षे पीणत्त ॥

तिलेल्ल । "अनङ्कोठ°" [१५५] इत्यादिना तैलस्य डेल्लः । अनङ्कोठाद् इति किम् । अङ्कोल्लतेल्ल ॥

८०. कश्चिन्मानिनीं प्रसादयन् तया च तत्संयुक्तस्त्वं न मयि तव प्रेमानुबन्ध इत्यादि सक्रोधं निर्भर्त्स्यमानः तां प्रति आह । यावन्मात्रं रक्तः अनुरागयुक्तोस्मि अहं त्वमपि इयत् एतावद् वा रज्यस्व अनुरागं कुरु । नाहम् अधिकम् अर्थये इत्यर्थः । इयत् एतावद् वा इदं क्रोधाडम्बरं किम् । निरर्थकम् इत्यर्थः । केनापि इयत् एतावद् वा उक्ता सती मानिनी तूष्णीका जाता । निश्चितस्ववाल्लभ्यतया न किंचिद् उपालेभे इत्यर्थः ॥

तित्तिएण । इत्तिअं । जित्तिअ । " यत्तद° " [१५६] इत्यादिना एभ्यो डावादेरतोः परिमाणार्थस्य इत्तिअः एतदो लुक् च ॥

८१. यावत् यत्परिमाणं स्पृहितः चेतसि वाञ्छितोसि यावद्

१ BC मि.

तं तेत्तिल-पेम्मं तुह न केत्तिअं तेद्दहा य अणुवित्ती ।
न हु केत्तिला वि केद्दहमित्थं कीइ वि सढो भणिओ ॥ ८२
सयहुत्तं विणइल्लो दइओ जोण्हाल-चन्द-सिरिमन्तो ।
णेहालूए कीइ वि बाहुल्लुच्छीइ अहिसित्तो ॥ ८३ ॥
गव्विर न माणइत्ता सहन्ति गव्वं ति भणिअ कीए वि ।
दइओ हणिओ हणुमा-लङ्गूल-पलम्ब-लट्ठीए ॥ ८४ ॥

भणितः आगच्छागच्छ त्वं मत्प्रिय इत्युक्तोसि यावच्च स्तुतः न त्वत्समः सौभाग्यपात्रम् अपरोस्तीति श्लाघितः । हु इति निश्चितम् । न तावता तावन्मात्रेण भवसि । अनुरज्यसे इत्यर्थः । इति अनया रीत्या कयापि पतिर्भर्ता उपालब्धः रेरे धृष्ट दुराचार आराध्योसि इति निर्भर्त्सितः ॥

८२. तत् तावत् प्रेम तव न कियत् कियन्मात्रम् । तावती च अनुवृत्तिरपि अनुकूलकरणमपि तव नैव कियती । असत्प्रायप्रेमानुवृत्तिरसीत्यर्थः । इत्थम् अनया रीत्या कियदपि कयापि शठः गूढापराधो भणितः ॥

एत्तिअं एत्तिलं एद्दहं । जेत्तिअं जेत्तिलं जेद्दहं । तेत्तिएण तेत्तिल तेद्दहा । केत्तिअं केत्तिला केद्दह । "इदंकिमश्च°" [१५७] इत्यादिना इदंकिंभ्यां यत्तदेतद्भ्यश्च अतोर्डावतोर्वा डित् एत्तिअ एत्तिल एद्दह एतल्लुक् च ॥

८३. शतकृत्वः । अनेकश इत्यर्थः । विनयवान् । अलीकापनयनाय पादप्रणत इत्यर्थः । ज्योत्स्नावच्चन्द्रस्य या श्रीः आह्लादिका शोभा तद्वान् सचन्द्रिकचन्द्रशोभायुक्तो दयितः प्रियः स्नेहवत्या कयापि बाष्पवदक्षिभिः स्नेहवशोद्भूताश्रुप्रवाहयुक्तलोचनैः अभिषिक्तः आर्द्रीकृतः ॥

सयहुत्तं । "कृत्वसो हुत्तं" [१५८] । वारे विहितकृत्वसः हुत्तं ॥

८४. रे गर्विन्[२] साहंकार न मानवत्यः अहंकारवत्यो नायिका गर्वं

१ BC बाहुल्लच्छीहि. २ C गर्वित ; D गर्ववन्.

अन्नत्तो अन्नहि एसि तह वि अन्नत्थ अन्नदो जासि।
एक्कसि न खु त्थिरो सि त्ति पिओ कीइ वि उवालद्धो ॥ ८५
एक्कसिअं चिअ भणिओ एकइआ णेगया य गामिल्लिं।
अप्पुल्ल-पियं वच्चेत्ति भच्छिओ को वि अन्नाए ॥ ८६ ॥

सहन्ते। ताः प्रियाणां गर्वापनोदं कुर्वन्तीत्यर्थः। इति भणित्वा कयापि हनुमल्लाङ्गूलवत् प्रलम्बा द्राघीयसी या यष्टिश्चूतादिलता तया दयितो हतस्ताडितः॥

विणइल्लो। जोण्हाल। सिरिमन्तो। णेहालूए। बाहुल्ल। गव्विर। माणइत्ता। "आस्विल्लो°"[१५९] इत्यादिना मतोः स्थाने आलुइत्यादयो नव आदेशा यथायोगम्। केचिद् मादेशमपि इच्छन्ति। हणुमा॥

८५. अन्यतः सपत्नीतः अन्यत्र अपरसपत्न्याम् एषि गच्छसि। तत्रापि एवमपि सति अन्यतः अपरसपत्नीतः अन्यत्र प्रतिपक्षनायिकायां यासि। एकत्र एकस्यां दयितायां नैव स्थिरोसि। इति अनया रीत्या कयापि प्रिय उपालब्धः॥

अन्नत्तो अन्नदो। "त्तो दो तसो वा" [१६०]॥
अन्नहिं। तह। अन्नत्थ। "त्रपो हिहत्थाः" [१६१]॥

८६. एकदैव भणितस्त्वम् एकदा अनेकदा च ग्राम्याम् आत्मीयाम् आत्मनो वा प्रियां व्रज। एकवाक्येनैव त्वदग्रतस्तावद् एतद् उक्तम् यद् उत त्वं यथेच्छं स्ववल्लभाम् अभिसर। न मम त्वया किमपि प्रयोजनम् इत्यर्थः। इति इत्थम् अन्यया कोपि भर्त्सितः॥

एक्कसि एक्कसिअं एकइआ। "वैक°" [१६२] इत्यादिना एकाद् दाप्रत्ययस्य सि सिअं इआ। पक्षे णेगया॥

गामिल्लिं। अप्पुल्ल। "डिल्लडुल्लौ भवे" [१६६] इति डितौ इल्लोल्लौ॥

निच्च-नवल्लय-रच्चिर मं एक्क-मणं नवाणुराइल्लं ।
एकल्लं चिअ मुञ्चसि कीइ वि रमणम्मि इअ रुन्नं ॥ ८७ ॥
[2]अवरिल्लञ्चल-गहिओ भालोवरि-निहिअ-भुमयमन्नाए ।
भमया-दासो व्व पिओ विहसन्तो सणिअमवगूढो ॥ ८८ ॥
मणयं च मुच्छिरो वेविरो अ मणिअं पिओ मणा हसिरो ।
कीइ वि रइ-मीसाए वम्मह-मीसालिओ रमिओ ॥ ८९ ॥

८७. नित्यं नवे अन्यान्यनायिकारूपे रागवन् रागपर एकस्मिन् त्वय्येव मनो यस्याः सा तथा तां नवानुरागाम् उदीयमानस्नेहाम् एकाम् असहायामेव मां मुञ्चसि कयापि रमणे इति इत्थं रुदितं साश्रुपातं जल्पितम् ॥

अप्पुल्ल । नवल्लय । राइल्लं । " स्वार्थे कश्च वा " [१६४] इति कः । चकारात् डितौ इल्लोल्लौ ॥

नवल्लय । एकल्लं । "ल्लो नवैकाद् वा" [१६५] इति ल्लः । पक्षे एक्क । नव ।

८८. भालस्य उपरि ऊर्ध्वं निहिते धृते भ्रुवौ यत्र ग्रहणे तत् तथा । सकोपम् इत्यर्थः । एवम् उपर्यञ्चलेन उत्तरीयांशुकान्तेन गृहीतः अवष्टब्धः भ्रुवो दास इव तदुत्क्षेपमात्रेण कृत्यकरणात् मन्यते किंकर इव प्रियः अन्यया विहसन् धृष्टत्वाद् विकसन् शनैर्मन्दम् अवगूढः आलिङ्गितः ॥ ज्ञातापराधत्वेन पादपतनादिभिराराधयन्नपि निर्भर्त्सितत्वाद् गन्तुं प्रवृत्तः सन् कृतकोपं चेलाञ्चलेन गृहीत्वा मन्दम् आलिङ्गित इति भावः ॥

[3]अवरिल्ल । "उपरेः संव्याने[१६६]इति ल्लः ॥[संव्यान इति किम्। भालोवरि]॥

भुमय भमया । " भ्रुवो° " [१६७] इत्यादिना मया डमया इत्येतौ ॥

सणिअं । " शनैसो डिअं " [१६८] इति डित् इअं ॥

८९. मनाग् मूर्छावान् मनाग् वेपवान् मनाक् च हास्यवांश्च । शठत्वात् तदावर्जनाय किंचित् तत्तद्भावभाग् इति भावः । मन्मथेन

१ C इक्कमणं; D एकमणं. २ BCD उवरिल्ल.

गिम्हो दीह-गन्ध-अन्धालिणि-दीहर-पत्त-चम्पओ
मण-मउअत्तयाइ कामन्धल-विज्जुलिआ-दुरिक्खओ ।
दिट्ठो विज्जु-पीअ-नव-किंसुअ-पत्तल-पीवलोवणो
तत्ताऊ विओअ-विहुरीकय-पन्थिअ-गोण-खेअणो ॥ ९० ॥

रतेच्छया मिश्रः प्रियः रतिमिश्रया सुरताभिलाषयुतया कयापि रमितः कामितः ॥

मणयं मणिअं । " मनाको न वा डयं च " [१६९] इति डयं डिअं[1] च । पक्षे मणा ॥ मीसालिओ । " मिश्राद्वालिअः " [१७०] । पक्षे मीसाए ॥

९०. दीर्घगन्धेन पुष्पोत्थप्रभूतपरिमलेन अन्धाः । व्याप्ता इत्यर्थः । एवंभूता अलिन्यो यत्र स चासौ दीर्घपत्रश्च एवंभूतश्चम्पको यत्र स तथा । मनसो मृदुत्वेन अकठिनत्वेन : कामान्धैर्विद्युद्वद् दुरीक्षः घनतरतापकृत्त्वेन द्रष्टुम् अशक्यः । विद्युद्वत् पीतानि पीतवर्णानि यानि नवकिंशुकपत्राणि प्रत्यग्रपलाशपुष्पपलाशानि तैः पीतानि उपवनानि यत्र स तथा । तप्तापः संतप्तपानीयः । वियोगेन विधुरीकृता दुःखिता ये पान्थास्त एव अचेतनत्वाद् गावस्तेषां खेदनः खेद[2]जनको ग्रीष्मो दृष्टः इति उत्तरसर्गार्थसूचनम् । राज्ञेति शेषः ॥ षस्तुगौ द्वितीयषष्ठौ जोलीर्वा द्विपदी एकः षण्मात्रः पञ्चचतुर्मात्रा गुरुश्च । [3]तथा द्वितीयषष्ठौ च गणौ जोलीर्वा द्विपदी ॥

दीह दीहर । " रो दीर्घात् " [१७१] इति रो वा ॥

मउअत्तयाइ । "त्वादेः सः" [१७२] इति स एव त्वादिर्वा ॥

अन्धा अन्धल । पत्त पत्तल । विज्जुलिआ विज्जु-पीअ पीअलो " विद्युत्पत्र° " [१७३] इत्यादिना एभ्यः स्वार्थे लो वा ।

तत्ताऊ । गोण । " गोणादयः " [१७४] । गोणादयः शब्दा अनुक्तप्रकृतिप्रत्ययलोपागमवर्णविकारा बहुलं निपात्यन्ते ॥

इत्याचार्यहेमचन्द्रविरचितश्रीकुमारपाल[4]चरितद्याश्रयमहाकाव्यवृत्तौ तृतीयः सर्गः ॥

---

१ BC डिमं. २ C खेदन°. ३ C ते तथा. ४ D °चरितप्राकृतद्या°.

चतुर्थः सर्गः ।

तं निव-पुच्छिअ-दोवारिएण भणिअं ति आम गिम्ह-सिरी ।
उण्हेह सीअला णवि कयलि-वणे पेच्छ पुणरुत्तं ॥ १ ॥
हन्दि विदेसो जीवइ हन्दि पिआ हन्दि किं पिआ मुक्का ।
हन्दि मरणं जमो गिम्हो हन्दि लवन्ति इअ पहिआ ॥ २ ॥

१. अधुना सप्तसप्तत्या गाथाभिर्ग्रीष्मर्तुं वर्णयन् आह । नृपेण कुमारपालभूपालेन पृष्टः वसन्तर्त्वसंभविपुष्पादिदर्शनात् कः संप्रति ऋतुरिति नोदितो यो दौवारिकः प्रतीहारस्तेन इति अमुना प्रकारेण भणितम् । तं इति वाक्योपन्यासे । विवृत्य उक्तम् इत्यर्थः । तदेव वाक्यार्थकर्मणा आह आमेत्यादि । आमेति अभ्युपगता अङ्गीकृता । ज्ञातेति यावत् । ग्रीष्मश्रीः इह उद्यानेस्ति । णवीति वैपरीत्यार्थत्वाद् अप्यर्थो ज्ञेयः । उष्णापि शीतला कदलीवने पश्य । राजन् इति शेषः । पुणरुत्तम् इति एकवारं दृष्ट्वा भूयोपि अवलोकयेति । एवम् अग्रेपि राजन् इति संबोधनपदं ज्ञेयम् ॥

[" अव्ययम् " । १७५ । अधिकारोयम् । इतः परं ये वक्ष्यन्ते आ पादसमाप्तेस्ते अव्ययसंज्ञका ज्ञातव्याः] ॥

तं । " तं वाक्योपन्यासे " [१७६] ॥

आम । " आम अभ्युपगमे " [१७७] ॥

णवि । " णवि वैपरीत्ये " [१७८] ॥

पुणरुत्तं । " पुणरुत्तं कृतकरणे " [१७९] ॥

२. हन्दि इति विषादे । कष्टं विदेशोऽस्माकम् ॥ हन्दीति विकल्पे । जीवति प्रिया न वा ॥ हन्दीति पश्चात्तापे । किं प्रिया अस्माभिर्विरह-

---

१ B सप्तत्या.

हन्द महु हन्दि परिमलमिमं व भणिरेहि भसल-मिहुणेहि।
उअ सहइ कञ्चणारो मउडो इव गिम्ह-लच्छीए ॥ ३ ॥
जणणिं मिव धूअं पिव नत्तिं विअ सोअरं विव सहिं व।
मालारीओं सिणेहा नव-कञ्चण-केअइमुवेन्ति ॥ ४ ॥
जेण अहुल्ला लवली वोलीणा णइ वसन्त-उउ-लच्छी।
फुल्लं च धूलिकम्मं[1] तेण फुडा चेअं[2] गिम्ह-सिरी ॥ ५ ॥

दुःखम् अविचार्यैव मुक्ता। एवं च हन्दीति निश्चितं मरणम् अस्माकम् यतो हन्दीति सत्यम् यमः कृतान्तकल्पो ग्रीष्मः इति पान्था लपन्ति परस्परं जल्पन्ति ॥

हन्दि। " हन्दि विषादविकल्पपश्चात्तापनिश्चयसत्ये " [१८०] ॥

३. हन्द इति। गृहाणेत्यर्थः। मधु मकरन्दम्। हन्दीति। गृहाणेत्यर्थः। परिमलं गन्धम् इदमिव भणितृभिः। मञ्जुगुञ्जितकरणाद् उत्प्रेक्ष्यते। एतद् मधु इदं परिमलं गृह्णीत इत्यन्योन्यं भणनशीलैर्भसलमिथुनैः षट्पदद्वन्द्वैः कृत्वा। उअ इति पश्येत्यर्थः। काञ्चनारो राजति। नीलमणिकल्पालिकलितसुवर्णवर्णप्रसूनत्वेन तर्क्यते मुकुट इव ग्रीष्माश्रियः ॥

हन्द। हन्दि। " हन्द च गृहाणार्थे " [१८१] ॥

४. जननीमिव। दुहितरमिव। नप्त्री पौत्री तामिव। सोदरा भगिनी तामिव। सखीमिव स्नेहाद् नवकाञ्चनकेतकीं नूत्नस्वर्णकेतकीं मालाकार्यः उपयान्ति। तत्कुसुमावचयार्थं समीपे गच्छन्ति ॥ ग्रीष्मे हि स्वर्णकेतक्यः पुष्प्यन्तीति ॥

इमं व। जणणिं मिव। धूअं पिव। नत्तिं विअ। सोअरं विव। सहिं व। " मिवपिव° " [१८२] इत्यादिना एते इवार्थे अव्ययसंज्ञकाः प्राकृते प्रयुज्यन्ते वा। पक्षे मउडो इव ॥

५. वसन्तर्तुलक्ष्मीरतिक्रान्तैव। कथम्। येन लक्ष्यीकृत्य। काः।

---

१ B कम्मं; C कम्मंबं. २ BC चेव.

फुल्ल च्च सुगन्ध च्चिअ लयाण नोमालिआ बले रम्मा ।
जा किर मल्ली जा इर जवा बले ते मयण-बाणा ॥ ६ ॥
सुत्ते जणम्मि जो हिर सद्दो चीरीण सुव्वए णवर ।
गाअइ किल तस्स मिसा णवरि वसन्तस्स गिम्ह-सिरी ॥७॥

अफुल्ला लवली: ॥ तथा ग्रीष्मश्रीः स्फुटैव । कथम् । तेन लक्षीकृत्य । किम् । फुल्लं धूलिकदम्बम् ॥ "गौणात् समया°" [हे० २.२] इत्यादिना येनतेनयोगे द्वितीया । फुल्लं चेति चकारः पृथग्वाक्यद्योतनार्थः ॥

जेण । तेण । "जेण तेण लक्षणे" [१८३] ॥

६. फुल्लैव सुगन्धैव । बले इति निर्धारणे । लतानां मध्ये नवमालिका रम्या ॥ तथा या । किलेति संभावयामि । मल्ली । या किल जपा । बले इति निश्चितम् । ते मदनस्य बाणौ । तत्साध्यपान्थमोहनादिकार्यस्य ताभ्याम् अनुष्ठानात् ॥

णइ । चेअ । च्च । च्चिअ । "णइ चेअ च्चिअ च्च अवधारणे" [१८४] ॥
बले । "बले निर्धारणनिश्चययोः" [१८५] ॥

७. सुप्ते जने यः किल शब्दश्चीरीणां भृङ्गारीणां[1] श्रूयते । किलेति प्रसिद्धौ । लोकस्वापवेलायां चीरीनादः श्रूयत इति लोकप्रसिद्धिः । णवरेति केवलम् । तस्य मिषात् चीरिकाध्वनिव्याजात् । णवरि इति आनन्तर्ये । वसन्तस्य अनन्तरम् किलेति संभावयामि । ग्रीष्मश्रीर्गायति हर्षाद् गानं करोतीव ॥

किर । इर । हिर । "किरेर हिर किलार्थे वा" [१८६] । पक्षे किल ॥

णवर । "णवर केवले" [१८७] ॥

णवरि । "आनन्तर्ये णवरि" [१८८] ॥

---

१ B भृङ्गाराणां.

पहिआ अलाहि गन्तुं अणदइआण कुसलाइँ इह णाइं ।
माइँ इह एध हद्धी इअ व्व चीरीहि उल्लविअं ॥ ८ ॥
समुहोट्ठिअम्मि भमरे वेव्वे त्ति भणेइ मल्लिउच्चिणिरी ।
वारण-खेअ-भएहिं भणिउं वेव्वे वयंसे त्ति ॥ ९ ॥
वेव्व सहि चिट्ठसु हला निसीद मामि रम जासि कत्थ हले ।
दे पसिअ किमसि रुट्ठा हुं गिण्हसु कणय-भायणयं ॥ १० ॥

८. भोः पान्थाः । अलाहि इति निवारणे । अलं गत्वा । गमनेन स्मृतम् इत्यर्थः । अण इति नञर्थे । अदयितानां कान्तारहितानाम् । णाइं इति नञर्थे । इह अस्मिन् वने न कुशलानि । अतः । माइं इति मार्थे । मा इह वने एत । अपि तु स्वपत्नीपार्श्वे गच्छतेत्यर्थः । इतीव । हद्धी इति निर्वेदे । सनिर्वेदं यथा भवति एवं चीरीभिरुल्लपितम् । कूजितव्याजेन पान्थान् प्रति चीरिकाभिरिदम् उक्तम् इत्यर्थः ॥

अलाहि । "अलाहि निवारणे" [१८९] ॥

अण । णाइं । "अण णाइं नञर्थे" [१९०] ॥

माइं । "माइं मार्थे" [१९१] ॥

हद्धी । "हद्धी निर्वेदे" [१९२] ॥

९. वेव्वे इत्यामन्त्रणे । हे वयस्ये इति भणित्वा संमुखोत्थिते भ्रमरे वारणम् अलेर्हस्ततलचालनेन निषेधनम् खेदस्तन्निवारणादेव प्रयासः भयम् अलिदशनात् त्रासः तैः कृत्वा वेव्वे इति मल्लिकाम् उच्चेत्री मल्लिकापुष्पावचयकर्त्री भणति ॥

वेव्वे । "वेव्वे भयवारणविषादे" [१९३] ॥

१०-२१. अधुना[1] गाथाद्वादशकेन ग्रीष्मपानक्रीडाम् आह । द्वादशभिः कुलकम् । ग्रीष्मसुखं मानयितुम् अनुभवितुं प्रवृत्ता एता

---

१ BD सृतम् . २ C अमुना.

हुं तुह पिओ न आओ हुं किं तेणज्ज सो हु अन्न-रओ।
तुमयं खु माणइत्ता तस्स हु जुग्गा सि सा खु न तं ॥११॥
सहि वव्वरो खु अह धीवरो हुं एसो खु तुज्झ ऊ रमणो।
ऊ इअ हसेइ लोओ इमम्मि ऊ किं मए भणिअं ॥ १२ ॥
ऊ अच्छरा मह सही थू रे निक्किट्ठ कलह-सील अरे।
दासो सि इमाइ हरे सढो सि ओ ओ किमसि दिट्ठो ॥१३॥

वारवनिताः इति पूर्वोक्तरीत्या यदपि तदपि क्षीबतया संबद्धासंबद्धं लपित्र्यो भाषणशीलाः पक्काः परिपाकप्राप्ता या द्राक्षास्तासां रसं पिबन्ति पानपात्रैर्धयन्ति ॥ १०. लपनप्रकारमेवाह। वेव्व इति आमन्त्रणे। हे सखि तिष्ठ। हलेति हे सखि निषीद। मामीति हे सखि रमस्व क्रीडां कुरु। हले इति हे सखि क्व यासि। दे इति सामान्येन संबोधने सख्यामन्त्रणे वा। हे सखि [प्रसीद]। किम् असि रुष्टा। हुं इति दाने। वितीर्णम् इत्यर्थः। कनकभाजनं गृहाण।

११. हुं इति पृच्छायाम्। पृच्छाम्यहं तव प्रियो नायातः। हुं इति निवारणे श्रुतम्। अस्माकं किं तेनाद्य। नाधुना तेन प्रयोजनम् इत्यर्थः। हु इति निश्चितम्। सोऽन्यस्यां रतः। खु इति निश्चितम्। त्वं मानवती। हु इति ऊहे। संभावयामि च तस्य योग्या सा अन्या। खु इति ऊहे। संभावयामि च तस्य न योग्या त्वम् असि ॥

१२. हे सखि। खु इति संशये। वर्वरो वा। हु इति संशये। धीवरो वा। खु इति विस्मये। एवं हुशब्दोपि। आश्चर्यम् एष समीपवर्ती तव। ऊ इति गर्हायाम्। निन्दितो रमणः। ऊ इति सूचने। दोषाविष्करणपूर्वम् इति अनया रीत्या इमं त्वत्प्रियं लोकः सखीजनरूपो हसति। अथ वा ऊ इति आक्षेपे। किं मया भणितं लोको हसति ईदृशम् अमुम् इति। एतद् मम वक्तुं न युक्तम् इत्यर्थः।

१३. ऊ इति आश्चर्यम्। अप्सरा मम सखी। थू इति कुत्सायाम।

---

१ BD खु. २ B omits कनक०. ३ CD सूतं.

अव्वो नओ तुह पिओ अव्वो तम्मोसि कीस किं एसो ।
अव्वो अन्नासत्तो अव्वो तुज्झेरिसो[1] माणो ॥ १४ ॥
अव्वो पिअस्स समओ अव्वो सो एइ रूसणो अव्वो ।
अव्वो कट्ठं अव्वो किं एसो सहि मए वरिओ ॥ १५ ॥
अइ एसि रइ-घराओ वणे मिलाणा[2] सि दइअ-दरवलिआ ।
मुणिमो वणे न मुणिमो तं न वणे कहइ न जमङ्गं ॥ १६ ॥

रे इति संभाषणे । निकृष्ट अधम कलहशील । अरे इति रतिकलहे । रतिकलहकारकेत्यर्थः । हरे इति संभाषणे रतिकलहे क्षेपे च । दासोसि अस्या मत्सख्याः । ओ इति सूचने । शठोसि गूढापराधो वर्तसे । ओ इति पश्चात्तापे । किम् आसि दृष्टः । त्वदर्शनात् पश्चात्तापो जात इत्यर्थः ॥

१४. अव्वो इति सूचने । नतस्त्वां प्रियः । अव्वो इति कष्टम् । किं ताम्यसि । अव्वो इति संभाषणे । किम् एष समीपवर्ती अन्यासक्तः । अव्वो इत्यपराधे विस्मये च । तव ईदृशो मानः । सप्रणये प्रणयिनि मानकरणाद् अपराध आश्चर्यं च ॥

१५. अव्वो इति आनन्दे । प्रियस्य समयः आगमनलक्षणः । अव्वो इति आदरे । एति आगच्छति स मद्वल्लभः । अव्वो इति भये । बिभेमि रोषणः स्तोकापराधेपि कोपनः सः । अव्वो इति खेदे विषादे च । कष्टं यथा भवति एवं खिन्ना विषण्णा चाहम् इत्यर्थः । अव्वो इति पश्चात्तापे । अनुतप्तास्मि किम् एष सखि मया वृतः ॥

१६. अयीति संभावयामि । त्वम् एषि आगच्छसि रतिगृहात् । वणे इति संभावयामि । यतो दयितेन उपभुक्ता सती म्लाना विच्छायासि । वणे इति विकल्पे । जानीमो वा न जानीमः । परं वणे इति निश्चितम् । तद् नास्ति यद् अङ्गं न कथयति । दन्तक्षतादिप्रकट-

---

१ C तुब्भेरिसो. २ D गिलाणा.

दासो वणे न मुच्चइ मणे पिओ तुज्झ[1] मुच्चइ स अम्मो ।
पत्तो खु अप्पणो च्चिअ तए सयं चेअं[2] निउणाए ॥ १७ ॥
पाडिक्कं दइआओ ताण वयंसीओं पाडिएक्कं च ।
पत्तेअं मित्ताइं उअ एसो एइ भासन्तो ॥ १८ ॥
देक्ख तुहेसो दइओ कहमिहरा पुलइआ सि दट्ठुमिमं ।
भणिमो न वयमिअरहा मुणिअमिमं एक्कसरिअं ति[3] ॥१९॥

नाद् अङ्गमेव सुरतक्रीडितं प्रतिपादयतीत्यर्थः । उपभुक्तस्य तक्षादित्वात् [४. ३९५] दरवलः ॥

१७. वणे इत्यनुकम्प्ये । मणे इति विमर्शे । अन्ये मन्ये इत्यर्थेपि इच्छन्ति । अहं विमृशामि मन्ये वा प्रियस्तव दासः अनुकम्प्य इति न मुच्यते ॥ स प्रियैः अम्मो इति आश्चर्यम् स्वयमेव प्राप्तः खु इति आश्चर्यम् त्वया निपुणया [स्वयमेव] मुच्यते ॥ निपुणयेति सोल्लुण्ठम् । ज्ञातं तव नैपुण्यं यद् अत्यन्तप्रणतं प्रेयांसं स्वयं गृहम् आगतम् अवमन्यस इत्यर्थः ॥

१८. काचित् सखी कलिकौतुकिनी कांचन प्रति प्रियव्यलीकानि साक्षादेव दर्शयति । प्रत्येकं दयिता अन्या वल्लभाः प्रत्येकं तासां दयितानां वयस्यश्च[5] प्रत्येकं मित्राणि च तासाम् अनुकूलानि भाषमाणः आवर्जनार्थम् आलपन् । उअ इति पश्य । एष त्वत्प्रियः एति आगच्छति ॥

१९. पश्य तव एष दयितः । कथम् इतरथा इमं दृष्ट्वा पुलकितासि । न च कूटभाषिकात्वम् अस्मासु आरोप्यम् यतो न वयम् इतरथा पुलकावलोकनं विना भणामः । अतः एक्कसरिअंति[6] झगिति सांप्रतमेव वा इदं तवायं वल्लभ एवेति ज्ञातम् ।

---

१ C तुब्भ. २ BC चेव. ३ BC पि. ४ BC स्वप्रियः. ५ B वस्यश्च; ६ BD एक्कसरिअमिति.

मा तम्म मोरउल्ला दर-विअसिअ-बन्धुजीव-कुसुमोट्ठि ।
अणुसोचसि धुत्तमिमं सरल-सहावे किणो रमणं ॥ २० ॥
वार-विलया इ एआ गिम्ह-सुहं माणिउं पयट्टा जे ।
इअ जं[2] वि तं पि लविराओं पिअन्ति र पिक्क-दक्ख-रसं ॥२१॥

२०. दर इति अर्धेन ईषद् वा विकसितं यद् बन्धुजीवकुसुमं जपापुष्पं तद्वद् ओष्ठौ यस्यास्तस्याः संबोधनम् । मोरउल्ला इति मुधा त्वं मा ताम्य । तथा । किणो इति प्रश्ने । हे सरलस्वभावे धूर्तं शठम् इमं रमणं किम् अनुशोचसि । मायाविनोऽस्य अनुशोचनं कर्तुं नोचितम् इत्यर्थः ॥

वेव्वे । वेव्व । " वेव्व चामन्त्रणे " [१९४] ॥
हला । मामि । हले । " मामि हला हले सख्या वा " [१९५] पक्षे सहि॥
दे । " दे संमुखीकरणे च " [१९६] ॥
हुं । " हुं दानपृच्छानिवारणे " [१९७] ॥
हु । खु । " हु खु निश्चयवितर्कसंभावनविस्मये " [१९८]
ऊ । " ऊ गर्हाक्षेपविस्मयसूचने " [१९९] ॥
थू । " थू कुत्सायाम् " [२००] ॥
रे । अरे । " रे अरे संभाषणरतिकलहे " [२०१] ॥
हरे । " हरे क्षेपे च " [२०२] ॥
ओ । " ओ सूचनापश्चात्तापे " [२०३] ॥
अव्वो । " अव्वो सूचनादुःखसंभाषणापराधविस्मयानन्दादरभयखेदविषाद-पश्चात्तापे " [२०४] ॥
अइ । " अइ संभावने " [२०५] ॥
वणे । " वणे निश्चयविकल्पानुकम्प्ये च " [२०६] ॥
मणे । " मणे विमर्शे " [२०७] ॥
अम्मो । " अम्मो आश्चर्ये " [२०८] ॥

---

१ BC पयट्टो. २ BD जं पि.

एक्केक्कमेस स महू अम्बो वि हु एक्कमेक्कमेसो सो ।
लोआ हणिही पहिआऽलीण रवेणेममाह वणं ॥ २२ ॥

अप्पणो । " स्वयमर्थे अप्पणो न वा " [२०९] पक्षे सयं ॥

पाडिक्कं । पाडिएक्कं । "प्रत्येकमः पाडिक्कं पाडिएक्कं"[२१०] । पक्षे पत्तेअं ॥

उअ । " उअ पश्ये " [२११] । पक्षे देक्ख ॥

इहरा । " इहरा इतरथा " [२१२] पक्षे इअरहा ॥

एक्कसरिअं । " एक्कसरिअं झगिति संप्रति " [२१३] ॥

मोरउल्ला । " मोरउल्ला मुधा " [२१४] ॥

दर । " दरार्धाल्पे " [२१५] ॥

किणो । " किणो प्रश्ने " [२१६] ॥

[इ । जे । र । " इजेराः पादपूरणे " [२१७] ॥

वि । पि । " प्यादयः " [२१८] ॥

इति प्राकृतव्याश्रयमहाकाव्ये अष्टमस्याध्यायस्य उदाहरणप्रतिपादनद्वारेण
द्वितीयः पादः संपूर्णः ॥

---

२२. एकैकं पृथक्पृथग् यथा भवति एवम् एष स मधुः मधूकः तथा एकैकम् आम्रोपि । हु इति संभावयामि । भो लोकाः पान्थान् हनिष्यति इदम् आह अलीनां रवेण गुञ्जितव्याजेन वनं काननं कर्तृ । अन्योपि अध्वन्यान् प्रति कृपालुतया कचिद् अवस्थितांश्चौरादीन् घातकान् कथयतीत्युक्तिलेशः ॥

एक्कमेक्कम् । "वीप्स्यात् स्यादेः" [१] इत्यादिना वीप्सार्थात् पदात् परस्य स्यादेः स्थाने स्वरादौ वीप्सार्थे पदे परे मो वा । पक्षे एक्केक्कम् ॥

अम्बो । " अतः सेर्डोः " [२] इति डो ॥

एस एसो । स सो । " वैतत्तदः " [३] इति डो वा ॥

लोआ । पहिआ । " जश्शसोर्लुक् " [४]

इमं । "अमोऽस्य"[५]इति अमोऽस्य लुक् । "शेषेऽदन्तवत्"[३.१२४] इत्यदन्तवत्त्वात् ॥

खज्जूरेहि पिआलेहिं फणसेहिँ अवि दंसिअ-फलत्तो ।
हरिसाओ दूराउ वि उज्जाणमिमं न को सिहइ ॥ २३ ॥
सिरिसाहिन्तो तह किंसुआहि बउला य महमहिअ गन्धो ।
देसत्तो गामाओ नयराउ वि कं न आणेइ ॥ २४ ॥
पत्थाहिन्तो रामेसुन्तो देवेसराहि वि अणूणो ।
धारा-हरस्स मज्झे तओ गओ सज्जिअम्मि निवो ॥ २५ ॥

अलीण । रवेण । टामोर्णः " [६] इति टाया आमश्च णः ॥

२३. खर्जूरैः प्रियालैः राजादनैः पनसैश्च कृत्वा दर्शितं च तत् फलं च एतस्मात् प्रकटितफलाद् अत एव हर्षाद् दूराद् अनासन्नदेशादपि को न उद्यानम् इदं स्पृहयति । अपि तु तत्तद्वृक्षफलास्वादवाञ्छया सर्वोपि सहर्षम् इदम् अभिलषतीति भावः ॥

खज्जूरेहि । पिआलेहिं । फणसेहिँ । " भिसो हि हिँ हिं " [७] ॥

२४. शिरीषात् तथा किंशुकाद् बकुलाच्च प्रसृत्य गन्धः कर्ता देशेभ्यो ग्रामेभ्यो नगरेभ्योपि कं न आनयति किं तु तेन गन्धेन कृष्टः सर्वतः सर्वोप्यागच्छतीत्यर्थः ॥

फलत्तो । हरिसाओ । दूराउ । सिरिसाहिन्तो । किंसुआहि । बउला । "ङसेस्त्तो दो दु हि हिन्तो लुक् " [८] इति ङसेः षड् आदेशाः ॥

२५. अथ ग्रीष्मर्तुविलाससर्वस्वभूतं जलकेलिक्षणं विवर्णयिषुः जलयन्त्रगृहनृपप्रवेशपूर्वं जलयन्त्रगृहवामादिदेशतद्वितर्दिमकरमुखस्फटिकस्तम्भद्वारोत्तरङ्गपञ्चालिकाकर्णादिप्रदेशेभ्यस्तत्साधनभूतं जलनिर्गमम् आह । पार्थेभ्यः पाण्डवेभ्यः रामेभ्यः रामचन्द्रपरशुरामबलभद्रेभ्यः इन्द्रेभ्योपि अनूनः । सर्वोत्तम इत्यर्थः । नृपः धारागृहस्य जलयन्त्रगेहस्य सज्जिते सकलोपकरणोपेते मध्ये ततो दौवारिकाद् ग्रीष्मप्रादुर्भावश्रवणानन्तरं गतः प्रविष्टः ॥

---

१ BD सिरसा°. २ BC किं. ३ B सिरसा°.

रेल्लन्ता वण-भागा तओ पलोट्टा जवा जलाणोघा ।
वामाउ दाहिणाओ समुहत्तो पच्छिमाहिन्तो ॥ २६ ॥
वेइअ-मयर-मुहाहि अ आ-मूल-सिरं च फलिह-थम्भाओ ।
वारोत्तरङ्गयाओ नीहरिआ वारि-धाराओ ॥ २७ ॥
पञ्चालिआहि मुक्कं कन्नेसुन्तो जलं मुहासुन्तो ।
हत्थेहिन्तो चरणाहिन्तो वच्छाहि उअरेहि ॥ २८ ॥

देसत्तो । गामाओ । नयराउ[1] । पत्थाहिन्तो । रामेसुन्तो । देवेसराहि । "भ्यसस् त्तो दो दु हि हिन्तो सुन्तो" [९] इति भ्यसः षड् आदेशाः ॥

धारा-हरस्स । "ङसः स्सः" [१०] ॥

मज्झे । सज्जिअम्मि । "ङे म्मि ङेः" [११] इति ङेर्ङित् एकारः म्मिश्च ॥

२६. ततो राज्ञो यन्त्रगृहप्रवेशाद् ऊर्ध्वं वनभागान् प्लावयन्तो जवात् जलौघाः प्रवृत्ताः । कथम् । वामात् । दक्षिणात् । संमुखात् । पश्चिमात् । पार्श्वपृष्ठाग्रप्रदेशस्थजलयन्त्रप्रादुर्भूतजलप्रवाहैर्वेगेन काननान्तराला व्याप्ता इत्यर्थः ॥ प्लावयतेः तक्षादित्वात् [४.३९५] रेल्लादेशः ॥

२७. वेदिकायां वितर्दौ यानि मकरमुखानि तेभ्यश्च मूलं च शिरश्च ते अभिव्याप्यामूलशिरो यथा भवति एवं स्फटिकस्तम्भेभ्यश्च द्वाराणां यान्युत्तराङ्गाणि ऊर्ध्वदारूणि तेभ्यश्च वारिधारा निःसृताः ॥

रेल्लन्ता । वण-भागा । जवा । जलाण । वामाउ । दाहिणाओ । समुहत्तो । पच्छिमाहिन्तो । मुहाहि । थम्भाओ । गयाओ । "जश्शस्ङसित्तोदोद्वामि दीर्घः" [१२] । एषु अतो दीर्घः । ङसिनैव सिद्धे त्तोदोदुग्रहणं भ्यसि एत्वबाधनार्थम् ॥

२८. कर्णेभ्यः मुखेभ्यः हस्तेभ्यश्चरणेभ्यो वक्षोभ्यः उदरेभ्यः पञ्चालिकाभिः शालभञ्जिकाभिर्जलं मुक्तम् ॥

---

१ BC नगराउ.

वेएणं सम-विसमे पूरन्तेहिं जलेहि कूवेहि ।
खन्धेसु तुसार-मिसा तरूहिं पुलउ व्व पायडिओ ॥ २९ ॥
दट्ठुं तं छणमच्छीहिं जणो उज्जाण-भूमिसु अमन्तो ।
तत्थ गिरीसु तरूओ गओ गिरीओ तरूसुं च ॥ ३० ॥
पक्खेसु चउसु दारेसु चऊसु चऊहि सालभञ्जीहि ।
चउहि करएहि तुल्लं पलोट्टिअं वारि धारीए ॥ ३१ ॥

कन्नेसुन्तो । मुहासुन्तो । हत्थेहिन्तो । चरणाहिन्तो । वच्छाहि । उअरेहि । "भ्यसि वा" [१३] । भ्यसादेशे अतो दीर्घो वा ॥

२९. कूपेभ्य इति उपात्तविषये अपादाने पञ्चमी । ततः कूपाद् निःसृत्येत्यर्थः । वेगेन दक्षपुरुषप्रेरितकूपान्तर्वर्तियन्त्रवर्त्त्याजवेन समविषमान् प्राञ्जलनिम्नोन्नतप्रदेशान् पूरयद्भिर्जलैः कृत्वा तरुभिः कर्तृभिः । मूलात् शाखावधयः प्रकाण्डाः । तेषां मस्तकानि स्कन्धास्तेषु पुलक इव वेगविनिःसृतजलप्रवाहोच्छलिततद्बिन्दुसंदोहविष्वग्व्याप्तत्वेन रोमाञ्च इव प्रकटितः व्यक्तीकृतः ॥

वेएणं । सम-विसमे । "टाणशस्येत्" [१४] इति एकारः ॥

कन्नेसुन्तो इत्यादि । पूरन्तेहिं । जलेहि । कूवेहि । खन्धेसु । "भिस्भ्यस्सुपि" [१५] एषु अत ए ॥

३०. तत्र सर्वर्तुपुष्पजातियुक्तत्वात् प्रसिद्धासु उद्यानभूमिषु अमान् संकीर्णत्वेन अवस्थातुम् अपारयन् तम् आश्चर्यकारिक्षणं मकरमुखादिजलयन्त्रनिर्गममहोत्सवम् अक्षिभिर्द्रष्टुं जनस्तरुभ्यो गिरिषु गिरिभ्यस्तरुषु च गतः । निरन्तरायम् अवलोकयितुम् उच्चोच्चतरप्रदेशेष्वारूढ इत्यर्थः ॥

तरूहिं । अच्छीहिं । गिरीसु । तरूओ । गिरीओ । तरूसुं । "इदुतो दीर्घः" [१६] ॥ क्वचिन्न । भूमिसु ॥

३१. पक्षेषु स्तम्भादिपार्श्वेषु चतुर्षु द्वारेषु पार्श्वपृष्ठाग्रगृहमुखेषु

१ D धाराए. २ D वेगेगं. ३ D तं तत्राश्चर्य°. ४ D °यन्त्रजल°.

थम्भ-सिहराहि चउओ चऊओं वेई-मुहाहि सिञ्चीअ ।
कील-गिरी कील-तरू जल-पूरो उरुं अमन्द-गई ॥ ३२ ॥
साऊ जलोह-पन्ती जइ एसा किं दहिं महुं किं वा ।
इअ नम्म-पडू जल-पाण-रई लवइ म्ह विड-लोओ ॥ ३३ ॥
मयणग्गउ तह विरहग्गओ वि संधुक्किआ चिरं जेहि ।
अइ-मलय-वायओ वायउ व्व हूआ जल-प्पवहा ॥ ३४ ॥

चतुर्षु वर्तमानाभिश्चतसृभिः शालभञ्जिकाभिः चतुर्भिः करकैर्वारि-घटिकाभिः कृत्वा तुल्यं युगपद् धारया वारि पर्यस्तं मुक्तम् ॥

३२. स्तम्भशिखरेभ्यश्चतुर्भ्यः वेदिकामुखेभ्यश्चतुर्भ्यः अमन्दगतिः शीघ्रप्रवृत्तिः उरुर्महान् जलपूरः क्रीडार्थं कृताः गिरयः क्रीडागिरयस्तान् तथा क्रीडातरून् असिञ्चत् औक्षत् ॥

चउसु चऊसु । चउहि चऊहि । चउओ चऊओ । "चतुरो वा "[१७] इति दीर्घो वा ॥

कीलगिरी । कील-तरू । " लुप्ते शसि " [१८] इति दीर्घः ॥

३३. स्वादुः जलौघपङ्क्तिः मकरमुखादिनिर्गतजलप्रवाहपरंपरा यद्येषा तदा किं दधि किं वा मधु । शरीरसौस्थ्यस्य अमृतमधुरया अनयैव कृतत्वाद् नैताभ्यां प्रयोजनम् इत्यर्थः । इति नर्मणि परस्परं चस्करौ पटुः जलपानरतिर्विटलोकः षिञ्जनो लपति स्म ॥

साऊ । पन्ती । पडू । रई । "अक्लीबे सौ" [१९] इति दीर्घः । अक्लीब इति किम् । दहिं । महुं । केचिद् दीर्घत्वं विकल्प्य मादेशमिच्छन्ति । उरुं अमन्द-गई ॥

३४. मदनाग्नयस्तथा विरहाग्नयोपि यैश्चिरं संधुक्षिताः संदीपिताः ते वायव इव जलप्रवाहा भूता जाताः । तत् किं मलयवायव इव । नेत्याह । अतिक्रान्तमलयवायवः । पान्थसार्थस्य अधिकतरं मदनाग्नि-

जलिअग्गिणो व्व जल-वाउणो वि विरहीण साहवो नासि ।
अह वा विहिम्मि वामे साहू वि न साहुणो हुन्ति ॥३५॥
कीला-गिरिणो साहउ कीला-तरुणो वि साहओ जाया ।
नीक-पवाहेहि जओ गिरी तरू वा जल-सलोणा ॥ ३६ ॥
उच्चिणिअ बहू तरुणो काउं गिरिणो व्व बहु-कुसुम-रासी ।
गिरिणो तरुणो अ तले कुसुमाभरणाइँ रइआइं ॥ ३७ ॥

विरहाग्निदीपनात् तेभ्योप्युत्कृष्टा इत्यर्थः । अत्र तच्छब्दो ज्ञेयः ॥

३५. ज्वलिताग्नय इव जलेन मिश्रा वायवो जलवायवस्तेपि विरहिणां पान्थानां ज्वलिताग्नय इव साधवः उपकारका नासन् । अधिकतरं संतापमेव चक्रुरित्यर्थः । अथ वा युक्तमेवैतत् । विधौ वामे प्रातिकूले सति साधवोपि हिता अपि न साधवो हिता भवन्ति ॥

मयणग्गउ विरहग्गओ । वायओ वायउ । " पुंसि जसो डउ डओ वा " [२०] इति अउ अओ इत्यादेशौ । पक्षे अग्गिणो । वाउणो ॥

३६. नीकानां कुल्यानां प्रवाहैः कृत्वा क्रीडागिरयः साधवः प्रधानाः क्रीडातरवोपि साधवो जाताः । यतो गिरयस्तरवो वा जलेन सलवणा लावण्योपेता भवन्ति ॥

साहवो । "वोतो डवो "[२१]इति जसो डित् अवो । पक्षे साहू । साहुणो । साहउ । साहओ ॥

३७. उच्चित्य बहूंस्तरून् ततः कृत्वा गिरीनिव अत्युच्चत्वात् पर्वतानिव बहुकुसुमराशीन् गिरेस्तरोश्च तले अधः कुसुमाभरणानि जलकेलिक्षणोचितानि कर्णपूरादीनि रचितानि । दंपतिभिरिति शेषः ॥

कीला-गिरिणो । कीला-तरुणो । तरुणो । गिरिणो । "जश्शसोर्णो वा"[२२] इति णो । पक्षे गिरी । तरू । बहू । रासी ॥

---

१ BCD दंपतीभि°.

गुरुणो कीला-गिरिणो निवडिअ निज्झर-जलाइँ जायाइं।
चन्दण-घुसिणछाइं दहिणो महुणो सिरि-हराइं ॥ ३८ ॥
लीला-गिरीउ चङ्किम-गुरूउ निज्झर-जलाइँ सहिआइं।
अखलिअ-गइस्स किर रइ-पहुस्स जय-वेजयन्तीओ ॥३९॥
रइ-अहिवइणा पहुणा तइआ पबलेण तरुण-मिहुणाण।
दहिणा दहिं व महुणा महुं व मिलिअं मणेण मणं ॥ ४० ॥

३८. गुरोः महतः क्रीडागिरेः सकाशाद् निपत्य निर्झरजलानि चन्दनघुसृणवन्ति सन्ति चन्दनमिश्रितत्वाद् दध्नः घुसृणमिश्रितत्वाच्च मधुनः सकाशात् श्रियं हरन्ति चोरयन्ति दध्नो मधुनो वा संबन्धिनीं श्रियं हरन्ति श्रीहराणि जातानि। तदधिकशोभाकलितानि संवृत्तानीत्यर्थः ॥

३९. चङ्क्रत्वेन प्रधानत्वेन गुरोर्गरिष्ठात् लीलागिरेः सकाशाद् निर्झरजलानि अस्खलितगतेः अविलङ्घिताज्ञस्य रतिप्रभोः किर इति इवार्थत्वात् जयवैजयन्त्य इव राजितानि द्राघीयस्त्वनिर्मलत्वाभ्यां जयपताका इव शोभितानि ॥

गिरिणो। तरुणो। गुरुणो। कीला-गिरिणो। दहिणो। महुणो। "ङसिङसोः पुंक्लीबे वा" [२३] इति णो। पक्षे गिरीउ। गुरूउ। °गइस्स। पहुस्स ॥

४०. प्रभुणा स्वाज्ञाविधापनात् समर्थेन तदा लीलागिरिनिपतन्निर्झरवारिप्रवाहावसरे प्रबलेन सर्वसामग्रीयुक्तत्वेन प्रचण्डेन रत्यधिपतिना तरुणमिथुनानां युवदंपतीनां दध्ना दधीव मधुना मध्विव मनसा मनो मेलितम् ऐक्यं प्रापितम् ॥

अहिवइणा। पहुणा। दहिणा। महुणा। "टो णा" [२४] इति णा। ङसिङसोरित्यस्य व्यावृत्तिरपि। इदुत इत्येव। मणेण। ट इति किम्। दहिं महुं ॥

मणं। "क्लीबे स्वरान्म् सेः" [२५] इति सेः म्। केचिद् अनुनासिकमपीच्छन्ति तदा। दहिँ महुँ ॥

कुल्ल-जलाइं अइसीअलाइँ विमलाणि पेच्छ पवहन्ति ।
इअ भणिरा महिलाओ जल-केलि-छणे पयट्टाउ ॥ ४१ ॥
हारावलि-मुत्ताउ वि जलाहयाओ जलम्मि निवडन्ता ।
अगणिअ जले विलुलिआ का वि मयच्छी हसन्तीआ ॥४२॥
मउवीओ तणुवीआ पेच्छ जले संचरन्ति लीलाअ ।
रम्माइ बहु-विहाए ठाणं अच्छर-सरिच्छाओ ॥ ४३ ॥

४१. अतिशीतलानि विमलानि कुल्याजलानि प्रवहन्ति स्रोतोरीत्या गच्छन्तीति पश्य इति भणिन्यः परस्परं भाषमाणा महिला युवत्यः जलकेलिक्षणे प्रवृत्ताः । कान्तैः सहेति शेषः ॥

जलाइं । अइसीअलाइँ । विमलाणि । "जश्शस इँइंणयः सप्राग्दीर्घाः" [२६] ॥

४२. अधुना तदेव जलकेलिक्षणं षट्त्रिंशता गाथाभिः प्राह । जलैराहतास्ताडिताः अत एव जले निपतन्तीः भ्रश्यन्तीः हारावलिमुक्ता अपि आस्तां वस्त्रादिकं मुक्ताकलापमुक्ता अपि अगणयित्वा अनादृत्य हसन्ती [1]प्रियैः सह चस्करिपरा कापि मृगाक्षी जले विलुलिता बुडिता ॥

महिलाओ पयट्टाउ । मुत्ताउ जलाहयाओ । "स्त्रियाम् उदोतौ वा" [२७] इति जश्शसोः [प्रत्येकम्] उदोतौ सप्राग्दीर्घौ । पक्षे भणिरा । निवडन्ता ॥

४३-४५. त्रिभिर्विशेषकम् । अहिलोकवध्वाः पातालकन्यकायाः सुरवध्वा देवाङ्गनायाः तथा यक्षश्च पुण्यजनः किंनरश्च किंपुरुषस्तयोर्वध्वाः सकाशाद् रूपाधिकाः । ताभ्योपि प्रधाना इत्यर्थः । वध्वा इति जातिविवक्षया एकवचनम् । दयितास्तटस्थतरुणैः पार्श्वस्थयुवभिः इति पूर्वोक्तं भणिताः ॥ ४३. तदेवाह । मृद्व्यः कोमलच्छवयः अप्सरःसदृक्षा देवाङ्गनातुल्यास्तन्व्यो नायिका रम्याया बहुविधाया लीलायाः

---

१ D प्रियेण.

पिच्छ ह जल-लहरीए एन्तीइ उदञ्चिरीअ पडिरीआ।
खेलन्ति मज्झ-लुलिआ सभराइअ-तरल-कबरीओ ॥ ४४ ॥
अहि-लोअ-वहूए सुर-वहूइ तह जक्ख-किंनर-वहूअ।
रूवाहिआउ दइआ तडत्थ-तरुणेहि इअ भणिआ ॥ ४५ ॥
को वि वहूओ अइखेअराउ खे खेअरीण पच्चक्खं।
रममाणीउ अकालीउ लहिअ गण्डूसमुद्धंसिओ ॥ ४६ ॥

स्थानं रम्यया बहुविधया लीलया [वा] जले संचरन्तीति पश्य इति योजनायां मृद्व्य इत्यादिषु प्रथमा । मृद्वीः अप्सरःसदृक्षास्तन्वीः पश्य जले संचरन्ति लीलयेत्यादियोजनायां तु द्वितीया ॥

४४. यत्याम् आगच्छन्त्याम् उदञ्चित्याम् ऊर्ध्वं यान्त्यां पतित्याम् अधोभवित्र्यां जललहर्यां मध्ये लुलिता गताः सफरायिताः तदाकारत्वाद् मीनवद् आचरितास्तरलाश्चञ्चलाः कबर्यो वेणयो यासां तास्तथा खेलन्ति क्रीडन्ति इति पश्य ॥ ४ ॥

हसन्तीआ। तणुवीआ। "ईतः सेश्वा वा"[२८] इति आः। पक्षे मयच्छी। मउवीओ ॥

४६. अतिक्रान्ता रूपसौन्दर्याद्याधिक्यात् पराभूताः खेचर्यो विद्याधरवध्वो यया तस्या रममाणायाः क्रीडन्त्याः अकालाया अनुकूलाचरणाद् अक्षेपिकाया [वध्वाः] सकाशात् खे गगनाङ्गणे खेचरीणां प्रत्यक्षं यथा भवति एवं गण्डूषं मुखजलं लब्ध्वा प्राप्य कोपि उद्धुषितः । मूर्तप्रेमायमाणप्रियागण्डूषप्रादुर्भवत्प्रमोदतया पुलकितः । धुषिः सौत्रः ॥

लीलाअ रम्माइ वहु-विहाए। लहरीए एन्तीइ उदञ्चिरीअ पडिरीआ। वहूए वहूइ। वहूअ। वहूआ इति वा पाठः। "टाङस्ङेरद् आद् इद् एद् वा तु ङसेः"

१ BC उद्वसिओ. २ B omits लीलया. ३ C तथाका.° ४ BC repeat here महिलाओ पयट्टाउ। मुत्ताउ जलाहयाओ। स्त्रियाम् उदोतौ वा इति जश्शसोः प्रत्येकम् उदोतौ सप्राग्दीर्घौ। पक्षे भणिरा ॥. ५ CD insert प्राप्ति after गण्डूष°.

रममाणाए कालाइ इमीए कीइ काइ अ इमाए ।
रे अज अजाइ रमसे त्ति का वि भणिउं हणीअ पिअं ॥४७॥
जीओ तीओ मुद्धा जाओ ताओ वि तह विअड्ढाओ ।
तरुणीण जाण ताण वि जल-दन्द-रणे पयट्टाओ ॥ ४८ ॥
अच्छीण कज्जल-सिरी जा सा गलिआ न काण उम्मीही ।
कं पि हु तं नयण-सिरिं ता पत्ता जं जणो सिहइ ॥ ४९ ॥

[२९] इति प्रत्येकम् अत् आत् इत् एत् इत्यादेशाः । ङसेस्तु वा। पक्षे वहूओ इत्यादि । टादीनाम् इति किम् । सरिच्छाओ इत्यादि ॥

लीलाअ । रम्माइ । बहुविहाए इत्यादि । 'नात आत् " [३०] इति स्त्रियाम् आदन्ताट्टादीनाम् आ आदेशो न ॥

खेअरीण । "प्रत्यये ङीर्न वा" [३१] । अणादिसूत्रेण प्रत्ययनिमित्तो यो ङीरुक्तः [है० २. ४. २०] स स्त्रियां नाम्नो वा । पक्षे खेअराउ ॥

४७. रममाणयः क्रीडन्त्या कालया तिरस्कारपरया कया कुत्सितया अनया कया तथा अनया च अजया भर्तृप्रसादनकलाविकलत्वेन पशुप्रायया सार्धं रे अज कान्ताप्रसादनानिपुणत्वेन पशो त्वं रमसे इति पूर्वोक्तं भणित्वा कापि प्रियं जघान जलैरताडयत् ॥

रममाणीउ । अकालीउ । इमीए। "अजातेः पुंसः"[३२]। अजातिवाचिनः पुंलिङ्गात् स्त्रियां वर्तमानाद् ङीर्वा । पक्षे रममाणाए । कालाइ । इमाए ॥

४८. यासां तासामपि तरुणीनां मध्ये यास्ता मुग्धा अकृत्रिममनोहराः तथा यास्ता अपि विदग्धाः कटाक्षविक्षेपादिभिः प्रियावर्जने प्रवीणा जलद्वन्द्वरणे प्रियैः सह जलकेलौ प्रवृत्ताः ॥

४९. अक्ष्णां या कज्जलश्रीः अञ्जनशोभा सा कासाम् ऊर्मिभिः कलोलैः न गलिता । किं तु सर्वासां सा सलिलैः क्षालितेत्यर्थः ॥ परं कामपि । हु इति आश्चर्यम् । ताम् अद्भुतां नयनश्रियं ता नायिकाः प्राप्ताः यां जनः काङ्क्षति । कज्जलापगमे हि नयनयोर्निःश्रीकता

घण-छाहि-कयलि-छाये हलद्दि-गोरी हलद्द-गोरीहि ।
विलया जलम्मि रमिआ ससाउ दुहिआउवन्नोन्नं ॥ ५० ॥
तर फलिहं कट्ठ अरे न लवसि किं अज्ज मा लवसु अज्जो ।
पइ नेसि पई मेसु व भणीअ इअ का वि जल-मज्झे ॥५१॥

भवति । परम् एतन्नयनानां तथाभावेपि स्वभावमनोहरत्वाद् एतानि सर्वोपि सतृष्णम् ईक्षत इत्यर्थः ॥

कीइ काइ । जीओ तीओ । जाओ ताओ । " किंयत्तदोऽस्यमामि " [३३] । एभ्यः स्त्रियां ङीर्वा । अस्यमामीति किम् । का । जाण ताण । जा सा । काण । कं तं जं ॥

५०. घना चासौ छाया च आतपाभावो घनच्छाया तया युक्ताः कदल्यो रम्भास्तासां छाया पङ्क्तिस्तस्यां जले च हरिद्रावद् गौर्यः गौरवर्णास्ताभिः सह हरिद्रागौर्यो वनिता रताः क्रीडिताः । निरुपमस्नेहयुक्तत्वाद् यकाभिर्हरिद्रागौरीभिः सार्धं ता रमन्ते तासां मन्यन्ते स्वसारो भगिन्यस्ता इव दुहितरः पुत्रिकास्ता इव वेति ॥

छाहि छाये । हलद्दि-गोरी हलद्द-गोरीहि । " छायाहरिद्रयोः " [३४] । अनयोः आप्प्रसङ्गे स्त्रियां ङीर्वा ॥

ससाउ । दुहिआउ । " स्वस्रादेर्डा " [३५] इति स्त्रियां ङित् आः ॥

५१. अरे इति संभाषणे । हे काष्ठ नीरसत्वाद् दारो त्वं परिखां खातिं तर अतिक्रमय । सरसविचक्षणोचिते जलकेलिक्षणे किं मम पार्श्वे तिष्ठसीत्यर्थः । काष्ठं किल तीर्त्वा तटीं गच्छतीत्युक्तिक्लेशः । तथा किम् अर्य आर्य वा न लपसि भणिते[2] प्रत्युत्तरं न ददासि । मा वा अर्य आर्य वा लप । तथा पते भर्तः नैषि मत्पार्श्वं नागच्छसि । मा वा पते एहि । स्वसमीहितं कुर्वित्यर्थः । इति पूर्वोक्तं कापि जलमध्ये बभाण भर्तुरग्रे उवाच ॥

---

१ BC हलिद्दि°. २ D भणितेपि.

निग्घिणया सढ-पिअर ओसर निग्घिणय मुञ्च धिट्ठ-पिअ ।
का वि जलन्तर-कड्ढिअ-कडिल्लयं इअ भणीअ पिअं ॥५२॥
कत्तार कया किमहं सुणसु वयंसे निरिक्खसु वयंसा ।
अम्मो अन्नाइ पिओ रमए कीए वि इअ रुन्नं ॥ ५३ ॥
सहि वर-वहु चयसु इमं गामणिमिव खलपुणो वहूइ इह ।
वारिणि इमाइ रमिरं इअ का वि सहीइ सिक्खविआ ॥५४॥

फलिहं । " ह्रस्वोऽमि " [३५] इति ह्रस्वः ॥

कट्ठ । " नामन्त्यात् सौ मः " [३७] इति " क्लीबे स्वरान्म् सेः " [३. २५] इति यो म उक्तः स न ॥

५२. हे निर्घृण निःकृप हे शठानां पितः अतिशयकूटकरणाद् मायाविनाम् आद्य त्वम् अपसर मद्दृष्टिगोचराद् गच्छ । तथा हे निर्घृण धृष्टानां व्यक्तापराधानां पितस्त्वं मुञ्च मा मद्वस्त्रादिकं स्राक्षीः । जलस्य अन्तरं मध्यं तस्मिन् कृष्टम् अपासितं कट्यम् अधस्तनवस्त्रं येन तं प्रियं कृतव्यलीकं दयितम् इति पूर्वोक्तं कापि बभाण निरभर्त्सयत् ॥

अज अजो । पइ पई । निग्घिणया निग्घिणय । " डो दीर्घो वा " [३८] इति डो दीर्घो वा ॥

पिअ । " ऋतोऽद् वा " [३९] इति अकारः अन्तादेशः । पक्षे पिअरं ।

५३. हे कर्तः स्रष्टः किमहं कृता । एवं प्रियापमाने सति मज्जन्मनो निरर्थकत्वात् किमहं सृष्टा । तथा हे वयस्ये सखि शृणु मद्वाक्यम् आकर्णय । तथा वयस्ये निरीक्षस्व । तथा हे अम्ब मातः अन्यस्याम् अपरकान्तायां प्रियो रमते इति अनया रीत्या कयापि रुदितम् ॥

पिअरं । "नाम्नथरं वा" [४०] इति अरं । पक्षे पिअ । नाम्नीति किम् । कत्तार ॥

वयंसे । " वाप ए " [४१] इति आप एत्वम् । पक्षे वयंसा ॥ बाहुलकात् क्वचिद् ओत्वमपि । अम्मो ॥

५४. सखि वरवधु प्रधानपत्नि इह ग्रीष्मे वारिणि जलमध्ये

---

१ B गामिणि°.

जामाउणो रमन्ते उअ वारिणि अपुरवं खु लडहत्तं ।
को अन्नो लडहो सम्भलीहिँ काहिं पि इअ भणिअं ॥ ५५ ॥
रे धुत्त-पिआ सि तुमं जग-पिअरा गोरि-संकरा सविमो ।
मा सवसु अप्प-पिअरं तं भत्तारो किमम्हाण ॥ ५६ ॥

अनया त्वत्सपत्न्या सह रन्तारं रमणशीलम् इमं पुरोवर्तिनं प्रियम् खलप्वः कर्षकस्य वध्वा ग्रामणीः भर्ता तमिव । अकृत्यकारितया हालिकम् इत्यर्थः । त्यज मा अङ्गीकार्षीः इति अनया रीत्या कापि सख्या शिक्षिता ॥

सहि । वर-वहु । " ईदूतोर्ह्रस्वः " [४२] ॥

गामेणि । खलपुणो । " क्विपः " [४३] इति ह्रस्वः ॥

५५. जामातरो दुहितृपतयः वारिणि रमन्ते अस्मत्पुत्रिकाभिः सह जलकेलिं कुर्वन्ति । उअ पश्य जामातॄन् । इति एकया उक्ते सति अपरा प्राह । खु आश्चर्यम् अपूर्वं लोकोत्तरम् । जातिविवक्षया एकवचनात् जामातुः । लडह इति देश्यो लटभशब्दः संस्कृतो वा सुन्दरार्थः । ततो लडहत्तं लटभत्वं वा सौन्दर्यम् । ततस्तदन्यापि आह । कोन्यः अपरो जामातुः सकाशात् लटभः प्रधानः । किं तु इत्थं यौवनमाननाद् एष एवेत्यर्थः । इति अनया रीत्या काभिरपि सम्भलीभिः तत्क्रीडावलोकनागततटस्थकुट्टिनीभिर्भणितं [२]जल्पितम् ॥

५६. त्रिभिर्विशेषकम् । अन्यस्याः सपत्न्याः । उक्षेस्तक्षादित्वात् [४. ३९५] छण्ठादेशः । उक्षणे जलेन आहनने कृते सति प्रकटेन अनेन मदीयापराधेन निश्चितम् इयं मानिनी बहु किमपि कुपिता भविष्यतीति प्रसादयितुं समागते प्रियतमे इति अनया रीत्या कयापि रुदितं साश्रुपातम् उक्तम् । तदेवाह । रे त्वं धूर्तानां पिता । शाठ्याचरणाद् मायाविनां मुख्य इत्यर्थः । असि वर्तसे । अत्रार्थे जगतः पितरौ गौरीशंकरौ । आत्मानं बहुमन्यमाना बहुवचनेन निर्दिशति । वयं तुभ्यं शपामहे तच्छपथं कुर्मः । ततोसौ तद्रक्षनाय मम त्वमेव प्रिया तस्यास्तु सेचनं मया एवमेव कृतम्

१ B गामिणि. २ CD add परस्परं before जल्पितम्.

भत्तारा जाण वसे धन्ना इत्थीण ताण माआओ ।
माआए किं जणिआ किं महिआ माअराउ मए ॥५७॥
देवा पिअरा सरणं संहर कत्तार भुअण-कत्ता मं ।
अन्नाइ छण्ठणे पिअयमम्मि कीए वि इअ रुण्णं ॥५८॥

इत्यर्थे पितृशपथं कुर्वाणस्तया ऊचे । त्वं मह्यं मा शपस्व आत्मपितरम् तच्छपथं मा कार्षीः । यतस्त्वं किम् अस्माकं भर्ता । किं तु तस्या एवेत्यर्थः ॥

५७. एवं भर्तारं निर्भर्त्स्य सनिर्वेदम् आक्रोशोक्तिमेवाह । भर्तारो यासां वशे आज्ञायां धन्याः कृतपुण्यास्तासां स्त्रीणां मातरो जनन्यः । न पुनस्त्वद्भर्तृकाया मम मातेत्यर्थः । तथा किं मात्रा अहं जनिता उत्पादिता । अयम् अभिसंधिः । यद्यहं तया नोत्पादिता स्यां तदा नैवं पराभवभाजनं स्याम् इति । तथा किं मातरः ।

ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा ।
कौमारी चर्ममुण्डा च कालसंकर्षणीति च ॥

इत्यष्टौ देवताविशेषाः । अथ वा ।

अमृताद्या ब्रह्माणी सिद्धिर्[1]माहेश्वरी च कौमारी ।
वैष्णव्यथ वाराही चामुण्डा मातरः सप्त ॥

इत्येवं सप्त वा मया महिताः पूजिताः । किल एतन्मातृपूजनं भर्तृवाल्लभ्याय कृतम् । तच्च नास्ति । तस्मात् तदपूजनमेव श्रेयः ।

५८. देवाः हरिहरब्रह्माणः पितरो मातृपित्राद्याः शरणम् । एवंविधदुःखदग्धाया मम त्राणं सन्तु । तथा कर्तः ! भुवनत्रयकर्तः जगत्त्रयनिर्माणकर्तः स्रष्टः मां संहर । येन नैवैतस्माद् आधिर्भवतीत्यर्थः ॥

जामाउणो । " ऋतामुद० " [४४] इति ऋदन्तानाम् उत् वा । बहुवचनस्य व्याप्त्यर्थत्वाद् यथादर्शनं नाम्न्यपि । पक्षे भत्तारा । अस्यमौस्विति किम् । पिआ । पिअरा । पिअरं ॥

भत्तारो । भत्तारा । " आरः स्यादौ " [४५] इति आरः ॥

---

१ BC सिद्धी मा°.

दे विन्नवेमि राया रायाणो देसु सव्वओ दिट्ठिं ।
उअ रायाणो के वीह के वि राया इह रमन्ते ॥ ५९ ॥
वाणारसीइ रण्णो कुरूण रायाउ अहिअमम्बु-छणो ।
रण्णो तिउरीए महुराए रायस्स य पयट्टो ॥ ६० ॥
हूणाण राइणा इह उअ रायाणो इमे पहु रमन्ते ।
अङ्गाणं रण्णा राइणो तह सगेण राएण ॥ ६१ ॥

माआओ । माआए । माअराउ । " आ अरा मातुः " [४६] इति बाहुलकात् जनन्यर्थस्य आ देवतार्थस्य तु अरा इत्यादेशौ ॥

पिअरा । " नाम्न्यरः " [४७] इत्यरः ॥

कत्ता । " आ सौ न वा " [४८] इति आः । पक्षे कत्तार ॥

५९–७७. एकोनविंशत्या महाकुलकम् । यस्मिन् काले जलेन पूर्णं शालभञ्जिकादिकर्णादिस्थानेभ्यः प्रपतन्नीरेण निभृतं यन्त्रगृहं धारा-गृहम् यस्मिन् काले [च] जलक्षणो वारिक्रीडा भूतः संवृत्तस्तस्मिन् काले नरेन्द्रस्य श्रीकुमारपालभूपालस्य दौवारिकेण इदं पूर्वोक्तं प्रति-पादितम् । तदेवाह ।

दे संबोधने । हे राजन् विज्ञपयामि । किं विज्ञपयसि । हे राजन् सर्वतो दृष्टिं देहि । समन्ताद् राजादीनां जलोक्षणम् ईक्षस्वेत्यर्थः । राजन्निति संबोधनपदं प्रतिक्रियम् अग्रेपि योज्यम् । ततस्तत्परं भूपं ज्ञात्वा आह । उअ पश्य राज्ञः । केपि राजानः इह अस्मिन् प्रदेशे रमन्ते । उअ पश्य राज्ञः । केपि राजान इह रमन्ते ॥

६०. वाराणस्याः काशे राज्ञः सकाशात् तथा कुरूणां राज्ञः सकाशाद् अधिकं गाढतरं यथा इति एवं त्रिपुर्याश्चेदिनगर्या राज्ञो मथुराया राज्ञश्च अम्बुक्षणः प्रवृत्तः ॥

६१. हे प्रभो उअ पश्य राज्ञः । हूणा देशविशेषाः । तेषां राज्ञा

---

१ D पूर्वोक्तं विज्ञपितं प्रति°.

परओ जदूण रण्णो परओ चेदीण राइणो तह य ।
राइम्मि अराअम्मि अ एगागारं जले कीला ॥ ६२ ॥
इह वारि-मज्जण-छणे राईणमराइणं च समभावो ।
रायं अराइणं तह कीलन्तं पिच्छ राईहिं ॥ ६३ ॥
राईहिन्तो राईसु जान्ति राईण मण-हरा विलया ।
इण्हिं रायाणेहिं उअ जल-कीला-पयट्टेहिं ॥ ६४ ॥
रण्णा अराइणा वि हु उच्छालिज्जन्ति नीर-लहरीओ ।
मगहाण राइणो कोसलाण रण्णो अ सविहम्मि ॥ ६५ ॥

सह इमे पुरोवर्तिनो राजानः इह अत्र प्रदेशे रमन्ते । तथा उअ पश्य राज्ञः । अङ्गानां राज्ञा शकेन राज्ञा च सह राजानो रमन्ते ॥

६२. यदूनां यादवानां राज्ञः परतः परत्र देशे तथा चेदयो देश-विशेषास्तेषां राज्ञः परतश्च राज्ञि अराज्ञि च तत्पत्न्यादौ एकाकारं प्रतिपत्तिभावाशङ्कारहितत्वेन निर्विशेषं जले क्रीडा अनयोरन्योन्यं नीरैरभ्युक्षणम् अस्ति । राज्ञ इत्यत्र परतस्तसन्तस्य योगे " प्रभृत्यन्यार्थ° " [हे° २. २. ७५] इति दिक्पञ्चमी । अतसन्तस्य तु योगे " रिरिष्टात् " [हे° २. २. ८२] इति षष्ठी ॥

६३. इह अत्र प्रदेशे वारिणा मज्जनं स्नानं तस्य क्षणः काल-स्तस्मिन् राज्ञाम् अराज्ञां च पौरजनानां समभावः मिथो जलाघातात् तुल्यत्वम् । तथा इह राजानम् अराजानं च राजभिः सह क्रीडन्तं पश्य ॥

६४. उअ पश्य इदानीं सांप्रतं जलक्रीडायां प्रवृत्तैर्व्यापृतै राजभिः सह राजभ्यः राज्ञः सकाशाद् राज्ञां मनोहरा मनोज्ञाश्चित्तावर्जिका वा वनिता वारविलासिन्यो राजसु यान्ति । राजसहिता एकान् राज्ञ उक्षित्वा अन्यान् उक्षितुम् उपगच्छन्तीत्यर्थः ॥

६५. मगधानां राज्ञः सकाशात् कोसलानां राज्ञः सविधे समीपे

को वि जुआ सजुआणो अप्पणिआ सह पिअं जले नेउं ।
रूसविअप्पाणेणं अतोससी अप्पणइआ वि ॥ ६६ ॥
सव्वे अन्ने वि निवा खिवन्ति धारा-हरम्मि सव्वस्सि ।
सव्वत्थ त्थी-लोए सव्वम्मि जलं तहन्नम्मि ॥ ६७ ॥
अन्नत्थ कुन्तला अन्नस्सि कुसुमाइँ अन्नहिं हारा ।
पिच्छ मयच्छि-जणे सव्वहिं पि रहसेण जल-रमिरे ॥ ६८ ॥
काहिं जाहिं ताहिं इत्थीए रमइ नेस राय-वडू ।
कीए जीए तीए वि विअड्ढाए निहिय-चित्तो ॥ ६९ ॥

कोसलानां राज्ञः सकाशाद् मगधानां राज्ञः सविधे राज्ञा अराज्ञापि खु निश्चितं नीरस्य लहर्यः कल्लोला उच्छाल्यन्ते ।

६६. प्रियाम् अभीष्टां गणिकाम् आत्मना सह जले नीत्वा आत्मना रोषयित्वा सकोपां कृत्वा सयुवा तरुणमित्रपरिवृतः कोपि युवा आत्मनैव अतूतुषत् वचनवैचित्र्येण आवर्जयत् । अपिः एवार्थे ॥

६७. सर्वस्मिन् समस्ते धारागृहे सर्वस्मिन् स्त्रीलोके तथा सर्वस्मिन् अन्यत्र मित्रादिषु सर्वे अन्येपि पूर्वोक्तेभ्योऽपरेपि नृपा जलं क्षिपन्ति उच्छालयन्ति ॥

६८. अन्यस्मिन् स्कन्धादिदेशे । विसंस्थुला इति भावः । कुन्तलाः केशपाशाः । अन्यस्मिन् कुसुमानि । अन्यस्मिन् हाराः । इति रभसेन औत्सुक्येन जले रन्तरि रमणशीले सर्वस्मिन्नपि मृगाक्षीजने पश्य । इति ज्ञेयम् ॥

६९. कस्यां यस्यां तस्यामेव विदग्धायामेव कटाक्षादिन्यासनिपुणस्त्रियां निहितचित्तः न्यस्तमनाः सन् कस्यां यस्यां तस्याम् । अविदग्धस्त्रियाम् इत्यर्थः । एष पुरोवर्ती राजबटुः न रमते । अपिः एवार्थे ॥

---

१ B °न्यासे.

एअस्सिं ठाणे जल-छणे इमस्सिं हवन्ति नक्खङ्का ।
सव्वेसिं अन्नेसिं जुआण जुअईण य पयासा ॥ ७० ॥
सव्वाणं अन्नाण वि जुआण जुअईण एत्थ हलवोलो ।
न हु कास तास रम्मो केसिं तेसिं न देइ दिहिं ॥ ७१ ॥
कास वि तास सरिच्छा किंनर-नारीइ किंनरस्स तहा ।
गायन्ति इत्थ रमिरा वारिणि तरुणीउं[1] तरुणा य ॥ ७२ ॥
कस्स वि तस्स जुआणस्स काइ ताए अ एत्थ जुअईए[2] ।
न हु दीसइ तणु-लट्ठी जा न सरोमञ्च-कञ्चुइआ ॥ ७३ ॥

७०. एतस्मिन् स्थाने यन्त्रगृहरूपे अस्मिन् जलोक्षणे सति सर्वेषां सर्वासां यूनां युवतीनां संबन्धिनो नखाङ्का नखक्षतानि अन्येषाम् अन्यासां यूनां युवतीनां च प्रकाशाः अङ्गरागापगमात् स्वपरप्रकटा भवन्ति ॥

७१. अत्र जलकेलिकाले सर्वेषाम् अन्येषां यूनां सर्वासाम् अन्यासां युवतीनामपि संबन्धी । हलवोलो देश्यः कोलाहलार्थः । ततः कोलाहलः हु निश्चितं केषां तेषां न रम्यः काम्यः । किं तु सर्वेषां श्रोत्रपुटैः[3] पेय इत्यर्थः । केषां तेषां यूनां कासां तासां युवतीनां न धृतिं ददाति किं तु सर्वेषां हृदयम् आह्लादयतीति भावः ॥

७२. तथा कस्या अपि तस्याः सर्वोत्कृष्टायाः किंनरनार्याः अमररमण्यास्तथा कस्यापि तस्य सर्वप्रसिद्धस्य किंनरस्य देवगायनस्य सदृक्षा रूपवेषनिनादादिना तुल्याः रन्त्र्यो रन्तारश्च क्रीडापरास्तरुण्यस्तरुणाश्च अत्र धारागृहे वारिणि गायन्ति गानं कुर्वन्ति ॥

७३. कस्यापि तस्य यूनः कस्यास्तस्याश्च युवत्यास्तनुयष्टिः अत्र यन्त्रगृहे हु निश्चितं यत्तदोर्नित्यसंबन्धात् सा न दृश्यते या न रोमाञ्चः पुलकः स एव तनुव्यापकत्वात् कञ्चुकः सह रोमाञ्चकञ्चुकेन

---

१ BC तरुणीइ. २ BC जुअईण. ३ BC खु.

पुं-सद्दो जास मणं जस्स य जल-केलि-काल-दुल्ललिओ ।
किस्सा तिस्सा जिस्सा सो जुवईए अणुसरेइ ॥ ७४ ॥
कीसे तीसे जीसे पणालिआए पलुट्टिअं नीरं ।
कीए जीए तीए वि बाहिरं तं न जुअईए ॥ ७५ ॥
काहे वि नाहि-लोए काला वि न वा अमच्च-लोगम्मि ।
कइआ वि न भू-लोए जल-जन्तं एरिसं आसि ॥ ७६ ॥

वर्तते सरोमाञ्चकञ्चुकिका । किं तु सर्वस्य शैत्यहर्षादिना अङ्गयष्टिः सपुलका अभूद् इति भावः ॥

७४. यस्य पुमशब्दः धर्मादिपुरुषार्थासाधनात् पुमान् इति नाममात्रम् यस्य च मनः चित्तम् । सचेतन इत्यर्थः । जलकेलेः कालस्तत्र दुर्ललितः भोगवाञ्छातत्परः स कां यां तां युवतिम् अनुसरति । पञ्चशरशराघातभीतः स्त्रीमात्रस्यापि पृष्ठानुयायी भवतीति भावः । " क्वचिद् द्वितीयादेः [३.१३४] इति द्वितीयायाः षष्ठी ॥

७५. कस्या यस्यास्तस्याः प्रणालिकायाः सकाशाद् यद् नीरं पर्यस्तं पतितं तत् कस्या यस्यास्तस्या अपि युवत्याः न बहिरभूत् किं तु सर्वस्यास्तद् अङ्गसङ्गम् आपेत्यर्थः ।" क्वचिद् द्वितीयादेः" [३.१३४] इति पञ्चम्याः षष्ठी । पूर्वार्धे यच्छब्दो ज्ञेयः ॥

७६. कस्मिन्नपि काले न अहिलोके नागसद्मनि । कस्मिन्नपि काले नैव अमर्त्यलोके त्रिदशालये । कस्मिन्नपि काले न भूलोके पृथ्वीपृष्ठे जलयन्त्रम् ईदृशम् आसीत् । अवलोकनपरविश्वलोकालक्षितसततविश्वतोमुखोच्छलितशुचिसुरभ्यमृतधाराधोरणीवहनाद् नैतत्समं बभूव ॥

राया । "राज्ञः"[४९]इति नलोपे अन्त्यस्य सौ आत्वं वा । पक्षे रायाणो ॥

जाला जलेण पुन्नं जन्त-हरं जल-छणो हुओ जाहे ।
दोवारिएण ताहे विन्नत्तमिमं नरिन्दस्स ॥ ७७ ॥

रायाणो । रण्णो । रण्णो । । "जश्शस्ङसिङसां णो " [५०] इति णो । पक्षे । राया । रायाउ । रायस्स ॥

राइणा । " टो णा " [५१] इति णा । पक्षे रण्णा । राएण ॥

राइणा । राइणो । राइणो । राइम्मि । "इर्जस्य णोणाङौ" [५२] इति जस्य इः । पक्षे रायाणो । राएण । रण्णो । अराअम्मि ।

अराइणं । अराइणं । " इणम् अमामा " [५३] इति जस्य अमाभ्यां सह इणम् । पक्षे राईणं । रायं ॥

राईहिं । राईहिन्तो । राईसु । राईण । "ईद्भिस्म्यसाम्सुपि" [५४] इति जस्य ई । पक्षे रायाणेहिं इत्यादि ॥

रण्णा । रण्णो । "आजस्य°"[५५] इति टाङसिङस्सु णा णो इत्यादेशापन्नेषु अण् । पक्षे अराइणा । राइणो । सणाणोषु इति व्यावृत्तेः रायाउ रायस्स राएण इति प्राग् [६०,६१] उक्तोदाहरणानि इह ज्ञेयानि ॥

सजुआणो । "पुंस्यन°"[५६]इति अन्नन्तस्य आणः । पक्षे यथादर्शनं "राज्ञः" [३.४९] इत्यादिभिः राजवत् कार्यम् । पक्षे जुआ ॥

अप्पणिआ । अप्पणइआ । "आत्मन°"[५७]इति टाया णिआ णइआ । पक्षे । अप्पाणेणं ॥

सव्वे अन्ने । " अतः सर्वादेः°" [५८] इति सर्वादेः अदन्ताज्जसः डित् ए । जस इति किम् । सव्वस्सिं ॥

सव्वत्थ । सव्वम्मि । अन्नम्मि । अन्नत्थ । अन्नस्सिं । "ङेःस्सिम्मित्थाः"[५९]॥

अन्नहिं । सव्वहिं । "न वानिद°"[६०]इति हिं वा । बाहुलकात् किंयत्तद्भ्यः स्त्रियामपि । काहिं । जाहिं । ताहिं । पक्षे सव्वस्सिं । सव्वत्थ । सव्वम्मि इत्यादि । स्त्रियां तु पक्षे कीए । जीए । तीए । इदमेतद्भ्यो जसि किम् । इमस्सिं । एअस्सिं ॥

सव्वेसिं । अन्नेसिं । "आमो डेसिं"।[६१]इति डेसिं । पक्षे सव्वाणं । अन्नाण । बाहुलकात् स्त्रियामपि । केसिं । तेसिं ॥

जइआ गिम्हो पयट्टओ तइअ च्चिअ किर आसि पाउसो।
जाए ताला जल-च्छणे पत्तो अच्छि-वहं खणे तहिं ॥ ७८ ॥

कास। तास। "किंतद्भ्यां डासः" [६२] इति डासः। पक्षे केसिं। तेसिं॥

कास। तास। जास। "किंयत्तद्भ्यो ङसः" [६३] इति डासः। पक्षे कस्स। तस्स। जस्स। बाहुलकात् किंतद्भ्याम् आकारान्ताभ्यामपि डासो वा। कास। तास। पक्षे काए। ताए॥

किस्सा। जिस्सा। तिस्सा। कीसे। जीसे। तीसे। "ईद्भ्यः स्सा से" [६४] इति स्सा से। पक्षे कीए। जीए। तीए॥

७८. तदा ग्रीष्मकाले तस्मिन् क्षणे ग्रीष्मप्रवृत्त्यनन्तरमेव जलक्षणे नानाजलयन्त्रादिधारासारादिभिर्जलोत्सवे जाते संपन्ने सति। किल इति संभाव्यते। यदा ग्रीष्मः प्रवृत्तस्तदैव प्रावृड् अक्षिपथं प्राप्ता समस्तजनप्रत्यक्षासीद् इति। अथ च यौगपद्येन ऋतुसंभवेन ग्रीष्मकाले प्रावृड् आसीद् इति भङ्ग्योक्तम्। उत्तरसर्गार्थसूचनमपि कृतम्। वैतालीयं छन्दः॥

काहे। काला। कइआ। जाला। जाहे। ताहे। जइआ। तइआ। ताला। "डेर्डाहे°" [६५] इति आहे आला इति डितौ इआ च। पक्षे तहिं इत्यादि॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रयमहाकाव्यवृत्तौ चतुर्थः सर्गः समाप्तः॥

पञ्चमः सर्गः ।

कम्हा जम्हा तम्हा वि वण-निउञ्जाउ तत्थ महमहिओ ।
काओ जाओ ताओ वि पक्खओ नीव-गन्धो तो ॥ १ ॥
गायन्ति किणो मोरा कीस पिगी गाइ जम्बु-फल-मत्ता ।
कम्हा वयं जिआमो तत्थ पउत्थेहिँ इअ लविअं ॥ २ ॥
इमिणा इमेण एएण एदिणा किण वि जेण तेण किर ।
सव्व-दिसाण मुहेणं महमहिओ मालई-गन्धो ॥ ३ ॥

१. अथ पञ्चचत्वारिंशता गाथाभिर्ग्रीष्मानन्तरभाविनीं प्रावृषं वर्णयति । ततो ग्रीष्मानन्तरं कस्माद् यस्मात् तस्मादपि । सर्वस्माद् इत्यर्थः । वननिकुञ्जात् कस्माद् यस्मात् तस्मादपि पक्षात् पार्श्वात् समीपदेशात् तत्र प्रावृषि नीपगन्धः धाराकदम्बसौरभ्यं प्रसृतः उच्छलितः ॥

कम्हा । जम्हा । तम्हा । "ङसेर्म्हा" [६६] । पक्षे काओ । जाओ । ताओ॥ तो । "तदो डोः" [६७] इति ङसेर्डो । पक्षे तम्हा ॥

२. कस्माद् मयूरा गायन्ति केकायन्ते । कस्मात् जम्बुफलैर्मत्ता पुष्टा सती पिकी कोकिला गायति मधुरं कूजति । अथ यदि एतयोः शब्दितम् उल्लसति तदा कस्माद् वयं जीवामः । एवं सति न प्राणितुं समय इति भावः । इति तत्र प्रावृषि प्रोषितैः पान्थैर्लपितं परस्परम् उक्तम् ॥

किणो । कीस । "किमो डिणोडीसौ" [६८] इति ङसेर्डिणोडीसौ । पक्षे कम्हा ॥

३. येन केनापि तेन लोकप्रसिद्धेन सर्वदिशां मुखेन । केन तेने-

वायं वाएण तिणा केणावि जिणा खु णेहि पहिएहि ।
परिमुक्को नीसासो भरिऊणं दइअ-रइ-केलिं ॥ ४ ॥
मालइ-लयाइ णाए णेण य पुव्वाणिलेण पहिआण ।
कत्तो वि को वि कत्थ वि अहूव-पुव्वो हुओ मोहो ॥५॥
अह विन्नत्तं आरामिएण पेच्छसु इमं वणोद्देसं ।
वल्लीहि इमाहि इमो बहल-दलाहिं मणो हरइ ॥ ६ ॥

त्याह । अनेनं प्राच्येन अनेनं अवाच्येन एतेन प्रतीच्येन एतेन उदीच्येन कृत्वा । किर इति किलार्थे । स च आप्तवादे । मालतीगन्धो जातिपरिमलः प्रसृतः ॥

४. तेन केनापि वातेन वातं परिभ्रान्तम् येन कृत्वा खु निश्चितं दयितारतिकेलिं प्रियासुरतक्रीडां स्मृत्वा विचिन्त्य तैः पथिकैः निःश्वासः परिमुक्तः । तथाविधपवनस्य उद्दीपनविभावत्वात् । बहिर्मुखाद् उष्णवातः परित्यक्तः ॥

इमिणा । इमेण । एएण । एदिणा । किण । जेण । तेण । तिणा । केण । जिणा ॥ "इदमेतत्किंयत्तद्भ्यष्टो डिणा" [६९] इति टाया डित् इणा वा ॥

५. तया मालतीलतया तेन च पूर्वानिलेन पथिकानां कस्मादपि कुतश्चित्कारणात् कुत्रापि उद्यानोद्देशे कोप्यनिर्वचनीयः अभूतपूर्वः असंजातचरो मोहः चित्तवैकुव्यम् अभूत् । अपिः संदेहे ॥

णेहि । णाए । णेण । "तदो ण°" [७०] इति स्यादौ णो लक्ष्यानुसारेण ।
कत्तो । को । कत्थ । "किमः कः°" [७९] इति स्यादौ त्रतसोश्च कः ॥

६. अथ प्रावृड्विजृम्भणानन्तरम् आरामिकेण उद्यानपालकेन विज्ञप्तं श्रीकुमारपालभूपालस्य पुरः प्राञ्जलि प्रतिपादितम् । किं तत् तदेवाह । इमं प्रत्यक्षवर्तिनं वनोद्देशं काननसमीपं पश्य प्रेक्षस्व वा सावधानं विलोकय । सामान्येन वनदर्शनविषयं विज्ञाप्य विशेषेण वर्षासंभवि-

१ BC इमेन. २ BC इमेन. ३ B अप्राच्येन; C अपाच्येन.

इमिआ पाउस-लच्छी कहइ अयं सिरिफलो वणे अस्सिं ।
समए इमस्सिमलि-किङ्किणी-रवं काम-छत्तं व ॥ ७ ॥
उअ अस्स जम्बु-तरुणो इमस्स दाडिमि-दुमस्स य फलाइं ।
एसु रमिज्जइ आहिं सुगीहि एहिं सुगेहिं च ॥ ८ ॥
इह उज्जाणे समए इमम्मि णं पिच्छ विहसियं नीवं ।
कुडयं च इमं णे अज्जुणे अ तापिच्छए अ इमे ॥ ९ ॥

वृक्षलतापत्रादिसंपदं वनगतां दर्शयन् विज्ञपयति । इमाभिः बहल-दलाभिः सान्द्रपत्रपङ्क्तिभिः वल्लीभिः व्रततिभिः कृत्वा अयं वनोद्देशो मनो हरति हृदयम् आवर्जयति ॥

इमं । इमाहि । इमो । " इदम इमः " [७२] ॥

७. अस्मिन् समये सांप्रतम् अस्मिन् वने अयं श्रीफलः बिल्वः अलयः सौरभ्यलोभलग्ना भृङ्गास्त एव तदाकारत्वात् किङ्किण्यः क्षुद्र-घण्टिकास्तेषां रवो यत्र तत् तथा एवंविधं कामच्छत्रमिव । तेन कन्द-र्पस्य सच्छायत्वात् । इति इयं प्रावृड्लक्ष्मीः[2] कथयति सामर्थ्यात्स्तन-यित्नुस्तनितैः प्रतिपादयति ॥

इमिआ । अयं । "पुंस्त्रियोः°"[७३] । इति न वा अयं इमिआ । पक्षे इमो ॥

८. अस्य जम्बुतरोः अस्य दाडिमीद्रुमस्य च फलानि उअ पश्य । तथा एषु फलेषु आभिः शुकीभिः कीरीभिः एभिः शुकैश्च रम्यते पर-स्परं क्रीड्यते ॥

अस्सिं । अस्स । " स्सिंसस्सयोरत्" [७४] । इमादेशोपि । इमस्सिं । इमस्स ॥ बाहुलकाद् अन्यत्रापि । एसु । आहिं । एहिं ॥

९. अस्मिन् समये सांप्रतम् अस्मिन्नुद्याने इमं नीपं धाराकदम्बम् इमं च कुटजं च वत्सकाख्यवृक्षविशेषं विकसितं पुष्पितम् इमान् अर्जु-नांश्च ककुभान् इमान् तापिच्छांश्च तमालान् । अर्थवशाद् वचनव्यत्ययः । इति विकसितान् पश्य ॥

---

१ B रिसि°; C रिस°. २ BC °लक्ष्मी.

लङ्गलि-वणेण णेणं फुल्लं जूही-वणेण य इमेण ।
कोहालि-वणेहिँ णेहिं इमेहिँ बिम्बी-वणेहिं च ॥ १० ॥
भू-भागमिणं तह नह-भागमिमं परिमलेण रुन्धन्तं ।
इदमिणमिणमो अ वणं कोआसइ केअईण उअ ॥ ११ ॥
उअ किं पि हु सुन्देरं पाउस-समयस्स से पयट्टस्स ।
सिं कुडयज्जुण-सज्जाण परिमलो इत्थ परिमिलिओ ॥१२॥

इह। "ङेर्मेन ह:"[७५]। इदमः कृतेमात् ङेः स्थाने मेन सह हः। पक्षे इमस्सिं।

इह । इमम्मि । " न त्थः " [७६] । इदमः ङेः त्थो न ॥

१०. एतेन लाङ्गलीनां शारदीलतानां वनेन अनेन यूथिकानां माधवीलतानां वनेन च एभिः कूष्माण्डीनाम् ओषधिविशेषाणां वनैः एभिर्बिम्बीनां रक्तफलानां वनैश्च फुल्लम् । एतानि लाङ्गल्यादिवनानि पुष्पितानीत्यर्थः ॥

णं । णे ॥ णेणं । [णेहिं]। "णोम्शस्टाभिसि"[७७]इति णः। पक्षे इमं । इमे । इमेण । इमेहिँ ॥

११. इमं भूभागं पृथ्वीपृष्ठप्रदेशं तथा इमं नभोभागम् आकाशदेशं परिमलेन सौरभ्येण रुन्धत् व्याप्नुवद् इदम् इदम् इदं च । समस्तमपीति भावः । केतकीनां वनं विकसति पुष्पति[1] उअ पश्य ॥

इणं । " अमेणं " [७८] । पक्षे इमं ॥

इदं । इणं । इणमो । " क्लीबे स्य° " [७९] इति सिअम्भ्यां सह इदं इणमो इणं च ॥

१२. प्रवृत्तस्य प्रसृतस्य । प्रौढिं प्राप्तस्येत्यर्थः । अस्य प्रावृट्समयस्य हु निश्चितम् आश्चर्यं वा किमपि लोकोत्तरं सौन्दर्यम् अस्ति

---

१ D पुष्यति.

से चन्दणस्स तह मयनाभीए सिं च अगरु-कलिआण ।
कप्पूर-पारियोण य अहिअयरो मालई-गन्धो ॥ १३ ॥
चिञ्चणिअ-तरूणेमाणेआण य कुसुम-दंसणे हरिसो ।
कह वि न माइ इमस्सेअस्स य आराम-लोअस्स ॥ १४ ॥
ताण ललिआण ठाणं तस्साणङ्गस्स लङ्गली-कुसुमं ।
एआओ एत्ताहे एत्तो अ न एत्थ को लेइ ॥ १५ ॥

उअ पश्य । तथा अत्र प्रावृषि एषां कुटजार्जुनसर्जानां वत्सककुभशालाख्यद्रुमाणां परिमलः परिमिलितः पिण्डीभूतः । तद्गन्धवैविक्त्यं न ज्ञायत इत्यर्थः ॥

किं । " किमः किं " [८०] ॥

१३. अस्माद् उपलभ्यमानात् तस्मात् पूर्वम् उपलब्धात् एतस्मात् आसन्नोपलभ्यमानाद् वा चन्दनात् । एषाम् अत्यासन्नोपलभ्यमानपत्तनादिनगराणां तेषां लोकदृष्टमलयादिदेशानां वा चन्दनात् । तथा अस्यास्तस्या एतस्या वा मृगनाभेः आसां तासां वा पुरां मृगनाभेः । आभ्यस्ताभ्य एताभ्यश्च अगुरुकलिकाभ्यः । एभ्यस्तेभ्य एतेभ्यश्च कर्पूरपारिजातेभ्यः । सामर्थ्यात् चन्दनादिगन्धेभ्य इत्यर्थः । मालत्या जातेर्गन्धः परिमलः अधिकतरः । प्रावृट्काले हि मालत्या अतिरुचिरप्रचुरतरसौरभ्यास्पदत्वात् ॥ से चन्दणस्स इत्यादिषु " क्वचिद् द्वितीयादेः " [३.१३४] इति पञ्चम्याः षष्ठी ॥

१४. एषाम् एतेषां च चिञ्चणिकातरूणाम् अम्लिकावृक्षाणां कुसुमदर्शने सति अस्य एतस्य आरामलोकस्य उद्यानजनस्य कथमपि केनापि प्रकारेण हर्षो न माति अतिवर्तते ॥

१५. तस्य अनङ्गस्य तेषां ललितानां विलसितानां स्थानं पदं

---

१ So BC. २ BD °पारयाण. ३ B wants °मानपत्त° up to °गन्धेभ्यः in line 16. ४ CD °मलयजादि°. ५ C अभिवर्तते.

एअम्मि वणोद्देसे ईअम्मि तहा अयम्मि ऊसलइ ।
इणमिणमो एस फुडं सालो जूही सिलिन्धं च ॥ १६ ॥
कुडेयं दलइ तमेअं एसा सा जूहिआ महमहेइ ।
एसो सो कन्दलिओ वेणु-कुडङ्गो वि पडिसाहं ॥ १७ ॥

लाङ्गलीकुसुमं शारदीलताप्रसूनम् एतस्मात् [एतस्मात्] एतस्माच्च । सर्वसमीपवर्तिदेशाद् इत्यर्थः । अत्र उद्याने को न लाति । परिमल-विकासिसौन्दर्याद्यावर्जितचेताः सर्वोपि एतद् गृह्णातीति भावः ॥

से। सिं। "वेदंतदेत°" [८१] इत्यादिना इदम्तद्एतदां स्थाने ङस्अम्भ्यां सह यथासंख्यं सेसिमौ। पक्षे इमाण। एआण। इमस्स। एअस्स। ताण। तस्स ॥

एत्ताहे। एत्तो। "वैतदो°"। [८२] इति एतदो ङसेः स्थाने त्तो त्ताहे। पक्षे एआओ ॥

एत्ताहे। एत्तो। एत्थ। "त्थे च तस्य लुक्" [८३] एतदः त्थे परे त्तो त्ताहे एतयोश्च परयोस्तस्य लुक् ॥

१६. एतस्मिन्नेतस्मिन् एतस्मिन् समीपवर्तिनि वनोद्देशे एष सालः अर्जुनः । एषा यूथी मागधीलता । एतत् सिलिन्ध्रं[2] च भूमिस्फोटः स्फुटम् उल्लसति पुष्पपत्रप्रवालादिभिर्वर्धते ॥

ईअम्मि। अयम्मि। "एरदी°" [८४] इति एतदः एकारस्य ङ्यादेशे म्मौ अत्-ईतौ। पक्षे एअम्मि ॥

१७. तद् एतत् पूर्वदृष्टम् अधुना अनुभूयमानं कुटजं दलति विकसति । एषा सा यूथिका महमहेइ ईति गन्धेन प्रसरति । सौरभ्येण सर्वं व्याप्नोतीत्यर्थः । एष स वेणुकुडङ्गोपि वंशगहनमपि प्रतिशाखं सर्वशाखासु कन्दलितः संजातनवाङ्कुरः ॥

---

१ B कुडलं. २ C शिलिन्ध्रं. ३ BCD महमहेइत्ति for महमहेइ इति.

अह लीला-पोक्खरिणी अह नीरं वड्डवास-मुक्कं च ।
अह पवण-वेवमाणो नवो अ कलमङ्कुरुक्केरो ॥ १८ ।
ताविच्छो बहल-दलो अमू अमू कमलिणी अ गय-कमला ।
मत्तममुं भेग-कुलं अमूसु लीला-तलाईसु ॥ १९ ॥
निचुलाण अयम्मि वणे इअम्मि तह सल्लई-निउञ्जम्मि ।
साल-वणम्मि अमुम्मि अ परिमल-बहलो वहइ पवणो ॥२०॥

इणं । इणमो । एस[1] । " वैसेण° " [८५] इति एतदः सिना सह एस इणं इणमो । पक्षे एअं । एसा । एसो ॥

एसा । सा । एसो । सो । "तदश्च तः सोऽक्लीबे" [८६] अक्लीबे । अक्लीब इति किम् । तं एअं ॥

१८. असौ लीलापुष्करिणी क्रीडावापिका । वड्डवास इति देश्यो मेघार्थे । वड्डवासमुक्कं मेघमुक्तम् अदो नीरं च । पवनेन वेपमानः कम्पमानः नवः अधुना उद्गतः असौ कलमाङ्कुरोत्करश्च सुरभिशालि-विशेषाङ्कुरपूरोस्ति ॥

१९. बहलदलः सान्द्रच्छदः असौ तापिच्छस्तमालः । तथा अमूषु लीलातडागिकासु क्रीडादीर्घिकासु गतानि प्रावृट्सद्भावाद् नष्टानि कमलानि यस्याः सा तथा असौ कमलिनी च पद्मिनी मत्तम् अदो भेककुलं दर्दुरवृन्दं चास्ति ॥

अह ३ । "वादसोद°" [८७] इति अदसो दस्य सौ हो वा । तस्मिंश्च कृते अतः सेर्डो" [३.२] "आत्" [हे० २.४] इत्याप् । क्लीबे स्वरान्मूसेः" [३.२५] इति मश्च न भवति । पक्षे उत्तरेण मुः आदेशः ॥

अमू । अमू । अमुं । अमूसु । "मुः स्यादौ" [८८] ॥

२०. निचुलानां वञ्जुलानाम् अमुष्मिन् वने तथा अमुष्मिन्

---

१ B एसा.

तं तुं तुवं तुह तुमं आणेह नवाइँ नीव-कुसुमाइँ ।
भे तुब्भे तुम्होय्हे[1] तुय्हे तुज्झ[2]ासणं देह ॥ २१ ॥

सल्लकीनिकुञ्जे गजप्रियागह्वरे अमुष्मिन् सालवने च परिमलबहलः सौरभनिचितः पवनो वहति वाति ॥

अयम्मि । इअम्मि । "म्मावयेऔ वा"[८९] । अदसः अन्त्यव्यञ्जनलुकि दकारान्तस्य स्थाने ङ्यादेशे म्मौ अय इअ । पक्षे अमुम्मि ॥

२१.–४५. अथ मालिनीपरस्परोक्तिप्रत्युक्तिनिवेदनेन उद्यानपालः श्रीकुमारपालभूपालं विज्ञपयति । पञ्चविंशत्या महाकुलकम् ॥

४५. पद्मावतीदेव्याः पूजने पूजानिमित्तं तिसृभिः द्वाभ्यां द्वाभ्यां गुणिते ते च ते द्वे च द्विगुणितद्वे ताभ्याम् । चतसृभिश्चेत्यर्थः । सखीभिः सह मालिन्यो मालायुक्ता अन्योन्यम् इति पूर्वोक्तं जल्पन्ति[3] कथयन्ति ॥

तदेवाह । २१ सखि त्वम् ५ । कोर्थः । सर्वा अपि यूयम् । नवानि नीपकुसुमानि आनयतेति । अत्र तंतुमादिभिः सह सखिशब्दस्य प्रत्येकं योगः । एवम् उत्तरत्रापि युष्मदादेशैः भे तुब्भे इत्यादिभिः अस्मदादेशैश्च अम्मि म्मीत्यादिभिश्च संबन्धः कार्यः । हे सख्यः यूयम् ६ आसनं पूजाविलोकनार्थागतोपवेशनार्थं विष्टरं दत्त वितरत ॥

---

१ B तुम्होम्हे. २ B तुब्भा°. तुब्भ would give us one more form तुज्झ (III. 104). It would be far-fetched to suppose that तुब्भ is the correct form but that तुज्झ is not to be formed under III. 104 since out of तुम्ह and तुज्झ that are formable from तुब्भ, तुम्ह is expressly given in III. 91 so as to indicate that तुज्झ is not to be formed. Neither in the Vrtti of the Sūtras nor in commentary on our text is there any indication of such a *Jnāpaka*. ज्झ and ब्भ closely resemble in the MSS. ३ BC कथयंति जल्पंति.

तुम्हे तुज्झे ण्हायह अहिणव-कल्हार-पत्तिआणयणे ।
तं तुं तुमं तुवं तुह तुमे तुए संपयं भणिमो ॥ २२ ॥
वो तुब्भे [1]तुज्झोय्हे तुम्हे तुज्झे अ भे अ तुय्हे अ ।
भणिमो न किमिह ण्हाएह पल्लले दद्दुर-भएण ॥ २३ ॥
भे ते दि दे तइ तए तुमाइ तुमए तुमे तुमं तुमइ ।
किं नाणिज्जइ दुव्वा पउमावइ-देवि-पूयत्थं ॥ २४ ॥
भे तुब्भेहिं अ तुज्झेहिं अ तह तुम्हेहिं तुलसिआ गिज्झा ।
[2]उज्झेहिं अ उम्हेहिं अ तुय्हेहिं तह य उय्हेहिं ॥ २५ ॥

२२. हे हला यूयं यूयं स्नात स्नानं कुरुत । हे वयस्याः त्वाम् ७ अभिनवा नूतना या कह्लारस्य वनस्पतिभेदस्य पत्रिका तस्या आनयने सांप्रतं वयं भणामः आदिशामः ॥

२३. हे आल्यः युष्मान् ८ भणामः यथा इह पल्वले अल्पसरसि दर्दुरभयेन किं यूयं न स्नात । भेकभीतिं त्यक्त्वा स्नानम् आधत्तेत्यर्थः॥

२४. हे सध्रीच्यः त्वया ११ पद्मावतीदेव्याः पूजार्थम् । किम् इति आक्षेपे । किं दूर्वा नानीयते । अपरव्यापारम् उत्सृज्य आनीयताम् इति भावः ॥

२५. हे सख्यः युष्माभिः ८ तुलसिका । सुरसाख्यः प्रसिद्धसुरभिवनस्पतिभेदः । ग्राह्या उच्चेया ॥

---

१ BC are both confused and wanting in this distich. B merely has वो तुब्भे तुब्भोम्हे तुज्झे य; C वो तुब्भे तुब्भोय्हे तुम्हे ब्भे अ ते अ तुय्हे य. Bm reads the Sūtra thus: वो तुब्भे उज्झे तुय्हे उय्हे भे शसा (III. 93)where P substitutes तुब्भ for उज्झे. Metre in our text makes उज्झे impossible, and तुब्भ would give two more forms besides the right one, *viz*, तुज्झ and तुम्ह. तुज्झ appears to be the correct reading and the Sūtra should therefore read वो तुज्झ तुब्भे तुय्हे उय्हे भे शसा. in Jain Mss. ज्झ and ब्भ are very similar. २ That उज्झे° is the correct form and not उब्भे° as given by P (III. 95) is plain from the fact that we should thereby have one more form उज्झेहि which the grammar would not recognise. See note २ on page 149 above.

तुब्भत्तो तुम्हत्तो तुज्झत्तो केअइं तुहत्तो वि ।
आणाएमि तुमत्तो तहा तुवत्तो तइत्तो अ ॥ २६ ॥

तुय्ह तहिन्तो तुब्भ य तुम्ह य तुज्झ य सवेण्ट-पिक्काइं ।
देवीइ ढोवणत्थं तोडामो दाडिमि-फलाइं ॥ २७ ॥

तुब्भत्तो तुय्हत्तो उय्हत्तो तह य तह य उम्हत्तो ।
तुम्हत्तो तुज्झत्तो मुत्था-धूवं करावेमि ॥ २८ ॥

तइ ते तुहं तुह तुमे तु तुम्ह तुव तुम तुमो तुमाइ इ ए ।
दे दि तहा विम्हरिअं किमिमं पल्लल-जले ण्हाणं ॥ २९ ॥

२६. हे हलाः त्वत् ७भवत्या भवत्याः पार्श्वात् केतकम् आनयामि॥

२७. हे वयस्याः त्वत् ५ भवत्या भवत्याः सकाशाद् देव्याः पद्मावत्या ढौकनार्थं बलिकरणार्थं सवृन्तानि च तानि पक्वानि च तानि तथा प्रसवबन्धनपरिपाकयुक्तानि दाडिमीफलानि वयं त्रोटयामः अवचयामः ॥

२८. हे आल्यः युष्मत् ६ भवतीनां भवतीनां सकाशाद् मुस्तानां गुन्द्राणां धूपं कारयामि ॥

२९. हे सखीत्यः तव १५ किमिदं पल्वलजले स्नानं विस्मृतम् । येन न कृतम् इति भावः ॥

---

१ B reads the first halves of the two stanzas 29 and 30 thus;

तइ ते तुहं तुमे तु तुम्ह तुव तुमो तुमाइ ई ए ।
दे हि * * *
तुब्भ (? उब्भ) य तम्हं तुब्भ य तुब्भ य उम्ह तह उंम्ह तह तुज्झ.

C तइ तं तुहं तुमे तु तुम्हं तुव तुम तुमो तुमइ ई ए ।
दे हि * * *
तुब्भ य तम्हि य तुब्भ य उब्भ य उज्ज तह उम्हु उम्हे ।

२ B यथा. ३ B तव ११.

उब्भ य तुम्हं तुब्भ य उम्ह य उग्ह तह उज्झ तह तुज्झ ।
पुप्फञ्जलि-दाण-कए नीवावचए किमालस्सं ॥ ३० ॥
भे तुब्भ तु वो तुब्भं तुब्भाण तुवाण तुम्ह तुम्हं च ।
तुम्हाण य पल्लवओ विम्हरिअं किं जलाणयणं ॥ ३१ ॥
तुज्झं[1] तुज्झ तुमाणं तुमाण उम्हाण[2] अवि अ उम्हाणं[3] ।
मत्त-जलवायसुड्डावणेण जल-कलुसणं किमिमं ॥ ३२ ॥
तुब्भाणं[4] तुज्झाणं तुहाण तुम्हाणमह तुवाणं च ।
तुज्झाण तुहाणमिमं मत्त-वलायासु किं रमणं ॥ ३३ ॥
तुमए तए तइ तुमे तुमाइ तुज्झम्मि तुम्मि तुब्भम्मि ।
तुम्हम्मि तुहम्मि तुवम्मि तुमम्मि भणाम जूहि-कए ॥३४॥

३०. हे सख्यः तव ७ पुष्पाञ्जलिदानकृते कुसुमाञ्जलिविधान-निमित्तं किं नीपानां धाराकदम्बकुसुमानाम् अवचये चुण्टने आल-स्यम् । न मन्दादरत्वं कर्तुं युक्तम् इति भावः ॥

३१. हे हलाः[5] युष्माकं १० पल्वलाज्जलानयनं किं विस्मृतम् ॥

३२. हे वयस्याः युष्माकं[6] ६ मत्तजलवायसोड्डायनेन पुष्टमड्डु-क्षेपणेन कृत्वा किमिदं जलकलुषणम् । तत्संमुखं लेष्टुक्षेपणादिना पानीयाविलीकरणं नोचितम् इति भावः ॥

३३. हे आल्यः युष्माकं ७ मत्तबलाकासु पुष्टसारिकासु किमिदं रमणम् । पूजाप्रस्तावे न क्रीडितुं युक्तम् इति भावः ॥

३४. हे सख्यः त्वां १२ यूथीकृते मागधीनिमित्तं भणामः आदिशामः । "द्वितीयातृतीययोः सप्तमी" [३.१३५] इत्यनेन द्वितीयायाः सप्तमी ॥

---

१ B तुब्भं; C doubtful between तुब्भं and तुज्झं. २ C तुम्हाण. ३ B अम्हाणं. ४ D omits 33,34 and 35. ५ BC हल्यः. ६ B युष्माकं ८.

तुसु तुज्झेसु तुहेसु अ तुवेसु तुम्हेसु तुवसु तुब्भेसु ।
तुमसु तुमेसु अ तुहसु अ भिसिणि-दलाहरणमादिसिमो॥३५॥
तुब्भासु तुब्भसु तहा तुम्हसु तुम्हासु तह य तुज्झासु ।
तुज्झसु अ आइसामो नव-जम्बु-फलोवहारम्मि ॥ ३६ ॥
अम्मि म्मि अम्हि अहयं हमहं मालूर-पल्लवे लेमि ।
अम्हम्हे अम्हो मो भे वयमवि लोद्ध-कुसुमाइं ॥ ३७ ॥
णे णं मि अम्मिं अम्ह य मम्ह अहं मं ममं मिमं भणह ।
अम्हे अम्हो णे अम्हामलय-फलेहि जइ कज्जं ॥ ३८ ॥
मे मि ममं ममए मइ ममाइ णे तह मए मयाइ तहा ।
अम्हाहि अम्ह अम्हे णे अम्हेहि अ जवा गेज्झा ॥ ३९ ॥

३५. हे सख्यः युष्मासु १० बिसिनीदलाहरणं पद्मिनीपत्रानयनम् आदिशामः ॥

३६. हे हलाः युष्मासु ६ नवजम्बुफलैः उपहारः पद्मावतीदेव्याः पूजनं तस्मिन् तन्निमित्तम् आदिशामः ॥

३७. हे वयस्याः अहं ६ मालूरपल्लवान् बिल्वकिसलयान् लामि गृह्णामि । हे सख्यः वयं ६ लोध्रकुसुमानि मार्जनप्रसूनानि । अर्थवशात् वचनव्यत्यय इति लामीत्येकवचनान्तमपि बहुवचनान्तम्[1] लामः ॥

३८. हे आल्यः मां १० तथा अस्मान् ४ भणत यदि आमलकफलैः कार्यम् । एतद् भवत्प्रयोजनं वयमेव निष्पादयाम इति भावः ।

३९. हे सख्रीच्यः मया ९ तथा अस्माभिः ५ यवा ग्राह्या उपादेयाः ॥

---

१ B अम्हि. २ D °नान्तमिति लामः.

मज्झत्तो वि महत्तो तहा मइत्तो तहा ममत्तो वि ।
अम्हत्तो तह गिण्हेह कुडय-तरुणो पसूणाइं ॥ ४० ॥
मे मइ मम मह मज्झं महं तहा मज्झ अम्ह अम्हं च ।
णे णो अम्हे अम्हो चम्पय-कलिआउ गिज्झाओ ॥ ४१ ॥
अम्हाणं मज्झाणं[1] ममाण ममाणं महाण य महाणं ।
अम्हाण य मज्झाणं[2] हत्थे धव-पसवं[3]-दामाइं ॥ ४२ ॥
मि मइ ममाइ मए वि अ अम्हम्मि ममम्मि मे तह महम्मि ।
मज्झम्मि अ थल-नलिणी-कुसुमाहरणे निउत्तव्वं ॥ ४३ ॥
अम्हेसु ममेसु तहा महेसु मज्झेसु तह य अम्हासु ।
आदिसह सल्लई-तरु-नव-कुसुमाहरण-कम्मम्मि ॥ ४४ ॥

४०. हे सख्यः मत् ४ मम मम सकाशात् । तथा अस्मत् अस्मत् अस्माकम् अस्माकं सकाशाच्च कुटजतरोः प्रसूनानि यूयं गृह्णीत अङ्गीकुरुत ॥

४१. हे हला मम ९ तथा अस्माकं ७ चम्पककलिका हेमपुष्पककोरका ग्राह्याः ॥

४२. हे वयस्याः अस्माकं ८ हस्ते धवप्रसवदामानि शाखिविशेषप्रसूनस्रजः सन्ति ॥

४३. हे आल्यः मयि ९ स्थलनलिनीकुसुमाहरणे स्थलपद्मिनीपद्मानयननिमित्तं नियोक्तव्यम् आदेष्टव्यम् ॥

४४. हे सख्यः अस्मासु ५ सल्लकीतरुनवकुसुमाहरणकर्मणि

---

१ BC मज्झाणं. २ B मज्झाण य for मज्झाणं. ३ BC °पसम°.

इअ पउमावइ-देवीइ पूअणे मालिणीउ जम्पन्ति ।
तीहिं दोहिं दुगुणिअ-वेहिं च सहीहि अन्नोन्नं ॥ ४५ ॥
सरय-समयम्मि एत्थ य मिहुण-सरूवेण पिच्छ विलसन्ति ।
देव दुवे सारसया दुण्णि सुगा वेण्णि हंसा य ॥ ४६ ॥

गजप्रियापादपप्रसूनानयनरूपव्यापारनिमित्तं यूयम् आदिशत भणत । अत्र च महाकुलके तथाचापिशब्दाः सखीं सखीं प्रति समुच्चयद्योतकत्वेन[1] नियोक्तव्याः ॥

तथा अत्रैव च "युष्मदस्तं तुं तुवं° "[९०]इत्यादि "सुपि" [११७] इत्यन्तसूत्राणां तं-तुं-तुवं-इत्यादि-अम्ह मम-मह-मज्झ-इत्यन्तानि उदाहरणानि युष्मदस्मदोः सर्वविभक्तिसंबन्धे स्पष्टान्येव । नवरं सुपि एत्वविकल्पम् इच्छन्त्येके । तन्मते तुवसु तुमसु इत्यादि । तुब्भस्य आत्वमपि इच्छत्यन्यः । तेन तुब्भासु । तुम्हासु । तुज्झासु । अम्हस्य आत्वमपीच्छत्यन्यः । तेन अम्हासु इति विशेषः ॥

तीहिं । "त्रेस्तिी तृतीयादौ" [११८] ॥

दोहिं । वेहिं । "द्वेर्दो वे" [११९] ॥

४६. प्रावृडनन्तरं शरत्संपदं दर्शयन् आरामिकः कुमारपालनृपं विज्ञपयति । हे देव महाराज अत्र च अस्मिन् पुनः शरत्समये द्वौ सारसश्च सारसी च सारसौ । "पुरुषः स्त्रिया" [है० ३.१] इति पुरुषशेषे । सारसौ लक्ष्मणौ । एवम् अग्रेपि । द्वौ शुकौ कीरौ द्वौ च हंसौ सितच्छदौ मिथुनस्वरूपेण स्त्रीपुंसयुग्मरूपेण पश्य विलसतः क्रीडां कुरुतः । द्वौ इति पश्येत्यपेक्षया द्वितीया । विलसत इत्यपेक्षया च प्रथमा । एवम् अग्रेपि पश्येत्यपेक्षया द्वितीया भ्राम्यतः उड्डयन्ते सन्तीति योगे प्रथमा ॥

---

१ B समुच्चयावद्याकत्वेन; C समुच्चयावंघातकत्वेन. २ C त्रेस्तीस्तृ°.

दो दो कुररा वे वे अ खञ्जणा नह-यले उअ भमन्ते ।
पण्णाइँ तिवण्णस्स य उअ तिण्णि वि जुण्ण-नीलाइं ॥४७॥
उअ चउरो चत्तारो चत्तारि इमे नहम्मि उड्डन्ते ।
दंसेइ सारसे इअ मुद्धा दुण्हं वयंसीणं ॥ ४८ ॥
दुण्ह नयणाण सुहदा उअ माला पङ्कयाण तासुं च ।
कमल-सही हंस-वहू अली-वहू पिच्छ रममाणा ॥ ४९ ॥

४७. द्वौ द्वौ कुररौ उत्क्रोशाख्यपक्षिविशेषौ द्वौ द्वौ च खञ्जनौ खञ्जरीटौ नभस्तले उअ पश्य भ्राम्यतः । त्रिपर्णस्य च पलाशस्य त्रीण्यपि पर्णानि जीर्णान्यपि पुरातनप्रायाण्यपि नीलानि । समयमाहात्म्यात् हरितानि । सश्रीकाणीति यावत् । उअ पश्य सन्ति ।

दुवे । दोण्णि । वेण्णि । दो । दो । वे । वे । "दुवे दोण्णि वेण्णि च जस्शसा" [१२०] ॥ दुण्णि । विण्णि इति पाठे तु "ह्रस्वः संयोगे" [१. ८४] इति ह्रस्वः ॥

तिण्णि । "त्रेस्तिण्णिः" [१२१] ॥

४८. मुग्धा अप्रगल्भा द्वयोर्वयस्ययोः सारसान् इति अनेन प्रकारेण दर्शयति । तमेवाह । चतुर इमान् सारसान् नभसि उअ पश्य । उड्डयन्ते विचरन्ति ॥

चउरो । चत्तारो । चत्तारि । "चतुरश्चत्तारो चउरो चत्तारि" [१२२] ॥

४९. द्वयोर्नयनयोः सुखदाः पङ्कजानां मालाः स्रजः उअ पश्य सन्ति । तासु च कमलसख्यः सहचारित्वाद् वयस्याः । हंसवध्रूः वरटा । अलिवधूः भ्रमरी । रममाणाः पश्य सन्ति ॥

दोण्हं । दोण्ह । "संख्याया आमो ण्ह ण्हं" [१२३] ॥

अखलिअ-परिमल-रिद्धिं पहिआ दट्ठूण छत्त-वण्ण-तरुं।
वच्चन्ति मोह-निद्दं मरण-सहिं भरिअ अप्प-वहुं ॥ ५० ॥
हाहाण समा हेट्ठे तरूण सालीण गोविआ गन्ती।
खे जन्तीणं मिलिआण सुर-वहूणं गइं खलइ ॥ ५१ ॥
अलि-मालाहि सणाहेहिं बाण-कुसुमेहि परिमल-गुरूहिं।
दिट्ठेहि वि मुच्छिज्जइ दुहिणीहिं पन्थिअ-वहूहिं ॥ ५२ ॥
सारस-मालाहिन्तो सुग-मालाओ अ चडय-मालाउ।
अखलिअ-गईउ धेणूउ रक्खिमो सालि-वणमेअं ॥ ५३ ॥

५०. अस्खलितपरिमलऋद्धिं निरर्गलसौगन्ध्यसमृद्धिं सप्तपर्णतरुम् अयुक्छदवृक्षं दृष्ट्वा पथिका आत्मवधूं स्वभार्यां स्मृत्वा मरणसखीम् अचैतन्यादितत्कार्यकारित्वाद् वयस्यां मोहनिद्रां तमोगुणमयीं मूर्छानिद्रां व्रजन्ति आसादयन्ति ॥

५१. तरूणाम् अधः अधस्तनभागे हाहा देवगायनस्तेन तेषां वा समा। निरुपमनिनादोपेतत्वात्। शालीनां गोपिका गायन्ती गानं कुर्वती खे यान्तीनां व्रजन्तीनां मिलितानां क्रीडार्थं समुदितानां सुरवधूनां गतिं स्खलयति निषेधयति। दिवि गच्छन्त्योप्सरसः अत्याश्चर्यं गोपीगीतं श्रुत्वा तत्रैव तिष्ठन्तीत्यर्थः ॥

५२. अलिमालाभिः सनाथैः युक्तैः परिमलगुरुभिः सौरभाढ्यैः दृष्टैरपि बाणकुसुमैः असनप्रसूनैर्हेतुभूतैः दुःखिनीभिः स्मरज्वराभितापात् सकष्टाभिः। पन्थेन चरन्ति पान्थिकाः। पथिवत् पन्थशब्दोप्यस्ति। तेषां वध्वस्ताभिर्मूर्छ्यते मुह्यते ॥

५३. सारसा लक्ष्मणास्तेषां मालास्तस्यास्ताभ्यो वा। शुकाः कीरास्तेषां मालास्तस्यास्ताभ्यो वा। चटकाः कलविङ्कास्तेषां मालास्तस्यास्ताभ्यो वा। अस्खलिता अप्रतिहता। अनिवार्येति यावत्।

---

१ BC सत्त°.

कुङ्कुम-कलिआसुन्तो सुरहिस्स मिउस्स एन्त-पवणस्स ।
पसरो गिरिम्मि इह तह तरुम्मि सव्वं पि सुरहेइ ॥ ५४ ॥
फुल्ला मुणी इह तरू न मुणीउ तरूउ दूरगा भमरा ।
वाइ मुणीण तरूणं नव-परिमल-मासलो वाऊ ॥ ५५ ॥
उद्दीविय-दढ-मयरद्धयग्गिणो वाउणो फुरन्ति रया ।
मुणि-मालत्तो पङ्कय-मालाहिन्तो पराय-कणा ॥ ५६ ॥

एवंभूता गतिर्यस्या यासां वा तस्यास्ताभ्यो वा धेनोर्धेनुभ्यश्च शालिवनम् एतद् वयं रक्षामः तन्निवारणेन पालयामः । अत्र आरामिकेण स्वनियोग एव विज्ञप्तः ॥

५४. कुङ्कुमकलिकाभ्यः केसरकोरकसकाशाद् आयंश्चासौ[1] पवनश्च तस्य अत एव सुरभेः मृदोः सुखस्पर्शस्य प्रसरः उज्जृम्भणम् इह शरदि गिरौ तथा तरौ सर्वमपि उपत्यकाधित्यकाप्रस्थादि मूलपत्रपुष्पादि सुरभयति स्वगन्धवासेन एकतानतां नयति ॥

५५. इह शरदि मुनयः अगस्तयस्तरवः फुल्लाः पुष्पिताः । अतो न मुनेस्तरोः सकाशाद् दूरगा विरलाः । किं तु मकरन्दलोभात् समीपस्था इत्यर्थः । भ्रमराः । तथा मुनीनां तरूणां नवपरिमलमांसलः नूतनसौरभसमृद्धो वायुर्वाति ॥

माला कमल-सही हंस-वहू इत्यादीनि मुणीउ तरूउ मुणीण तरूणं इत्यन्तानि चोदाहरणानि "शेषेऽदन्तवत्" [१२४] इत्येतद्वृत्त्यनुसारेण स्वयम् उपयुज्य परिभावनीयानि ॥

५६. उद्दीपितः वृद्धिं नीतः दृढो बलवान् मकरध्वज एव संतापकत्वाद् अग्निर्यैस्ते तथा वायवः स्फुरन्ति सर्वतः परिभ्रमन्ति तथा उद्दीपितमकरध्वजाग्नेर्वायोः वायुं प्राप्य । वायुयोगाद्[2] इति यावत् ।

---

१ D यन् वहन् स चासौ पवनश्च. २ B वायुवोगोदिति.

चारुम्मि एत्थ पल्लल-वारिम्मि विसट्ट-पोम्म-मालाओ ।
दोहिं चिअ नयणेहिं होइ न तित्ती नियन्ताणं ॥ ५७ ॥
मच्च-गणस्स सुराण य अलं खु कामो हवेइ इह सरए ।
कामाय पवट्टन्ते बाणं कामस्स य घडन्ते ॥ ५८ ॥

रयाद् वेगेन मुनिमालायाः अगस्तिपुष्पपरंपरायाः मुनिमालाभ्यो वा सकाशात् [तथा पङ्कजमालायाः पङ्कजमालाभ्यो वा सकाशात्] परागकणा एतद्रजोलवाः स्फुरन्ति इतस्तत उल्लसन्ति ॥

अग्गिणो । वाउणो । " न दीर्घो णो " [१२५] ॥

मालत्तो । मालाहिन्तो । "ङसेर्लुक्" [१२६]। भ्यसश्च हिः"[१२७]।न॥

५७. अत्र शरदि चारुणि पल्वलवारिणि । विसट्ट इति देश्यम् । विकसितानि यानि पद्मानि तेषां मालाः मालाभ्यो वा सकाशाद् द्वाभ्यामेव नयनाभ्यां पश्यतां वीक्षमाणानां न तृप्तिर्भवति । न तद्दर्शनवाञ्छा व्युपरमत इति भावः ॥ मालाओ इति पश्यताम् इति संबन्धविवक्षया द्वितीया । न भवतीति संबन्धविवक्षया तु पञ्चमी ।

चारुम्मि । वारिम्मि । " ङेर्ङे " [१२८] । न ॥

मालत्तो । मालाहिन्तो । मालाओ । " एत् " [१२९] । न ॥

दोहिं । नयणेहिं । " द्विवचनस्य बहुवचनम् " [१३०] ॥

५८. कामाय स्मरार्थं प्रवर्तमानायाम् कामाय बाणः असनः स एव विरहिमनोभेत्तृत्वाद् बाणः शरः तं घटमानायाम् उत्पादयन्त्याम् । " प्रावृट्शरत्तरणयः पुंसि " [१. ३१] इति प्राकृते पुंस्त्वम् । इह शरदि बाणाख्यपुष्पेण कृत्वा मर्त्यगणाय सुरेभ्यश्च विशिखं प्राप्तुं समर्थः कामो भवति ॥ शरदुपष्टम्भेन स्मरस्तान् स्ववशवर्तिनो विहितवान् इत्यर्थः ॥

---

१ D शरदि मर्त्यगणाय सुरेभ्यश्च खु निश्चितं अलं समर्थः.

मयणम्मि विरहिणीणं वहाइ रुट्ठम्मि को व न वहाय ।
जं ताण वहस्स हुअं फुल्लं सेहालिअ-वणं पि ॥ ५९ ॥
वन्दे भण्डीरस्स वि चिरस्स फुल्लम्मि जंम्मि अलि-ओली ।
नील-मणीण न इअरा वण-सिरि-पिट्ठीइ कबरि व्व ॥६०॥
एइ न पहिओ पासे इमस्स असणेसु भूसिअ-वणस्स ।
गन्ध-विसेहि व तेहिं बीहन्तो नस्सए दूरे ॥ ६१ ॥

मच्च-गणस्स । सुराण । " चतुर्थ्याः षष्ठी " [१३१] ॥

कामाय । कामस्स । " तादर्थ्यङेर्वा " [१३२] ॥

५९. विरहिणीनां प्रोषितभर्तृकाणां वधाय[1] विनाशाय कुपिते सति मदने । वा इवार्थे । स च संभावनायाम् । को वा क इव न वधाय न संभाव्यते । असौ यस्तासां वधाय न भवतीत्यर्थः । यत् तासां वधाय फुल्लं पुष्पितं शेफालिका निर्गुण्डी तस्या वनमपि भूतम् ॥

वहाइ । वहाय । वहस्स । " वधाङ्घाइश्च वा[2] " [१३३] इति तादर्थ्य-ङेर्डित् आइः षष्ठी च वा ॥

६०. भण्डीरमपि वृक्षविशेषमपि चिरेण वर्णनीयसौरभादिगुण-ग्रामस्य असंख्यत्वाद् बहुकालेन वन्दे वर्णयामि । यस्मिन् फुल्ले पुष्पिते सति नीलमणिभ्यो न इतरा । अतिसादृश्यात् ता इवैवेत्यर्थः । अल्याली भ्रमरश्रेणिः वनश्रियः पृ[4]ष्ठे कबरीव वेणिरिवास्ति ॥

भण्डीरस्स । चिरस्स । मणीण । पिट्ठीइ । " क्वचिद् द्वितीयादेः " [१३४] इति द्वितीयादीनां विभक्तीनां स्थाने षष्ठी ॥

६१. अस्य प्रत्यक्षवर्तिनः असनैः[3] बीजकैः कृत्वा भूषितं च तद् वनं च तस्य पार्श्वं न एति नायाति । किं तु गन्ध एव मारणाद्

---

१ C तंमि. २ D वधाय विनाशनिमित्तं रुष्टे कुपिते. ३ So BC. See P. ४ BD पृष्ठौ; C पुष्ठौ. ५ D न पथिक एति । किं तु.

इह कणय-पङ्कएहिं रत्तिं विज्जुज्जलेहि चउ-वीसं ।
अच्चिज्जन्ति जिणा तेण तेण कालेण सयराहं ॥ ६२ ॥
उज्जाण-मण्डवेसुं गरुआअइ लोहिआइ बिम्ब-फलं ।
गुरुआइ लोहिआअइ एव्वारु-फलं च कच्छेसु ॥ ६३ ॥

विषं येषां ते तथा विषवृक्षविशेषास्तेभ्य इव दूरं तेभ्योऽसनेभ्यो बिभ्यत् त्रस्यन् नश्यति ॥

पासे । असणेसु । " द्वितीयातृतीययोः सप्तमी " [१३५] ॥

विसेहि । तेहिं । दूरे । "पञ्चम्यास्तृतीया च [१३६] इति तृतीयासप्तम्यौ॥

६२. इह शरदि विद्युद्वद् उज्ज्वलैः कनकवर्णानि पङ्कजानि । "मयूरव्यंसकेत्यादयः"[हे० ३.१] इतिवर्णशब्दलोपात् । कनकपङ्कजानि तैः कृत्वा रात्रौ तस्मिन् तस्मिन् काले रात्रेरेव आद्यन्तरूपे । सयराहं इति देश्यं शीघ्रार्थे । चतुर्विंशतिर्जिना अर्च्यन्ते पूज्यन्ते ॥

रत्तिं । " सप्तम्या द्वितीया " [१३७] ॥

प्रथमार्थेपि द्वितीया दृश्यते । चउ-वीसं ॥ आर्षे तृतीयापि दृश्यते । तेण तेण कालेण ॥

६३. उद्यानमण्डपेषु बिम्बाख्यफलं गुरु इव आचरति । क्यङ् । गुरूयते । अगुरु गुरुं भवति गुरूयति । अलोहितं लोहितं च भवति " डाच् लोहितादिभ्यः षित् " [हे० ३.४] इति क्यङ् वा । गुरूयति । लोहितायति । तथा कच्छेषु जलप्रायेषु वाटेषु एर्वारुः कर्कटी तस्याः फलं च गुरूयते लोहितायते । एतद् एतच्च फलं समग्रस्वकारण-सामग्रीवशाद् महद् अरुणं च संपद्यत इति भावः ।

गरुआअइ । लोहिआइ । गरुआइ । लोहिआअइ । "क्यङोर्यलुक्"[१३८] ॥

---

१ BC दूरं पथिकः तेभ्यो. २ D उज्ज्वलैः दीप्तैः. ३ G कंचन for कनक°. ४ D °लोपे. ५ D देश्य युगपत् ६ B चउव्वीसं. ७ BC गुरुर्भ°. ८ BC गुरु°. ९ B क्यङोर्लुक्.

वेवइ हसइ अ कुमुअं पवेवए विहसए अ कासं च ।
देव जलम्मि थलम्मि अ इह पेक्खसि पेक्खसे इत्थ ॥६४॥
न हससि न वोवहससे जइ ता भासेमि किं पि वन्नेमि ।
अमुणा सरेण हंसाण माणसं तं पि विम्हरिअं ॥ ६५ ॥
बहु वन्निउं न सक्कं जाइं दीसन्ति सरय-चिन्धाइं ।
चरिआइँ विप्फुरन्ते इदो अ हेमन्त-सिसिराण ॥ ६६ ॥

६४. देव कुमारपाल भूपाल इह जले कुमुदम् । जातावेकवचनम् । कुमुदानीत्यर्थः । एवम् अन्यत्रापि । वेपते वायुवशाच्चलति । हसति । चन्द्रचन्द्रिकया विकसतीत्यर्थः । त्वं प्रेक्षसे । तथा देव अत्र स्थले कासं कासकुसुमं च प्रवेपते विहसति च त्वं प्रेक्षसे ॥

वेवइ हसइ । पवेवए विहसए । "त्यादीनाम्०" इति [१३९] इचेचौ ॥

६५. हे राजन् यदि त्वं न हससि जल्पाकोयम् इति न हास्यं करोपि । न वा उपहससि अहो अस्य वर्णनाचार्तुयम् इति न विप्लवयसि तदा भाषे भणामि किमपि किंचिच्च वर्णयामि श्लाघे । वर्णनमेवाह । अमुना परतो वर्तमानेन सरसा सहस्रलिङ्गाख्यसरोवरेण हंसानां तदपि सततस्वविलासास्पदत्वेन श्रेष्ठमपि मानसं देवसरो विस्मृतम् ॥

पेक्खसि पेक्खसे । हससि उवहससे । "द्वितीयस्य सि से" [१४०] ॥

६६. शरद्वर्णनम् उपसंहरन् हेमन्तशिशिरयोः सार्धैकविंशत्या गाथाभिर्वर्णनम् आह । यानि शरच्चिह्नानि घनात्ययलक्षणानि दृश्यन्ते वीक्ष्यन्ते तानि बहु प्रभूतं वर्णयितुं न शक्नोमि असंख्यत्वात् सामस्त्येन श्लाघयितुं न पारयामि । तथा इतश्च अस्मिन् उद्यानप्रदेशे पुनः हेमन्तशिशिरयोश्चरितानि तत्कालप्रभावप्रभविष्णुकलकण्ठस्वरहासकुन्दलतादिप्रसवपुष्पफलादिलक्षणविलसितानि विस्फुरन्ति[2] उज्जृम्भन्ते ।

---

१ D प्रेष्ठमपि. २ BCD स्फुरन्ति.

विच्छुहिरे कलयण्ठा सूसइरे ताण तारिसो कण्ठो ।
दीसन्ते कुन्द-लयाउ विप्फुरन्तीह रोलम्बा ॥ ६७ ॥
इह पेक्खह पेक्खित्था इहेह पासेह इहावि पासित्था ।
लवली-लयाउ फलिणी-लयाउ फड्ढा इवाफुल्ला ॥ ६८ ॥
नोवदिसामो नो संदिसामु न य आदिसामँ किं तु इमा ।
गायन्ति इह सयं चिअ मिलिआ कसणेच्छु-गोवीओ ॥६९॥

उभयोरपि लक्षणानाम् उभयत्रापि प्रायो दर्शनात् सममेव हेमन्त-शिशिरयोर्वर्णनम् ॥

भासेमि । वन्नेमि । " तृतीयस्य मिः " [१४१] ॥ बाहुलकाद् मिर्वैः स्थानीयस्य मेः इकारलोपश्च । सक्कं ॥

६७. तान्येवाह । कलकण्ठाः पुंस्कोकिला विक्षुभ्यन्ति मन्दायन्ते । तेषां कलकण्ठानां तादृशो मधुरध्वनिर्धुर्यः कण्ठो गलः शुष्यति परुषीभवति । कुन्दलतास्तु माध्यशाखाः पुनर्दृश्यन्ते सश्रीकतया सतर्षं जनैर्विलोक्यन्ते । इह आसु कुन्दलतासु रोलम्बाः भ्रमरा विस्फुरन्ति मकरन्दपानलोभाद् उपरि स्फुरन्ति ॥

दीसन्ति । विप्फुरन्ते । विच्छुहिरे । दीसन्ते । विप्फुरन्ति । " बहुध्वाद्यस्य न्ति न्ते इरे " [१४२] ॥ क्वचिद् इरे एकत्वेपि । सूसइरे ॥

६८. इह अस्मिन् प्रत्यक्षवर्तिनि प्रदेशे प्रेक्षध्वम् इह प्रेक्षध्वम् इह पश्यत इहापि यूयं पश्यत । लवलीलताः फलिनी श्यामा तस्या लताश्च स्पर्धादिवँ अन्योन्यस्य न्यक्चिकीर्षयेव उत्फुल्लाः कुसुमिताः ॥

पेक्खह । पेक्खित्था । पासेह । पासेत्था । "मध्यमस्येत्थाहचौ" [१४३] ॥

७०. नोपदिशामः उपचिकीर्षया भणामः । न च संदिशामः अन्य-

---

१ D पासेह. २ BC आदिसामु. ३ BC मिथः. ४ So BC. स्पर्धा इव would probably have explained the text more correctly. Or have we to read फड्ढाइ वाफुल्ला or फड्ढाइ वोप्फुल्ला (व=इव)? ५ D पासेह.

तुवरामो चणएसुं नव-सरिसव-कन्दलीसु तुवराम ।
तुवरामु मूलएसुं इअ कच्छ-त्थीण संरम्भो ॥ ७० ॥
हसए अ तुवरए तह लेइ अ पुंनामयाइँ एस जणो ।
कीस न हससि न तुवरसि न लेसि विलया इअ लवन्ति ॥७१

मुखेन कथयामः । न च आदिशामः नियोगं दद्मः तर्हि कथं गायन्ती-त्याह । किं तु अपि तु इह अनयोर्हेमन्तशिशिरकालयोः स्वयमेव कथित-मन्तरेणापि इमाः कृष्णाश्च ते इक्षवश्च कृष्णेक्षवस्तान् गोपायन्त इति "कर्मणोऽण्" [हे० ५.१] इत्यणि कृष्णेक्षुगोप्यः इक्षुवाटरक्षिकाः स्त्रियो मिलिता एकत्रोपविष्टा गायन्ति मधुरध्वनिगीतं कुर्वन्ति ॥

७०. चणकेषु[1] हरिमन्थकनिमित्तं[2] वयं त्वरामहे उद्यमं कुर्मः । नवसर्षपकन्दलीषु नूत्नसिद्धार्थककिशलयार्थं त्वरामहे । मूलकानि शाक-विशेषास्तन्निमित्तं च त्वरामहे । इति भणितरीत्या कच्छस्त्रीणाम् इक्षुचणकचिर्भटिकादिवाटकरक्षकाबलानां[3] संरम्भः उद्यमः ॥

उवदिसामो । संदिसामु । आदिसाम । तुवरामो । तुवराम । तुवरामु । " तृतीयस्य मोमुमाः " [१४४] ॥

७१. हे सखि एष जनः इक्षुगोपिकादिस्त्रीलोकः हसति हास्यं करोति त्वरते च उद्यच्छते । तथा पुंनागानि सुरपर्णिकापुष्पाणि लाति च गृह्णाति । अतस्त्वं किं न हससि न त्वरसे न लासि । अप्रीतिकं[4] मुक्त्वा एतत् कर्तुं तवापि युक्तम् इति भावः । इति एवं वनिता लपन्ति अन्योन्यम् आभाषन्ते ॥

हसए । तुवरए । एँस्थाने तु सेपाठे । हससे तुवरसे । " अत एवैच्से " [१४५] । अत इति किम् । लेइ । लेसि । एवकारः अत् एच् से एवेति विपरीतावधारणनिषेधार्थः । तेन अकारान्तादपि इच् सिश्च सिद्धौ । हससि । तुवरसि । इच उदाहरणं तु हसइ इति ज्ञेयम् ॥

---

१ BCD चनके°. २ BC °मंथनकनिमित्तं. ३C अप्रीतिकं. ४ D एः स्थाने.

तं सि तहा एस म्हि अ अम्हत्थि जुअम्ह सम-गुण म्हो अ।
गायामो इअ नव-लट्ठ-गोविआणं इदो वत्ता ॥ ७२ ॥
अत्थि अहं तुममेसा दरिसेइ न का वि कुसुम-विन्नाणं।
इअ भणिअ का वि कारइ मुचुकुन्दाओ कुसुम-हरणं ॥७३॥
अलि-गुञ्जिअं करावइ मालिणि-हल्लुप्फलं करावेइ।
जाणावइ रइ-लीलं मयणं भावेइ पारत्ती ॥ ७४ ॥

७२. हे सखि त्वम् असि तथा एषा अहम् अस्मि वयं च स्मः। तथा युताः स्नेहाद् एकत्र मिलिता वयं स्मः। समगुणाः तारुण्यतार-मधुरस्वरत्वादिना तुल्याश्च वयं स्मः। तथा वयं गायामः गीतं कुर्मः। इतः अस्मिन् हेमन्तशिशिरकाले नवलट्ठागोपिकानां नूत्नमहारजैत-रक्षकस्त्रीणाम् इति एवं वार्ता परस्परम् आलापाः ॥

तं सि। "सिनाऽस्तेः सिः" [१४६] ॥

७३. हे सखि अहम् अस्मि। त्वम् असि। एषास्ति। परं न कापि कुसुमविज्ञानम् अद्भुतमाल्यादिग्रथनकलां दर्शयति प्रकटयति। इति एवं भणित्वा उक्त्वा [कापि] मुचुकुन्दात् वृक्षविशेषात् कुसु-माहरणं पुष्पमाल्यादिरचनाचातुर्यख्यापनाय पुष्पावचयं कारयति सखीपार्श्वाद् विधापयाति ॥

म्हि। म्ह। म्हो। "मिमोमैर्म्हिम्होम्हा वा" [१४७]। पक्षे अम्हत्थि।

अत्थि। "अत्थिस्त्यादिना" [१४८] इति च अस्तेस्त्यादिभिः सह अत्थि।

७४. पारत्ती कुसुमविशेषः अलीनां गुञ्जितं कारयति मकरन्दपान-दानेन हर्षकारित्वाद् रुतं विधापयति। मालिनीनाम् औत्सुक्यम् अपरपुष्पेभ्यः सौरभादिना विशिष्टत्वेन त्वरां कारयति। रतिलीलां

---

१ B अम्हि°. २ D °रजन°. ३ D स्वस्य माल्या°.

तोसविअ-तरुण-गोवं तोसिअ-हरिणं इदो अ जव-गोवी ।
खे भामइ गीअ-झुणिं पउत्थ-सत्थं भमाडेइ ॥ ७५ ॥
कारिअ-अलि-कुल-रोला मरुवय-माला करावि[1]अच्छि-छणा ।
उअ कारीअइ जीए जयं करावीअइ अणङ्गो ॥ ७६ ॥
कुन्देहि करावि[1]ज्जइ तह कारिज्जइ नवेहि लवलेहि ।
जं ताण परिमल-वहो गन्धवहो मारइ पउत्थे ॥ ७७ ॥

सुरतक्रीडां ज्ञापयति बोधयति । कामिनः कारयतीत्यर्थः । यतो मदनं भावयति । कामिषु भवन्तं भावयति प्रवर्तयति ॥

दरिसेइ । कारइ । करावइ । करावेइ । " णेरदेदावावे " [१४९] इति णेः अत् एत् आव आवे । बाहुलकात् क्वचित् एत् न । जाणावइ । क्वचित् आवे न । भावेइ ॥

७५. इतश्च एतस्मिन् प्रदेशे तोषिततरुणगोपम् आवर्जितयुवबल्लवं माधुर्यातिशयात् तोषितहरिणं गीतध्वनिं गेयस्वरं यवगोपिका खे भ्रमयति अतितारत्वाद् अम्बरे उल्लासयति प्रोषितसार्थं भ्रमयति च उद्दीपनविभावत्वाद् मोहयति ॥

तोसविअ । तोसिअ । " गुर्वादेरविर्वा " ॥ [१५० ॥
भमाडेइ । भ्रमेराडो वा [१५१] । पक्षे भामइ ॥

७६. कारितः विधापितः अलिकुलस्य । रोल इति देश्यः । कोलाहलो यया सा तथा कारिताक्षिक्षणा हरितवर्णत्वात् जनितनेत्रानन्दा मरुबकमाला अस्ति उअ पश्य । सास्ति यया अनङ्गः कार्यते कामिभिः क्रियमाणः अनङ्गो यया प्रयुज्यते । तथा अनङ्गो जयं कार्यते जगत् स्ववशं कुर्वन् प्रयुज्यते ॥

७७. यत् तेषां कुन्दलवलपुष्पाणां परिमलवहः सौरभधारको गन्धवहो वायुः प्रोषितान् पान्थान् मारयति मारणाख्यां दशमीम्

---

१ BCD करावीअइ. २ BC कुंददललवल°.

कारेइ कं न हरिसं कारावेइ अ न कं रउच्छाहं ।
हासाविअ-जुव-गोवा जुव-गोवी कारिआणङ्गा ॥ ७८ ॥
जाणामि न हि न जाणमि नारङ्ग-फलाइँ वन्निउं देव ।
वण-सिरि-वहूएँ घट्टंसुआइँ सोहन्ति एआइं ॥ ७९ ॥

अवस्थां प्रापयति तत् कुन्दैः पुष्पजातिविशेषैः कार्यते विधाप्यते । तथा तत् नवैर्लवलैः लवलीकुसुमैः कार्यते । तत् कुन्दैलवलकर्तृकं विधापनम् इति भावः । यत्तदोर्नित्याभिसंबन्धात् तद् इति पूर्वार्धे ज्ञेयम् । यत्तदी क्रियाविशेषणे ॥

कारिअ । करावि अ । कारीअइ । करावीअइ । [करावि ज्जइ ।] कारिज्जइ । "लुगावी कृभावकर्मसु" [१५२] ॥

७८. हासिताः कुतुककृज्जल्पनेन स्मापिता युवगोपास्तरुणबल्लवा यथा सा तथा कारितः मनोहरतया जनितः अनङ्गो यया सा तथा युवगोपीं कं न हर्षं कारयति कं च न रतोत्साहं कारयति । अपि तु सर्वमपि द्रष्टृलोकं प्रमोदं च सुरतप्रयत्नं च कुर्वन्तं मनोभिप्रेतत्वात् प्रयुङ्क्ते इति भावः ॥

कारिज्जइ । मारइ । कारेइ । कारिआ । "अदेल्लुक्यादेरत आ" [१५३]। अदेल्लुकीति किम् । करावीअइ । आदेरिति किम् । कारिअ । इह अन्त्यस्य मा भूत् । आवेआभ्यादेशयोरपि आदेरत आत्वम् इच्छन्ति । कारावेइ । हासाविअ॥

७९. हे देव कुमारपाल भूपाल नारङ्गफलानि वर्णयितुं श्लाघितुं जानामि अवगच्छामि । न हि न पुनर्न जानामि । वर्णनमेवाह । वनस्य श्रीरेव रागजननाद् वधूस्तस्या एतानि समीपवर्तिनारङ्ग-फलानि । घट्टंसुआइं इति देश्यः । प्रान्तस्थूतपट्टांशुकषष्ठीनि कौसुम्भ-वस्त्राणीव शोभन्ते । उत्प्रेक्षाद्योतक इवशब्दो ज्ञेयः ॥

---

१ B कुंदललवलक°; C कुंददललवक°. २ C विधानं. ३ BC Omit आ. ४ BC कारा°.

पउमसिरि तं भणामो भणिमो तं लच्छि भणिमु तं गउरि ।
भणमु तमिले भणाम य तं गङ्गे तं भणामु कमलच्छि ॥८०॥
तं सिरि भणमो भणिम तमुमे जए तं च भणम कुन्द-वणं ।
उच्चिणह गहिअ-नामं लवन्ति विलया इअन्नोन्नं ॥ ८१ ॥
फलिणि-कुसुमं विहसिउं विहसेउं लोद्धेयं[1] पयट्टेइ ।
हसिऊणं विहसेऊण निअ इमं अणहसेअव्वं ॥ ८२ ॥

जाणामि । जाणमि । "मौ वा" [१५४] इति अत आ वा ॥

८०. युग्मम् । वनिताः परस्परप्रेमप्रतिबद्धा योषितो गृहीतिनाम[2] नामग्रहणपूर्वकम् इति एवम् अन्योन्यं मिथो लपन्ति जल्पन्ति । तदेवाह । हे पद्मश्रीस्त्वां भवन्तीं[3] भणामः आदिशामः । हे लक्ष्मि त्वां भणामः । हे गौरि त्वां भणामः । हे इले त्वां भणामः । हे गङ्गे त्वां भणामः । हे कमलाक्षि त्वां च भणामः ।

८१. तथा हे श्रीस्त्वां भणामः । हे उमे त्वां भणामः । हे जये त्वां च भणामः । किं तद् इत्याह । कुन्दवनम् उच्चिनुत । एतत्कुसुमानि गृह्णीतेति भावः । अत्र युग्मे आद्या आर्यागीतिः ॥

भणामो । भणिमो । भणिमु । भणाम । भणामु । भणिम । "इच्च मोमुमे वा" [१५५] इति अत इत्त्वं चाद् आत्वं वा । पक्षे भणमु । भणमो । भणम ॥

गहिअ । "क्त्वे" [१५६] ॥

८२. फलिनीकुसुमं प्रियङ्गुलतापुष्पं विहसितुं विकसितुं लोध्रं मार्जनाख्यद्रुप्रसूनं च विहसितुं प्रवर्तते । इदम् एतत् अहसनीयं श्लाघ्यम् । हसित्वा सकपोलविकासं स्मित्वा विहस्य च सशब्दहसनं कृत्वा हे सखि पश्य ॥

---

१ BC लोद्दयं. २ BC °नामा. ३ D भवतीं.

गन्धेण अहसिअव्वं विहसेहिइ इममिमं च विहसिहिइ।
विहसेइ इमं विहसइ इमं च वारुणि-वणे पुप्फं ॥ ८३ ॥
इह हसउ पहिअ-लोओ हसेउ उज्जाण-वालिआ-लोओ।
विहसन्त-हिओ विहसेन्त-लोअणो फलिअ-बोरीहि ॥८४॥
जयइ अणङ्गो कह पहु सुणाउ विहसेज्ज जइ न पुंनागो।
न य विहसेज्जा लवली होईअइ न वि अ कुन्देहि ॥ ८५ ॥

८३. गन्धेन अहसितव्यम् अनुपहसनीयम्। श्लाघ्यम् इति यावत्। इदम् एतत् प्रत्यक्षवर्ति विहसिष्यति विकचं भविष्यति। इदं च विहसिष्यति। तथा इदं विहसति। इदं च वारुणीवने पुष्पं विहसति ॥

विहसिउं। विहसेउं। हसिऊणं। विहसेऊण। अणहसेअव्वं। अहसिअव्वं। विहसेहिइ। विहसिहिइ। "एच्च क्त्वातुम्तव्यभविष्यत्सु" [१५७] इति एत्। चकाराद् इत्वं च ॥

८४. फलिताश्च ता बदर्यश्च ताभिर्हेतुभूताभिः विहसद्धृदयः तुष्यच्चेता विहसल्लोचनः विकसन्नयनः इह अस्मिन्नुद्यानप्रदेशे पथिकलोको हसतु स्मितपरो भवतु। वाटिकाऽविनाभूत उद्यानपालिकालोकश्च हसतु। यथा एताः संप्रत्युपभोगयोग्या एवं यूयमपि इत्यभिसंधिना उद्यानपालिकालोकमुद्दिश्य पथिकलोको हसतु। तदभिप्रायं च ज्ञात्वा उद्यानपालिकालोको हसतु। हसने प्राप्तावसर इति भावः ॥ हसउ इति "प्रैषानुज्ञावसरे कृत्यपञ्चम्यौ" [हे० ५४] इत्यनेन अवसरे पञ्चमी ॥

८५. प्रभुः कुमारपालस्वामी शृणोतु अवधारयतु। किम्। यदि पुंनागो न विहसेत् विकसेत् न च लवली विहसेत् नापि च कुन्दैर्भूयते

---

१ D पुंनामो. २ C संत्युप°. ३ D ° लोकश्च.

होइज्जइ फलिणी-कुसुमेहि लहिज्जेज्ज केहि नच्छि-मुहं ।
केहि न लहिज्ज हरिसो जह दीसइ वुच्चइ तहेअ ॥ ८६ ॥
इअ राया उज्जाणं तं कासी नयण-गोअरं सव्वं ।
काही सउहे गमणं संझा-कम्मं च काहीअ ॥ ८७ ॥

उत्पद्यते तदा कथम् अनङ्गो जयति सर्वोत्कर्षेण वर्तते । पुंनागपुष्पादिभिरेव पुष्पशरः सर्वं स्ववशम् आधत्त इति भावः ॥

विहसेइ । विहसइ । हसउ । हसेउ । विहसन्त । विहसेन्त । " वर्तमानपञ्चमीशतृषु वा " [१५८] इति एर्वा ॥ क्वचिन्न । जयइ ॥ क्वचिद् आत्वमपि । सुणाउ ।

विहसेज्ज । विहसेज्जा । " जाज्जे " [१५९] इति ए ॥

८६. भूयते उत्पद्यते फलिनीकुसुमैः । तथा तैः कृत्वा कैर्न अक्षिसुखं लभ्येत कैश्च न हर्षो लभ्येत । अपि तु सर्वैः फुल्लदक्षैः सहर्षैश्च भूयत इति यावत् । ननु न भविष्यत्येवम् इत्याह । यथा दृश्यते तथैव उच्यते । स्वानुभूतमेव भण्यत इति भावः ॥

होईअइ । होइज्जइ । लहिजेज्ज । " ईअ-इज्जौ क्यस्य " [१६०] ॥ बाहुलकात् क्वचित् क्योपि विभाषया । लहिज्ज ॥

दीसइ । वुच्चइ । " दृशिवचेर्डीसडुच्चम् " [१६१] इति क्यस्य डीसडुचौ ।

८७. अथ उद्यानवर्णनम् उपसंहर्तुम् आह । इति पूर्वोक्तरीत्या तत् शासनदेवताप्रसादप्रादुर्भूतसर्वर्तुकपुष्पादिसमृद्धिसंपन्नम् उद्यानं राजा श्रीकुमारपालदेवः सर्वम् अखिलं नयनगोचरं चकार । ददर्शेत्यर्थः । ततः सौधे गमनम् अकार्षीत् । तत्र च संध्याकर्म देवपूजादिकं च अकार्षीत् ॥

कासी । काहीं । काहीअ । " सी ही हीअ भूतार्थस्य " [१६२] इति भूतार्थविहिताद्यतन्यादेः सी ही हीअ ॥

---

१ D आरामिकोक्त°. २ D °पालभूपालः.

अह पढिअं सूएहिं हुवीअ संझा अहेसि अत्थमणं ।
अम्ह खणो आसि तमो हुज्जइ ससि-उग्गमो हुंज्ज ॥ ८८ ॥
होस्सामि दुही होहिमि दीणो होहामि असरणो इण्हिं ।
इअ चिन्तन्तो विरहं सहइ रहङ्गो रहङ्गीए ॥ ८९ ॥
वायव्व-ण्हाण-ण्हाया होस्सामो होहिमो अणज्झयणा ।
होहामो कय-गेड्डी-खेड्डा होस्साम विगय-भया ॥ ९० ॥

८८. अथ संध्याकर्मानन्तरं सूतैः मागधैः पठितं राज्ञः पुरः प्रतिपादितम् । किं तद् इत्याह । हे देव संध्या अभूत् अभवत् बभूव वा समपद्यत । अस्तमनं सूर्यस्य अस्ताचलेन तिरोधानम् अभूत् । अस्माकं क्षणः पठनाय अवसरः अभूत् । तथा तमः अन्धकारः अभूत् । शश्युद्गमः अभूत् । अधुना एतयोर्भवने प्राप्तः कालः ॥

हुवीअ । " व्यञ्जनाद् ईअः [१६३] ॥

अहेसि । आसि । " तेनास्तेरास्यहेसी " [१६४] ॥

हुज्जइ । हुज । " जात् सप्तम्या इर्वा " [१६५] इति सप्तम्यादेशात् जात् पर इर्वा ॥

८९. अथ सूता एव संध्यादिकालभाविचक्रादिचेष्टितं सप्तदशभिर्गाथाभी राज्ञे निवेदयन्ति । इदानीं सांप्रतम् अहं दुःखी सकष्टो भविष्यामि भविता वा । एवम् अग्रेपि यत्र भविष्यन्ती दर्शिता तत्र श्वस्तन्यपि ज्ञेया । दीनः करुणापात्रं भविष्यामि । अशरणो निर्नाथो भविष्यामि इति एवं चिन्तयन् पर्यालोचयन् रथाङ्गश्चक्रवाकः रथाङ्ग्या सह विरहं मिथो वियोगं सहते तितिक्षते ॥

होहिमि । " भविष्यति हिरादिः "[१६६] इति भविष्यदर्थविहिते प्रत्यये परे तस्यैव आदिर्हिः प्रयोक्तव्यः ॥

९०. त्रिभिर्विशेषकम् । गवां धेनूनां संमुखम् आत्मीयात्मीय-

१ BC हुज्जा.

होहाम मुक्क-मेरा होहिम गोवाल-गुज्जरी-गाया ।
होस्सामु मित्त-मिलिआ होहामु तहेअ कय-नट्टा ॥ ९१ ॥
होहिमु रमिरा भमिरा होहिस्सा निव्वुआ य होहित्था ।
इअ मुणि-वडुआ जम्पन्ति गावि-समुहं वणे जन्ता ॥ ९२ ॥

गव्यानयनार्थम् अभिमुखं वने यान्तो गच्छन्तः मुनिबटुकास्तापसकुमारका इति एवं कथयन्ति। किं तद् इत्याह । "वायव्यं तु गवीरजः" इति वचनाद् वायव्यस्नानं सुरभिखुरोत्खातपवनोल्लासितपांशुस्नानं तेन स्नाताः शुचयो भविष्यामः संपत्स्यामहे । अनध्ययनाः विकालत्वाद् पठनगुणनरहिता भविष्यामः । कुतः । गेडुीति देश्यः । शङ्कुलाख्या वक्राग्रा यष्टिः तया आरामः क्रीडा येषां ते तथा भविष्यामः । विगतभयाः पठनगुणनायोग्यकाले रमणाद् उपाध्यायविगोपनोत्थदरवर्जिता भविष्यामः ॥

९१. मुक्ता निर्जनत्वात् त्यक्ता मेरा मर्यादा यैस्ते तथा । निःशङ्का इत्यर्थः । भविष्यामः ॥ गोपालगूर्जरीं भैरवरागप्रियां भाषाविशेषं गायन्ति ते गोपालगूर्जरीगायका भविष्यामः । [1]"कचग० [१.१७७] इति कलुकि क्वचिद् एकपदेपि संधौ दीर्घत्वे गाथा इति रूपम् । मित्रमिलिताः क्रीडावसरत्वात् सखियुक्ता भविष्यामः । तथैवेति निपातसमुदायः समुच्चये । कृतनाट्याः रचितनर्तनाश्च भविष्यामः । मित्रैर्मिलित्वा नाट्यं करिष्याम इत्यर्थः ॥

९२. रन्तारः नानाक्रीडनकैः क्रीडनशीला भविष्यामः । भ्रमितारः इतस्ततः पर्यटनशीला भविष्यामः । एवं च निर्वृताश्च सुखिताश्च भविष्यामः ॥

होस्सामि । होहामि । होस्सामो । होहामो । होस्साम । होहाम । होस्सामु । होहामु । "मिमोमुमे स्सा हा न वा" । [१६७] पक्षे होहिमि । होहिमो । होहिम । होहिमु ॥

---

१ B omits from गोपाल...भविष्यामः.

होस्सं कय-नेवच्छा काहिमि कुरले णडालिअं काहं ।
दाहिमि वासं केसेसु दाहमलिआम्मि तिलयं च ॥ ९३ ॥
पिअ-संमुहं च गच्छं सोच्छं गीअं च हरिसओ रोच्छं ।
तारुन्न-फलं वेच्छं[1] देच्छं मोच्छं च संतावं ॥ ९४ ॥

होहिस्सा । होहित्था । "मोमुमानां हिस्सा हित्था" [१६८] । पक्षे होस्सामो । होहिमो । होहामो इत्यादि ॥

९३-९७. पञ्चभिः कुलकम् । वासकसज्जा नायिकाविशेषः । तद् उक्तम्

परिपाट्यां फलार्थे[2] वा नवे प्रसव एव वा ।
दुःखे चैव प्रमोदे च षडेते वासकाः स्मृताः ॥ १ ॥
उचिते वासके स्त्रीणामृतुकालेपि वा बुधैः ।
द्वेष्याणामथ वेष्टानां[3] कर्तव्यमुपसर्पणम् ॥ २ ॥

इति नयेन वासके रतिसंभोगलालसतया अङ्गरागादिना सज्जा वासकसज्जा इति चिन्तयन्ती परिभावयन्ती प्रियार्थं शय्या प्रियशय्या तां सज्जति प्रगुणीकरोति । चिन्तामेवाह । अहं कृतनेपथ्या विरचितवेषा भविष्यामि । कुरलान् केशविच्छित्तिविशेषान् करिष्यामि । ललाटिकां चन्दनादिभिर्ललाटमण्डनं करिष्यामि । केशेषु आर्द्रालकेषु वासं दन्दह्यमानकालागुरुकर्पूरादिसुरभिद्रव्यभावनां दास्यामि । अलिके ललाटे तिलकं च कस्तूर्या विशेषं[4] दास्यामि निवेशयिष्यामि ॥

९४. प्रिये संमुखं गृहं प्रविशति प्रियाभ्युपगमनदानाद्यर्थं तदभिमुखं च गमिष्यामि । गीतं च प्रियेण गीयमानं श्रोष्यामि आकर्णयिष्यामि । हर्षतो रोदिष्यामि[5] । प्रियप्राप्तेरानन्दाश्रुवर्षं विधास्यामी-

---

१ BC देच्छं. २ So BC; should we not read फलेर्थे ? ३ C चे°. ४ D विशेषकं. ५ B drops from here up to रोदिष्यामि in the commentary on the next couplet. ६ C लक्षण for °गमन°. ७ C रोदयि°.

छेच्छं भेच्छं नक्खेहि पिअं वोच्छं च तेण भोच्छं च ।
सोच्छिस्सं पिअयम-चाडुआइँ मोहं च गच्छिस्सं ॥ ९५ ॥
हसउ अ रमउ अ तुह सहि-अणो हसामु अ रमामु अ अहं पि ।
हससु अ रमसु अ तं पि हु इअ भणिही मह पिओ इण्हिं ॥९६
सहिमेवं च भणिस्सं तम्बोलं देहि देसु पुप्फं[1] च ।
इअ चिन्तन्ती वासय-सज्जा सज्जेइ पिअ-सेज्जं ॥ ९७ ॥

त्यर्थः । तारुण्यफलं वेदिष्यामि । प्रियपरिरम्भादि अनुभविष्यामि । द्रक्ष्यामि प्रियं सप्रेम वीक्षिष्ये । संतापं च मनःखेदं मोक्ष्यामि यौवन-माननात् त्यक्ष्यामि ॥

९५. नखैः करजैः कृत्वा प्रियं छेत्स्यामि भेत्स्यामि । पाटयिष्या-मीत्युभयार्थः । प्रियेण[2] सह वक्ष्यामि रहसि वदिष्यामि । तेन प्रियेण सह भोक्ष्ये च संभोगसुखं मानयिष्यामि । प्रियतमस्य वल्लभस्य चाटु-कानि प्रियवचनानि श्रोष्यामि । मोहं च रतिसातास्वादवशात् किं-कर्तव्यतामूढतां गमिष्यामि ॥

९६. तव सखीजनः हसतु च रमतां च । बहिर्गच्छत्वित्यर्थः । अह-मपि हसामि च रमे च । त्वमपि हस रमस्व च । आवां तु इतो विजने सहासं रमणं कुर्व इत्यर्थः । इति एवम् इदानीं मम प्रियो भणिष्यति विजन[3]करणार्थं विदग्धत्वाद् इत्थं प्रतिपादयिष्यति । अथ च प्रियोप्यागतो युष्मान् बहिः प्रेषयिष्यति तस्मात् स्वयमेव गच्छतेति वैदग्ध्येन सैव सखीवक्ति ॥

९७. ताम्बूलं पूगीफलनागवल्लीदलादिरूपं देहि मह्यं वितर । पुष्पं च । जातावेकवचनम् । कुसुमानि देहि । अहं च एवम् इति सखीं स्वपरिचारिकां[4] प्रति भणिष्यामि ॥

---

१ BC पुष्पं. २ D प्रियं वक्ष्यामि वक्षसि धरिष्यामि. ३ BCD om. वि°. ४ C अथ च प्रियेप्यागतो युष्माद्वाहि प्रेषयिष्यामि तस्मात्. ५ BCD प्रति for °परि°.

तं रमसु तं रमेज्जसु तुमं रमेज्जे रमिज्जहि तुमं पि ।
रम तं पि वयं रमिमो रमन्तु एआ रमह तुब्भे ॥ ९८ ॥
एआ हसन्तु तुम्हे हसह हसामो वयं पि नीसङ्कं ।
दइएण रमिज्ज इमा इमा रमेज्जा इमा रमइ ॥ ९९ ॥

होस्सं । " मेः स्सं " [१६९] इति स्सं वा ॥

काहं । दाहं । " कृदो हं " [१७०] । पक्षे काहिमि । दाहिमि ॥

गच्छं । सोच्छं । रोच्छं । वेच्छं । दच्छं । मोच्छं । छेच्छं । भेच्छं । वोच्छं । भोच्छं । " श्रुगमि० [१७१] इत्यादिना श्रुादीनां सोच्छमादयः ॥

सोच्छिस्सं । गच्छिस्सं । "सोच्छादयः°"[१७२] इत्यादिना श्रुादीनं स्थाने इजादिषु भविष्यदादेशेषु यथासंख्यं सोच्छादयः त एव आदेशा अन्त्यस्वराद्यवयव-वर्जा हिलुक् च वा ॥

हसउ । रमउ । हसामु । रमामु । हससु । रमसु । "दु सु मु विध्यादिष्वेकस्मिन्त्रयाणाम् " [१७३] । विध्याद्यर्थोत्पन्नानाम् एकत्वेर्थे वर्तमानानां त्रयाणामपि त्रिकाणां यथासंख्यं दु सु मु आदेशाः ॥

देहि । देसु । " सोर्हिर्वा " [१७४] इति पूर्वसूत्रविहितस्य सोर्हिर्वा ॥

९८–१०५. अष्टभिः कुलकम् । पांसुलानां स्वैरिणीनाम् इति एवं संप्रति आलापो मिथो भाषणम् । कोसावित्याह । हे सखि त्वं रमस्व । त्वं रमस्व । त्वं रमस्व । त्वमपि रमस्व । वयं रमामहै[1] । एता रमन्ताम् । यूयं रमध्वम् । सांप्रतं स्वेच्छया रमणे प्राप्तोऽवसर इत्यर्थः ॥

९९. हे हले एता हसन्तु । यूयं हसत । वयमपि निःशङ्कं स्वैरित्वान्निर्भयं हसामः । तथा दयितेन सह इयं रमते । इयं रमते । इयं रमते ॥

---

१ BC रमामहे. २ BC प्राप्तेऽवस°.

एसा रमिहिइ एसा रमिज्ज एसा वि संपइ रमेज्जा ।
एसा रमिज्ज एसा रमउ रमेज्जा य एसा वि ॥ १०० ॥
होज्जम्हाणं समओ होज्जा स-च्छन्द-गो जणो एस ।
ण हु होज्ज जइ पओसो ता एस जणो कहं होज्जा[1] ॥१०१॥
होज्जइ अङ्ग-त्थम्भो सेओ होज्जाइ होज्ज रोमञ्चो ।
होज्जा कम्पो होइ[2] अ वेवण्णं एण्हिमभिसरणे[3] ॥ १०२ ॥

१००. हे वयस्ये संप्रति इदानीम् एषा रमिष्यते स्वेच्छया क्रीडां करिष्यति । एषा रमिष्यते । एषापि रमिष्यते । तथा एषा रमताम् । [एषा रमताम् ।] एषापि रमतां च ॥

१०१. हे आलि अस्माकं समयः स्वेच्छया विचरणावसरः अभवत् । अभूत् बभूव । जज्ञे । अतः एष जनो मल्लक्षणः[5] स्वच्छन्दगः स्वेच्छाचारी भवति भवेत् भवतु भूयात् भविता भविष्यति । तथा हु निश्चितं यदि प्रदोषो रजनीमुखं नाभविष्यत् तर्हि[4] एष जनः अस्मल्लक्षणः कथम् अभविष्यत् । प्रदोषाभावे प्रियविरहवह्निना भस्मसात् समपत्स्यतेत्यर्थः ॥

१०२. हे सम्प्रीचि इदानीम् अभिसरणे प्रियसमीपगमने अङ्गस्तम्भः हर्षादिवशाद् यत्नेपि अङ्गक्रिया भवति संपद्यते । स्वेदः श्रमादिना रोमजलस्रावो भवति । रोमाञ्चः प्रियदर्शनादे रोमहर्षः । कम्पः मा मां कश्चिद् अभिसरन्तीं द्राक्षीद् इति भयादिना गात्रस्पन्दो भवति । वैवर्ण्यं सपत्न्यादिक्षेपादिना छायाविकारश्च भवति । इदानीम् अस्माकम् अभिसरणं कुर्वतीनाम् अङ्गस्तम्भादि वर्तत इत्यर्थः ॥

---

१ C होज्जो. २ BC एम्हि°. ३ C यथा. ४ BC तथा. ५ C मल्लक्षणः.

होज्जहिइ इट्ठ-गोट्ठी होज्जा पिअ-मेलओ दिही होज्ज ।
होहिइ परमाणन्दो होज्जाहिइ चित्त-वीसामो ॥ १०३ ॥
होज्ज किलकिंचिअं विव्वोओ होज्जाउ विब्भमो होउ ।
मोट्टाइअं च होज्जउ होज्जा ललिअं च अम्हाणं ॥ १०४ ॥
होज्ज न संझा होज्जा न निसा तिमिरं पि जइ न होमाणं ।
ता होन्ता कह अम्हे इअ संपइ पंसुलालावो ॥ १०५ ॥

१०३. हे सखि इष्टगोष्ठी प्रेमवैदग्ध्यगर्भपरस्परालापपूर्वं प्रियेण सह एकत्र अवस्थानं भविष्यति । प्रियेण सह मेलकः संबन्धः । अन्योन्याश्लेष इत्यर्थः । भविष्यति । धृतिः संतोषो भविष्यति । परमानन्दः हर्षातिरेको भविष्यति । चित्तविश्रामः विपक्षाभावाच्चेतोदार्ढ्यं च भविष्यति ॥

१०४. हञ्जे अस्माकं किलकिंचितं भवतु भवेद् वा संपद्यताम् । विव्वोको भवतु । विभ्रमो भवतु । मोट्टायितं भवतु । ललितं च भवतु । किलकिंचितादिलक्षणानि च अमूनि । स्मितहसितरुदितभयरोषदुःखगर्वश्रमाभिलाषसंकरः किलकिंचितम् । इष्टेप्यवज्ञा विव्वोकः । वागङ्गभूषणानां व्यत्यासो विभ्रमः । प्रियकथादौ तद्भावभावनोत्था चेष्टा मोट्टायितम् । मसृणोङ्गन्यासो ललितम् ॥

१०५. हे सखि संध्या यदि नाभविष्यत् निशा यदि नाभविष्यत् तिमिरमपि यदि नाभविष्यत् तदा कथं वयमभविष्याम । अभीष्टमेलकः संध्यादिसद्भाव एवास्माकं जीवितप्रदः संपन्न इति भावः ॥

रमेज्जसु । रमेजे । रमिज्जहि । रम । "अत इज्जस्विज्जहीजे-लुको वा"[१७५]। पक्षे रमसु ॥

---

१ BCD किलि°. २ C दृष्टे°.

विहसन्त-पहा-हसन्तओ अह उइओ चन्दो कुणन्तओ।
उवहसमाणिं सरोरुहं विहसन्ति हसइं व कुमुइणिं ॥१०६॥

रमिमो। रमन्तु। रमह। हसन्तु। हसह। हसामो। "बहुषु न्तु ह मो" [१७६]॥

रमिज ३। रमेजा ३। "वर्तमाना-भविष्यन्त्योश्च ज जा वा" [१७७] पक्षे रमह। रमिहिह। रमउ॥ अन्ये त्वन्यासामपीच्छन्ति। होज। होजा॥

होजइ। होजाइ। होज। होजा। होजाहिइ। होजा। होज। होजाहिइ। होज। होजाउ। होजउ। होजा। "मध्ये च स्वरान्ताद् वा" [१७८] इति स्वरान्ताद्धातोः प्रकृतिप्रत्यययोर्मध्ये चकाराद् वर्तमानामविष्यन्तीविध्यादिप्रत्ययानां च ज जा वा। पक्षे होइ। होहिइ। होउ॥

होज। होजा। "क्रियातिपत्तेः" [१७९]॥

होमाणं। होन्ता। "न्त-माणौ" [१८०] इति क्रियातिपत्तेः न्तमाणौ॥

१०६. अथ तिमिरविलसनानन्तरं सरोरुहं कमलम् उपहसन्तीम्। सश्रीकत्वात् तद् विप्लवयन्तीम् इत्यर्थः। विहसन्तीं विकासम् आसादयन्तीं हसन्तीमिव विकसद्विशददलत्वात् स्मयमानामिव कुमुदिनीं कैरविणीं कुर्वन्। विहसन्ती चासौ प्रभा च तया समुच्छलच्चन्द्रिकया कृत्वा हसन्निव हसन् हास्यं कुर्वाणश्चन्द्र उदितः उदयाचलचूलावलम्बिबिम्बः संवृत्तः। अनेन उत्तरसर्गार्थसूचनम्॥ मागधी छन्दः। तल्लक्षणं चेदम्। ओजे चौ युजि षचौ लदलदन्तौ मागधी॥ विषमे चौ चतुर्मात्रौ द्वौ गणौ लदलदन्तौ। समे षचौ षण्मात्रचतुर्मात्रौ च लदलदन्तौ मागधी॥

विहसन्त। हसन्तओ। कुणन्तओ। "शत्रानशः" [१८१] इति प्रत्येकं न्तमाणौ॥

---

१ D विकसन्तीं. २ BC शत्रानसः.

उवहसमाणिं। विहसन्तिं। हसइं। "ई च स्त्रियाम्" [१८२]इति ईं। चकारात् न्तमाणौ ॥

इत्याचार्यश्रीहेमचन्द्रप्राकृतद्याश्रये अष्टमास्याध्यायस्य उदाहरणप्रतिपादनद्वारेण तृतीयः पादः संपूर्णः ॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्याश्रयमहाकाव्यवृत्तौ पञ्चमः सर्गः समाप्तः ॥

षष्ठः सर्गः ।

वज्जर थक्को सि कहिं पज्जर कत्तो अ एण्हिमाओ सि ।
जम्पसु विम्हरिआ हं सीससु अणुसासणिज्जो सि ॥ १ ॥
साहसु कीए रत्तो बोल्लसु अन्ना वि किं पिआ तुज्झं ।
सङ्घसु किमहं मुक्का चवसु मए किं कयं विलिअं ॥ २ ॥
पिसुणसु किं जुत्तमिणं उप्पालसु किं चिराउ दिट्ठो सि ।
इअ भमर-गुञ्जिएहिं ससिणं पुच्छीअ कइरविणी ॥ ३ ॥

१. अथैकविंशत्या गाथाभिश्चन्द्रोदयं वर्णयति । त्रिभिर्विशेषकम् । भ्रमराणां गुञ्जितानि झंकाररवास्तैः कृत्वा शशिनम् इति एवम् कैरविणी अपृच्छत् । अत्र उत्प्रेक्षार्थ इवशब्दो ज्ञेयः । ततश्चावार्तय-दिव । पृच्छामेवाह । हे प्रिय कथय प्रतिपादय कस्मिन् कुत्र प्रदेशे असि त्वं स्थितः उषितः । कथय कस्माच्च कुतः प्रदेशाद् इदानीम् आगतोसि । कथय विस्मृता एतावन्तं कालं स्मृतिपथं न गताहम् । येन चिरम् अन्यत्रावस्थितोसीति भावः । एतत् सर्वं कथय । येन अनुशासनीयः इयच्चिरम् अन्यत्रावस्थानेन शिक्षणीयोसि ॥

२. कथय कस्यां कान्तायां रक्तः सानुरागः । किं क्षेपे । कथय किम् अन्यापि मद्व्यतिरिक्तापि तव प्रिया वल्लभा । कथय किम् अहं मुक्ता परित्यक्ता । कथय किं मया व्यलीकम् अपराधः कृतम् ॥

३. कथय किमिदं भवदनुष्ठितं युक्तम् । कथय किं चिरात् प्रभूत-कालाद् दृष्टो वीक्षितोसि ॥

---

१ C तुम्भ. २ C यतः.

णिव्वरही चक्क-वहू दूरत्थ-पिए जुगुच्छिअत्ताणा।
झुणिअ-रवेहिं अदुगुच्छिअं पि भिसिणिं दुगुञ्छन्ती ॥४॥
न बुहुक्खिओ वि चक्को निय-छाहिं निअंवि णीरवीअ बिसं।
निअ-पक्ख-वीजणेहिं वोजन्तो घरणि-सङ्काए ॥ ५ ॥

" इदितो वा " [१] इत्यधिकारसूत्रेण अग्रेतनसूत्रेषु ये इदितो धातवस्तेषां वक्ष्यमाणा आदेशा वा भवन्ति इति एतदुदाहरणानि तत्तत्सूत्रसंबन्धीन्येव ॥

वज्जरपज्जरेत्यादय आदेशाः " कथेर्वज्जर° " [२] इत्यादिसूत्रेण भवन्ति ॥

४. जुगुप्सितः प्रियविप्रयोगेपि अवस्थानाद् निन्दितः आत्मा यया सा। तथा जुगुप्सिताः दैन्यसूचनाद् अप्रशस्यास्ते च [१]ते रवाश्च तैः कृत्वा अजुगुप्सितामपि स्वस्य लीलागृहत्वेन अनिन्द्यामपि बिसिनीं पद्मिनीं जुगुप्समाना विकत्थमाना चक्रवधूश्चक्रवाकवल्लभा दूरस्थः अनिकटवर्ती स चासौ प्रियश्च रथाङ्गस्तस्मिन् दुःखं कथयामास ॥

णिव्वरही। " दुःखे णिव्वरः " [३] दुःखविषयस्य कथेर्णिव्वरो वा ॥

झुणिअ। अदुगुच्छिअं। दुगुञ्छन्ती। जुगुप्सेर्झुंण-दुगुच्छ-दुगुञ्छाः [४]। पक्षे जुगुच्छिअ ॥

५. निजच्छायां दृष्ट्वा निजच्छायामेव गृहिणीशङ्कया प्रियाभ्रमेण निजपक्षावेव व्यजने संतापापहरणात् तालवृन्ते ताभ्यां कृत्वा वीजयन् सन् बुभुक्षितोपि बुभुक्षाक्रान्तोपि चक्रः कोकः न बिसं मृणालम् अबुभुक्षत प्रियासंगमसुखनिमग्नतया न भोक्तुम् ऐच्छत्। न कवलीचकारेति भावः ॥

[२]बुहुक्खिओ। णीरवीअ ॥ वीजणेहिं। वोजन्तो। " बुभुक्षि-वीज्योर्णीरववोजौ " [५] ॥

---

१ B नियवि. २ B om. ते रवाश्च. ३ B वहु; C बहु°.

गायन्ता सज्झायं झायन्ता धम्म-झाणमकलङ्कं ।
जाणन्ता मुणिअव्वं मुणिणो आवस्सए लग्गा ॥ ६ ॥
दिण-ताव-उद्धुमाओ सद्दहिउं दाह-पसमिणिं[1] जुण्हं ।
को अमय-पिज्जणिज्जं अच्छीहि न घोट्टिउं लग्गो ॥ ७ ॥
पट्टीअ चन्दिम-रसं चन्दिम-रस-डम्भिरं चओर-कुलं ।
पिअइ म्ह अलि-कुलमणोरुम्मिअ-सेहालिअ-परायं ॥ ८ ॥

६. स्वाध्यायं गायन्तः मधुरध्वनिना पूर्वपठितस्वाध्यायपरावर्तनं कुर्वन्तः । अकलङ्कम् आर्तरौद्रपरिणामपरिहारान्निर्दोषं धर्मध्यानं शुभाध्यवसायविशेषं ध्यायन्तः अभ्यस्यन्तः । ज्ञातव्यं जीवाजीवादितत्त्वनवकं बोद्धव्यं जानन्तः अर्हत्प्रणीतप्रकारेण अवगच्छन्तः आवश्यकम् अवश्यकृत्यं सामायिकादिधर्मानुष्ठानं तस्मिन् मुनयः साधवो लग्नाः व्यापृताः ॥

गायन्ता । झायन्ता । " ध्या-गोर्झा-गौ " [६] ॥
जाणन्ता । मुणिअव्वं । " ज्ञो जाण-मुणौ " [७] ॥

७. दाहप्रशमिनीं[2] वपुःसंतापनिर्वापजननीम् अमृतवत् पानीयां पातव्यां ज्योत्स्नां श्रद्धाय निश्चित्य । तापः देदीप्यमानमार्तण्डमण्डलोष्मा । तेन उद्ध्मातः संतापितः सन् कः अक्षिभ्यां कृत्वा न पातुं लग्नः अपि तु सर्वोपि संतापिताङ्गः[3] सन् चन्द्रिकां सतर्षम् ईक्षितुं प्रवृत्त इति भावः ॥

उद्धुमाओ[4] । " उदो ध्मो धुमा [८] ॥
सद्दहिउं । " श्रंदो धो दहः ॥ [९] ॥

८. चन्द्रिकारसं पिबतीत्येवंशीलं चन्द्रिकारसपातृ ज्योत्स्नाद्रवपानशीलं चकोरा ज्योत्स्नाप्रियास्तेषां कुलं निकुरम्बं कर्तृ चन्द्रिका-

---

१ BC °पसमिणं. २ C °शमनीं. ३ D संतप्ताङ्गः. ४ B drops from here upto दहः in the next line.

पवणेणोव्वाय-विलेवणाउ वसुअन्त-सम-जला कुलडा[1] ।
उड्ढन्ते[2] ससुर-जणे ओहीरन्ते[3] पिए य गया ॥ ९ ॥
निद्दायन्तं कमलं भमरो नाइग्घिउं पि ओच्छरिओ ।
अग्घायन्तो कुमुअं अब्भुत्तन्तो व्व मयरन्दे ॥ १० ॥
न्हाउं उदय-त्थिअ-ससि-संखायाथक्क-जुण्ह-जल-वरिसे ।
निअ-ठाणे चिट्ठन्तो वि को न सुहिओ निरप्पीअ[4] ॥ ११ ॥

रसम् अपिबत् । तथा अलिकुलं कर्तृ । अनुद्वानः सरसो यः शेफालिकापरागः निर्गुण्डीपुष्परजः तं पिबति स्म ॥

पिज्जणिजं । घोट्टिउं । पट्टीअ । डल्लिरं । पिअइ । "पिबेः पिज-डल्ल-पट्ट-घोट्टाः ।" [१०] ॥

९. पवनेन उद्वानं शुष्कं विलेपनं यासां तास्तथा । उद्वात् शुष्यत् श्रमजलं साशङ्कगमनखेदोद्भवघर्माम्बु यासां तास्तथा कुलटाः स्वैरिण्यः श्वशुरजने पतिपित्रादिके निद्राति स्वपति सति प्रिये च निद्राति सति गताः विटपार्श्वं प्राप्ताः ॥

अणोरुम्मिअ । उव्वाय । वसुअन्त । "उद्वाकेरोरुम्मा वसुआ" [११] ॥

१०. निद्रात् मुकुलीभवत् कमलम् आघ्रातुमपि आस्तां स्थातुं शिञ्जितुमपि भ्रमरो नावस्तृतः उपस्थितः । अत्रोत्प्रेक्ष्यते । आजिघ्रन् कुमुदं मकरन्दे तद्रसे स्नान् इव स्नानव्याघृत इव ॥

उड्ढन्ते[2] । ओहीरन्ते[3] । निद्दायन्तं । " निद्राकेरोहीरोड्डौ " [१२] ॥

आइग्घिउं । अग्घायन्तो । " आघ्रेराइग्घः " [१३] ॥

११. उदयस्थितः उदयशिखरिशिखरारूढः स चासौ शशी च तस्य संस्त्याना सान्द्रा अस्थिता सर्वत्रप्रसरणशीला यासौ ज्योत्स्ना चन्द्रिका सैव संतापापहरणाज्जलं तस्य वर्षो निरन्तरं निपात-

---

१ C कुडला. २ B उघंते; C ओघंते. ३ BC उघंते. ४ B °शिखर°.

उदयुट्ठिअस्स ससिणो समुहोकुकुरिअ-किंनरीहि कओ ।
अमिलाण-पारिजायापव्वाइअ-कप्प-कुसुमग्घो ॥ १२ ॥
वाय-मुह-विहिअ-कमलो निम्मविआझिज्जमाण-कुमुअ-सिरी ।
निम्माणिअ-हरिसमणिज्झरन्त-रुइ-णुमिअ-सव्व-दिसो ॥१३

स्तस्मिन् स्नात्वा अङ्गं धौत्वा निजस्थाने स्वावासे स्थितोपि सुखसाधन-विषयप्रयत्नरहितोपि को न सुखितस्तस्थौ । अपि तु सर्वोपि निर्वृतो जात इति भावः ॥

अब्भुत्तन्तो । न्हाउं । स्नाकेरब्भुत्तः " [१४]

संखाय । " समः स्त्यः खा " [१५] ॥

अथक्क । ठाणे । चिट्ठन्तो । निरप्पीअ । "स्थष्ठा-थक्क-चिट्ठ-निरप्पाः "[१६]। बाहुलकात् क्वचिन्न । त्थिअ ॥

१२. उदयोत्थितस्य उदयाचले प्राप्तोद्गमस्य शशिनः अम्लानानि विकसितानि यानि पारिजातानि पारिजातप्रसूनानि अम्लानानि कल्पस्य कल्पद्रुमस्य कुसुमानि च । तेषाम् अर्घः अञ्जलिना क्षेपः संमुखोत्थिता भक्तिवशाद् अभिमुखीभूताः याः किंनर्यः किंपुरुषाङ्गनास्ताभिः कृतः ॥

उट्ठिअस्स । उकुक्कुरिअ । " उदष्ठ-कुक्कुरौ [१७] ॥

१३–२१. नवभिः कुलकम् । खं गगनतलं शशी आरूढः अध्यासीनः । कथंभूत इत्याह । म्लानमुखानि विच्छायाग्राणि विहितानि कमलानि येन स तथा । निर्मिता क्लप्ता अक्षीयमाणा अभ्रश्यमाना कुमुदश्रीर्येन स तथा । निर्मितः हर्षो यत्रेति छादनक्रियाविशेषणम् । अक्षयन्ती ह्रासम् अनुपगच्छन्ती या रुचिर्ज्योत्स्ना तया छादिता व्याप्ता दिशो येन स तथा ॥

---

१ BC उदय°. २ C °रइ. ३ B om. पारिजातानि. ४ BCD om. उ°.

नूमिअ-गयणो सन्नुमिअ-महि-अलो ढक्किओडु-पह-पसरो ।
ओम्बालिअ-दीव-रुई पव्वालिअ-माणिणी-माणो ॥ १४ ॥
छाइअ-जणच्छि-पसरं तम-पुञ्जं सव्वओ णिहोडन्तो ।
अणिवारिअ-पह-पसरो पाडिअ-दूमिअ-पउत्थ-कुलो ॥१५॥
किरणेहिँ खं दुमन्तो धवलण-कुच्चय-सिरिं तुलन्तेहि ।
ओहामन्तो अमओलुण्डिर-नव-रुप्पमय-कुम्भं ॥ १६ ॥
जलमुल्लुण्डावन्तो ससि-कन्ताउ अमयं विरेअन्तो ।
पल्हत्थाविअ-गुज्झो रइ-वावड-मिहुण-हिअआओ ॥ १७ ॥

१४. छादितं कान्त्या व्याप्तं गगनं येन स तथा । छादितमहीतलः रोचिरावृतपृथ्वीपृष्ठः । छादितोडुप्रभाप्रसरः तिरोहितनक्षत्रद्युतिविस्तारः । छादितदीपरुचिः अपह्नुतप्रदीपप्रभः । छादितः रणरणकजननाद् गोपितः मानिनीमानो येन स तथा ॥

१५. छादितजनाक्षिप्रसरं निरुद्धलोकलोचनव्यापारं तमःपुञ्जं ध्वान्तस्तोमं सर्वतः समन्तात् निवारयन् निषेधन् निपातयन् विनाशयन् वा यतोऽनिवारितः मेघादिभिरनिरुद्धः प्रभाप्रसरो यस्य स तथा । पातितं मूर्छाजननाद् अधःक्षिप्तं दावितं विरहानलोद्दीपनात् तापितं धवलितं वा पाण्डुवर्णं कृतं प्रोषितकुलं पान्थसार्थो येन स तथा ॥

१६. धवलनाय अभ्रकादिना प्रासादश्वेतीकरणाय कूर्चको मुञ्जादिर्मयं धवलनोपकरणम् । तस्य श्रियं तोलयद्भिः अनुकुर्वाणैः किरणैः कृत्वा खं व्योमाङ्गणं धवलयन् मण्डयन् । अमृतं विरेचयतीत्येवंशीलः अमृतविरेचयिता नवस्तत्कालोद्भवो रूप्यमयो दुर्वर्णनिर्मितो योसौ कुम्भस्तं तोलयन् अनुविदधत् ॥

१७. शशिकान्तात् जलं विरेचयन् क्षारयन् अमृतं विरेचयन्

---

१ B उमालिअ°; C ओमालिअ.° २ BC पल्ल°. ३ D °मानो कामिन्यभिमानो येन. ४ BC °मयधव.° २ BC कांतान्.

आहोडिअ-धणुह-गुणे सर-ताडिअ-तिहुअणम्मि रइ-नाहे ।
दूर-विहोडिअ-सज्झस-असईणं दइअ-मेलवणो ॥ १८ ॥
नीहार-मीसिआहि व छुह-रस-वीसालिआहि व पहाहि ।
तिमिरोद्धूलिअ-भुवणं गुण्ठन्तो भामिआहि नहे ॥ १९ ॥
कामि-मण-तालिअण्टिर-वम्महआणं जगे तमाडन्तो ।
नासविअ-भओ अहिसारिआण हारविअ-लज्जाण ॥ २० ॥

स्रवन् । रतौ संभोगे व्यापृतानि यानि मिथुनानि तेषां हृदयेभ्यः विरेचितगुह्यः बहिःकृतान्तरङ्गाभिप्रायः । सर्वत्र रिचिर्बहिर्निःसारणमात्रे । ततश्च णिग्यपि विरेचनार्थ एव भवति । विरेचनं बहिर्निःसारणम् ॥

१८. ताडितः आस्फालितः धनुर्गुणः कोदण्डप्रत्यञ्चा येन स तथा तस्मिन् । शरैः मदनोन्मादनमोहनतापनशोषणाख्यबाणैस्ताडितं निधुवनोन्मादादिभावजननाद् उपद्रुतं त्रिभुवनं त्रैलोक्यं येन स तथा तस्मिन् रतिनाथे सति दूरादेव ताडितम् अपास्तं साध्वसं पतिपित्रादिभयं यासां तास्तथा ताश्च ता असत्यश्च कुलटास्तासां दयिता नटविटादिका वल्लभास्तेषां मिश्रणः संपर्कजनकः । त्रिभुवनास्खलिताज्ञे मन्मथे गृहीतधनुषि पित्रादीन् अवगणय्य स्ववल्लभान् अभिसस्रुरित्यर्थः । राजभये पित्रादिभयं न किंचिद् इत्युक्तिलेशः ॥

१९. नीहारमिश्रिताभिरिव शैत्यशैत्याभ्यां प्रालेययुक्ताभिरिव सुधारसमिश्रिताभिरिव अमन्दानन्दजननात् पीयूषद्रवसंपृक्ताभिरिव नभसि भ्रमिताभिः व्योमाङ्गणे प्रसारिताभिः प्रभाभिः कृत्वा तिमिरोद्धूलितभुवनं ध्वान्तावगुण्डितविश्वम् उद्धूलयन् व्याप्नुवन् ॥

२०. कामिमनो भ्रमयति चालयति इत्येवंशीलः कामिमनोभ्रमयिता स चासौ मन्मथश्च तस्य आज्ञां जगति भ्रमयन् विस्तारयन् ।

---

१ ° BCD °धनुषगु°.

विउडिअ-चओर-तण्हो जुण्हाए विप्पगालिअ-दिणोम्हो ।
नासिअ-चक्को विरहिणि-पलावणो खं ससी चडिओ ॥२१॥

नाशिता कामार्तत्वात् त्यक्ता लज्जा यकाभिस्तास्तथा तासाम् अभिसारिकाणां स्वैरिणीनां नाशितं लज्जापनोदाद् अपनीतं भयं येन स तथा ॥

२१. [ज्योत्स्नया] नाशितचकोरतृष्णः अपनीतज्योत्स्नाप्रियपिपासः । तथैव च नाशितो विद्रावितो दिनोष्मा वासरसंतापो येन स तथा । नाशितः प्रियतमाया विघटितश्चक्रो येन स तथा । विरहिणीनां प्रोषितप्रियाणां नाशनः कथाशेषताकारी ॥

अमिलाण । पव्वाइअ । वाय । " म्लेर्वा-पव्वायौ " [१८]

निम्मविआ । निम्माणिअ । " निर्मो निम्माण-निम्मवौ " [१९]

झिज्जमाण । अणिज्झरन्त । " क्षेर्णिज्झरो वा " [२०] ॥

णुमिअ । नूमिअ । सन्नुमिअ । ढक्किओ । ओम्बालिअ । पव्वालिअ । छाइअ । " छदेर्णुम-नूम-सन्नुम-ढक्कौम्बाल[1]-पव्वालाः " [२१] ॥

णिहोडन्तो । अणिवारिअ । पाडिअ । " निव्रि-पत्योर्णिहोडः " [२२] ॥

दूमिअ । " दूङो दूमः " [२३] ॥

दुमन्तो । धवलण । "धवलेर्दुमः" [२४] ॥ "स्वराणां स्वराः"[४.२३८] बहुलम् इति दीर्घत्वमपि । दूमिअ ॥

तुलन्तेहि । ओहामन्तो । " तुलेरोहामः " [२५] ॥

ओलुण्डिर । उल्लुण्डावन्तो । विरेअन्तो । पल्हत्थाविअ । " विरिचेरोलुण्डोल्लुण्ड-पल्हत्थाः" [२६] ॥

आहोडिअ । विहोडिअ । [ताडिअ] । " तडेराहोड-विहोडौ " [२७] ॥

मेलवणो । मीसिआहि । वीसालिआहि । "मिश्रेर्वीसाल-मेलवौ " [२८] ॥

---

१ BCD °ढक्कोम्बाल°.

अह दोवारिअ-दाविअ-नरवइ-दंसिअ-अणेग-पाहुडओ ।
आभरण-कन्ति-दक्खविअ-सुरधणू दरिसिएभ-गई ॥ २२ ॥
उदउग्गिअ-रवि-तेओ उग्घाडिअ-ससिह-जण-मणाणन्दो ।
संभाविओ उविन्दो इन्दो आसंघिओ अह वा ॥ २३ ॥
उल्लालिअ-णेवत्थणमुत्थंघिअ-कर-पुडं नमन्त-निवे ।
गुलुगुञ्छिअच्छि उप्पेलिअच्छिणो सणिअमिक्खन्तो ॥ २४

उद्धूलिअ । गुण्ठन्तो । " उद्धूलेर्गुण्ठः " [२९] ॥

भामिआहि । तालिअण्टिर । तमाडन्तो। "भ्रमेस्तालिअण्ट-तमाडौ"[३०]॥

नासविअ । हारविअ । विउडिअ । विप्पगालिअ । नासिअ । पलावणो । " नशेर्विउड-नासव-हारव-विप्पगाल-पलावाः " [३१] ॥

२२-२६. पञ्चभिः कुलकम् । [अथ] नृपः कुमारपालनरपतिः कनकमण्डपिकां सुवर्णनिर्मितह्रस्वमण्डपम् अधिष्ठितः अध्यासीनः । कथंभूतोसौ इत्याह । दौवारिकेण दर्शिता निवेदिता ये नरपतयस्तैर्दर्शितानि पुरो धरणात् प्रत्यक्षीकारितानि [अनेकानि] प्राभृतानि सुवर्णरत्नादिढौकनानि यस्य स तथा । आभरणानाम् उत्तमाङ्गश्रवणभुजादिदेशसंस्थकोटीरकुण्डलकेयूराद्यलंकाराणां कान्त्या दर्शितं जनानां प्रत्यक्षं विधापितं सुरधनुर्येन स तथा । दर्शिता साक्षात्कारिता इभगतिः गजपदन्यासो येन स तथा । हस्तिलीलया गच्छन्नित्यर्थः ॥

२३. उदये उद्भटितं निःशेषाशिष्टवैरिवारशिक्षणात् सर्वत्र उल्लासितं रविवत् तेजो येन स तथा । उद्भटितो विस्तारितः सस्पृहा धनाद्यभिलाषुका ये जनास्तेषां मनांसि तेषाम् आनन्दः समीहितवसुदानात् प्रमोदो येन स तथा। एवंविधः सन् उपेन्द्रः कृष्णः संभावितः ऊहितः। वेति पक्षान्तरे । इन्द्रो वा संभावितः ॥

२४. उन्नमितम् ऊर्ध्वीकृत्य एकपार्श्वाद् अपरपार्श्वं नीतम् ।

उन्नामिअ-भुमयाए भण्डारे पाहुडाइँ पेण्डविरो।
नरवइ-पट्ठविआइं देवय-पट्ठाविआइं च॥ २५॥
वोक्कन्त-महामच्चो निवो अवुक्कन्त-पणइ-मण्डलिओ।
विण्णत्ति-दिन्न-कण्णो अहिट्ठिओ कणय-मण्डविअं॥ २६॥

उत्तारितम् इति यावत्। नेवत्थणमिति देश्यः। निरुञ्छनं[1] यत्र नमने तत्तथा। सम्राद्स्वान्ततोषाय विहितोत्तरीयचेलस्फोरेण[2]म् इति यावत्। उन्नमितकरपुटम् ऊर्ध्वीकृत्य योजितपाणिसंपुटं च यथा भवति एवम् उन्नमिताक्षान् भयादरपरीतचेतस्त्वाद् विस्फारितेक्षणान् नमतो नृपान् उन्नमिताक्षं तद्भक्त्या प्रसन्नतया कीदृशोयम् इति ज्ञातुं विस्तारितनेत्रं शनैर्मन्दम्। लीलयेति यावत्। ईक्षमाणः॥ गुलुगुञ्छिअच्छीत्यत्र समासान्तविधेरनित्यत्वाद् न समासान्तः॥

२५. नरपतिभिः कुङ्कुणमालवकदेशादिदेशभूपतिभिः प्रस्थापितानि मनःप्रसादनाय मुत्कलितानि देवताप्रस्थापितानि मन्त्रादिवशीकृतदेव-प्रेषितानि च प्राभृतानि ढौकनानि उन्नमितभ्रुवा। भ्रूक्षेपेण कृत्वेत्यर्थः। भाण्डागारे प्रस्थापयिता न्यसनशीलः॥

२६. विज्ञपयन्तः कार्यं निवेदयन्तो महामात्या यस्य स तथा। विज्ञपयन्तः प्रणयिनः प्रीतियुक्ता मण्डलिकाः कतिपयदेशस्वामिनृपा यस्य स तथा। विज्ञप्तौ[3] महामन्त्रिमण्डलिककार्याकर्णने दत्तो वितीर्णः कर्णो येन स तथा॥

दाविअ। दंसिअ। दक्खविअ। दरिसिए। "दृशेर्दाव-दंस-दक्खवाः"[३२]॥

उग्गिअ। उग्घाडिअ। "उद्घटेरुग्गः" [३३]॥

सिहि। "स्पृहः सिहः" [३४]॥

संभाविओ। आसङ्किओ। "संभावेरासङ्घः" [३५]॥

---

१ C निरूछनं. २ BD °स्फेरण°; C °स्फुरण°. ३ BC विज्ञपितो.

पणमिर-पणइ-पणामिअ-दिट्ठी सो तत्थ अल्लिविअ-हरिसो ।
अणचच्चुप्पिअ-हिअओ अप्पिअ-निव-खोहमासीणो ॥ २७ ॥
जाविअ मुहुत्तमेगं पुरोहिओ जविअ-दुट्ठ-कलि-ललिओ ।
दन्त-रुई-ओम्बालिअ-गयणो उच्चारही[1] मन्तं ॥ २८ ॥

उल्लालिअ । उत्थङ्घिअ । गुलगुञ्छिअ । उप्पेलिअ । उन्नामिअ । उन्नमेरुत्थङ्घोल्लाल-गुलुगुञ्छोप्पेलाः " [३६] ॥

पेण्डविरो । पट्ठविआइं । पट्ठाविआइं । " प्रस्थापेः पट्ठव-पेण्डवौ " [३७] ॥

वोक्कन्त । अवुक्कन्त । विण्णत्ति । " विज्ञपेर्वोक्कावुक्कौ " [३८] ॥

२७. प्रणम्रप्रणतौ सेवार्थसमागतवन्दारुसकलभूपालकृतपादपतने प्रणम्रप्रणयिषु प्रह्वप्रार्थकलोकेषु वा अर्पिता प्रसन्नतासूचनाय मनाग् न्यस्ता दृष्टिः चक्षुर्विन्यासो येन स तथा । अर्पितहर्षः स्वदर्शनप्रदानसंपादितसभाजनसंतोषः । अनर्पितहृदयः गम्भीरत्वाद् अनवतीर्णस्वाभिप्रायः स कुमारपालावनिपः । अर्पितनृपक्षोभं किम् एषोधुना नो विधास्यतीति उत्पादितप्रत्यर्थिनृपतिततिचित्तसंभ्रमं यथा भवति एवं तत्र कनकमण्डपिकायाम् आसीनः उपविष्टः ॥

पणामिअ । अल्लिविअ । अणचच्चुप्पिअ । अप्पिअ । " अर्पेरल्लिव-चच्चुप्पणामाः [३९] ॥

२८. एकं मुहूर्तं यापयित्वा उपवेशानन्तरं स्वावसरप्राप्त्यर्थं नृपस्य सावधानार्थं च क्षणमात्रं प्रतीक्ष्य यापितं स्वमहिम्ना गमितं दुष्टस्य लोकदुःखदायित्वाद् अप्रियस्य कलेः कलिकालस्य ललितं विलासो येन स तथा । दन्तरुचिभिः शशधरकरकल्पदशनरश्मिभिः प्लावितं व्याप्तं गगनं येन स तथा । पुरोहितः पृथ्वीशश्रेयोर्थं मन्त्रम् उदचारीद् अभणत् ॥

जाविअ । जविअ । " यापेर्जवः " [४०] ॥

---

१ B उव्वा°; C उच्चा°.

हार-प्पह-पव्वालिअ-हिओ निवो पाविओ व्व अमएण ।
पक्खोडिअ-चमराहिं विकोसिअच्छीहि उवसरिओ ॥ २९ ॥
ओग्गालिर-वसहाणं वग्गोलिर-करहयाण वारम्मि ।
रोमन्थ-भङ्ग-जणणो अहासि गम्भीर-तूर-रवो ॥ ३० ॥
णुव्वन्तो सिरि-णिहुवय-सिरिमुम-कामय-सिरिं पयासन्तो ।
विच्छोलिअ-भुमयाहिं राया विलयाहि परिअरिओ ॥३१॥

२९. हाराणां नानाविधमुक्ताकलापानां प्रभाभिः प्लावितं हृदयं वक्षःस्थलं यस्य स तथा । अतः उत्प्रेक्ष्यते । अमृतेन प्लावित इव व्याप्त इव । विकोशितानि वारंवारं चालनेन स्फारीकृतानि चामराणि यकाभिस्तास्तथा ताभिः । विकोशिताक्षीभिः विकसितनेत्राभिः नृपः उपसृतः[2] चामरव्यग्रकरवनिताभिः शोभार्थं पार्श्वतः सेवित इत्यर्थः ॥

ओम्वालिअ । पव्वालिअ । पाविओ । "प्लावेरोम्वाल-पव्वालौ" [४१] ॥
पक्खोडिअ । विकोसिअ । " विकोशेः पक्खोडः " [४२] ॥

३०. रोमन्थं कुर्वन्ति "णिज् बहुलं नाम्नः°" [हे० ३.४] इति णिजि रोमन्थयन्ति इत्येवंशीला रोमन्थयितारः उद्गीर्य चर्वणकरिष्णवो ये वृषभा बलीवर्दास्तेषां रोमन्थयितृकरभाणां च वारे समूहे । रोमन्थ[3]यनं भावे घञि रोमन्थस्तस्य भङ्गः प्रतिरवसंवलिततादृग्ध्वानश्रवणेन संजातक्षोभत्वाद् विच्छेदस्तस्य जनकस्तूर्यरवो नान्दीनिनादः अथ स्वर्णमण्डपिकायां सिंहासनोपविष्टे नृपे पुरोहितमन्त्रोच्चारणचामरिकीचामरग्रहणानन्तरम् आसीत् ॥

ओग्गालिर । वग्गोलिर । रोमन्थ । "रोमन्थेरोग्गाल-वग्गोलौ" [४३] ॥

३१. श्रियं कामयते "शीलिकामि"[हे० ५.१] इति णे श्रीकामः सै[4] एव

---

१ BD भुमयाए. २ उपश्रितः. ३ B रोमंथयमं. ४ B स च for स एव.

अणकम्पिर-कर-वलिअ-त्थाले आरोविउं अदोलि-सिहं ।
रङ्गोलिर-ताडङ्का वर-विलयारत्तिअं काही ॥ ३२ ॥
जण-रञ्जणेहि राविउमुव्वीसं तत्थ पणमिर-निवेहि ।
परिवाडिअञ्जलीहिं खे घडिआ कमल-कोस व्व ॥ ३३ ॥

श्रीकामकस्तस्य श्रियं प्रकाशयन् उमाकामकश्रियं प्रकाशयन् । संप्रत्यपि स्वविभूत्या माधवपार्वतीपतिलक्ष्मीं प्रकटयन्नित्यर्थः । कम्पिता अभीष्टकामिनाम् अर्धाक्षनिरीक्षणार्थं चालिता भ्रुवो यकाभिस्तास्तथा ताभिर्वनिताभी राजा कुमारपालनृपः परिवृतः स्वस्वकृत्यकरणाय उपसृतः ॥

णिहुवय । कामय । " कमेर्णिहुवः " [४४] ॥

णुव्वन्तो । पयासन्तो । " प्रकाशेर्णुव्वः " [४५] ॥

३२. अकम्प्रौ अकम्पनशीलौ । निश्चलावित्यर्थः । यौ करौ हस्तौ तयोरारोपितं धृतं यत् स्थालं रत्नखचितकाञ्चनपात्रं तस्मिन् आरोप्य संस्थाप्य आरत्रिकं नीराजनाय दीपकमण्डलम् । न दोलयतीति ग्रहादिभ्यो णिनि अदोलिनी स्थिरा शिखा कलिका यस्य तत्तथा तद् दोलिनौ लीलावशात् चलनशीलौ ताडङ्कौ कुण्डले यस्याः सा तथा । वरवनिता वारविलासिनी अकार्षीत् । उदतारयदित्यर्थः ॥

विच्छोलिअ । अणकम्पिर । " कम्पेर्विच्छोलः " [४६] ॥

वलिअ । आरोविउं । " आरोपेर्वलः " [४७] ॥

अदोलि । रङ्गोलिर । " दोले रङ्गोलः " [४८] ॥

३३. जनरञ्जनैः नीतिशालितया लोकावर्जकैः प्रणम्रनृपैः घटिताञ्जलिभिः योजितैः करसंपुटैः कृत्वा तस्यां कनकमण्डपिकायां उर्वीशं कुमारपालनृनाथं रञ्जयितुम् आत्मनि सानुरागं कर्तुं खे शीर्षोपरिदेशे कमलकोशा इव कमलकुड्मलानीव घटिता विरचिताः ॥

रञ्जणेहि । राविउं । " रञ्जे रावः " [४९] ॥

परिवाडिअ । घडिआ । " घटेः परिवाडः " [५०] ॥

कणय-परिआलिएहिं रयणाहरणेहि वेढिअङ्गुलिआ ।
विकिर्णण-किणण-छइल्ला पुरो निविट्ठा महाजणिआ ॥ ३४ ॥
विक्केन्तोद्धरिआ इव भायन्ता अवि अबीहिरा निच्चं ।
भीएहि सहचरेहिं निव-दूआ दूरमल्लीणा ॥ ३५ ॥

३४. कनकेन वेष्टितैर्नियमितै रत्नाभरणैर्मरकतपद्मरागादिमुद्रिकाभिः कृत्वा वेष्टिताङ्गुलयः व्याप्तानामिकाद्यङ्गुर्यः । विक्रयणक्रयणयोश्छेकाः महार्घप्रवालमौक्तिकमाणिक्यादिवस्तुनो मूल्येन प्रदानोपादानयोर्विचक्षणा महाजनिकाः श्रेष्ठिसार्थवाहप्रमुखपौरलोकाः पुरः युष्मत्प्रसादाद् वयं सुखिन इत्यादिनिजवार्ताप्रतिपादनाय राज्ञोऽग्रे निविष्टा आसीनाः ॥

परिआलिएहिं । वेढिअ । " वेष्टेः परिआलः " [५१] ॥

३५. नृपदूताः प्रत्यर्थिपृथ्वीशसंदेशहारिणो भीता अपि प्रतापपराभूततपनमण्डलश्रीकुमारपालभूपालालंकृततथाविधसभादर्शनात् चकिता अपि अभीताः स्वप्रभुसामर्थ्यचिन्तनात् सावष्टम्भा भीतैः सहचरैः सभादर्शनादेव क्षुब्धैः स्वानुचरैः सह दूरम् आलीनाः । प्रस्तावे सति संदेष्टव्यं विज्ञपयिष्याम इति सभाया दूरदेशे स्थिताः । एवंविधाः सन्तो विज्ञायन्ते विक्रीणदुद्धरिता इव विक्रीणत्सु सत्सु उद्धरिताः केनापि अगृहीतास्त इव । यत् किल विक्रीणताम् उद्धरति तत् पृथग् भवति ॥

विकिर्णण । किणण । विक्केन्तो । " क्रियः किणो वेस्तु क्के च " [५२] इति क्रीणातेः किणो वा वेः परस्य तु द्विरुक्तः क्के । चकारात् किणश्च । णेरिति निवृत्तम् ॥ भायन्तो । अबीहिरा । "भियो भा-बीहौ" [५३] ॥ बाहुलकात् क्वचिन्न । भीएहि ॥

अल्लीणा । " आलीङोऽल्ली " [५४]

---

१ BC विकिणिण°. २ BC विक्कंतो°. ३ C विक्रयक्रयण°. ४ B °मंडन°. ५ B एव. ६ BC विकिणिण. ७ BC किणिण. ८ BC विक्कंतो. ९ BC णे इति. १० BC भाअंता.

भत्ति-णिरिग्घिअ-हिअआ मउलि-णिलीअन्त-पाणि-संपुडया
निव-पय-कमले[1]-णिलुक्कन्त-लोअणा सा सहा आसि ॥ ३६ ॥
आसि मणि-वेइआसुं लुक्कन्तो मणि-महीएँ लिक्कन्तो ।
लिहक्कन्तो मणि-थम्भेसु सय-गुणो पडिकिदीइ जणो ॥ ३७ ॥
निवइ-निलीइर-नयणा अविराय-सिरी विलीइर-जुआणा ।
अलि-रुञ्जिअ-जइ-रुण्टि[2]अ-किङ्किणि-नीवीउ आसीणा ॥ ३८ ॥

३६. भक्तौ नृपाराधने निलीनम् आसक्तं हृदयं यस्याः सा तथा । मौलौ मस्तके निलीयमानम् आश्लिष्यत् पाणिसंपुटं यस्याः सा तथा । राजानम् उद्दिश्य योजितहस्तेत्यर्थः । नृपपदकमले निलीयमानलोचना संश्लिष्यन्नयना सा सर्वोत्कृष्टा सभा आसीत् । अपरव्यापारं परित्यज्य सेवैकताना संवृत्तेति भावः ॥

३७. मणिवेदिकासु रत्ननिर्मितवितर्दिषु निलीयमानः । मणिमह्यां निलीयमानः मणिस्तम्भेषु च निलीयमानः । प्रतिकृत्या प्रतिबिम्बेन तत्र तत्र संक्रामन् शतगुणः प्रभूतो जनः आसीत् संपन्नः ॥

३८. नृपतौ निलेतृ सञ्जनशीलम् । वीक्षणपरम् इति यावत् । नयनं यासां तास्तथा । अविलीनश्रियः अभ्रष्टशरीरशोभाः विलेतारः धैर्यध्वंसाद् द्रवणशीला युवानो यकाभ्यस्तास्तथा । अलिरुतजयि रुतं यासां तास्तथा एवंविधाः किङ्किण्यः क्षुद्रघण्टिका यासु तथाभूता नीवयो यासां तास्तथा नार्यः आसीनाः आरत्रिकादि कृत्वा वारवनिताः कुमारपालनृपपार्श्वे उपविष्टाः ॥

णिरिग्घिअ । णिलीअन्त । णिलुक्कन्त । लुक्कन्तो । लिक्कन्तो । लिहक्कन्तो । निलीइर । "निलीङेर्णिलीअ-णिलुक्क-णिरिग्घ-लुक्क-लिक्क-लिहकाः" [५५] ॥

अविराय । विलीइर । "विलीङेर्विरा" [५६] ॥

रुञ्जिअ । रुण्टिअ । "रुके रुञ्ज-रुण्टौ" [५७] ॥

---

१ BC कमलि°. २ BC °रुंडिय°.

सग्गे वि हणिअ-विहवा असुणिअ-दोसा तिलोअ-सिरि-धुवणी ।
कुमर-नरिन्द-सहा सा धुणिआरि-मणोरहा हूआ ॥ ३९ ॥
हुन्ताणन्दो अहुवन्त-संसओ निवइमुब्भुअन्त-मई ।
पहवन्तो अपरिहवो विण्णविही संधिविग्गहिओ ॥ ४० ॥
देव विवक्खीहुन्तो णिव्वाडिअ-बलेण सो पहुप्पन्तो ।
हूओ कुङ्कुण-नाहो जहा तहा कुणसु अवहाणं ॥ ४१ ॥

३९. स्वर्गेपि । आस्तां मर्त्यलोके । श्रुतविभवा विख्यातसमृद्धिः अश्रुतदोषा स्वपरदेशानाकर्णितास्थितिः । त्रैलोक्यश्रीर्धूयते स्ववैभवेन अभिभूयते अनयेति करणे अनटि त्रैलोक्यश्रीधवनी सा प्राग्व्यावर्णितस्वरूपा "ते लुग् वा" [हे० ३.२] इति कुमारपालेत्यत्र उत्तरपदलोपे कुमारः । स चासौ नरेन्द्रश्च तस्य सभा धुतारिमनोरथा विष्वगवस्थितप्रासनिस्त्रिंशशक्तिशूलचक्राद्यस्त्रकलितानेकसुभटविसंकटत्वात् परास्तप्रत्यर्थिसार्थविरूपकाभिप्राया भूता संजाता ॥

हणिअ । असुणिअ । " श्रुटेर्हणः " [५८] ॥
धुवणी । धुणिअ । " धूगेर्धुवः " [५९] ॥

४०. भवदानन्दः नृपाग्रतोऽभिप्रेतनिवेदनात् संपद्यमानप्रमोदः । अभवत्संशयः विज्ञातस्वपरसैन्यवृत्तान्तत्वाद् अविद्यमानप्रतिपाद्यविषयसंदेहः । उद्भवन्मतिः सप्रतिभत्वाद् उल्लसद्बुद्धिः । प्रभवन् स्ववचनचातुर्येण इतरविज्ञपकेभ्यः समर्थः संजायमानः । अपरिभवः कुत्रापि असंपन्नातिरस्कारः । सांधिविग्रहिकः संधानविग्रहविनियुक्तप्रधानपुरुषः व्यजिज्ञपत् वक्ष्यमाणं न्यवीविदत् ॥

हूआ । होन्त । अहुवन्त । अपरिहवो । " भुवेर्हो-हुव-हवाः " [६०] ॥
क्वचिद् अन्यदपि । उब्भुअन्त ॥

४१. विज्ञप्तिकामेव गाथाषट्कषष्ठया आह । हे देव महाराज

दूर-ट्ठिआहि करिउं णिआरिअं सुर-वहूहि दीसन्ता ।
संदाणन्ता अइनिट्ठहावणा वेरि-सुहडाण ॥ ४२ ॥
वावम्फिरा कलासुं अमोघ-णिव्वोलणं पयासन्ता ।
अपयल्लिर-असि-फलया णीलुञ्छन्ता रिउ-दलम्मि ॥ ४३ ॥

पृथग्भूतम् इतरोर्वीशसैन्यतो विशिष्टं स्पष्टभूतं सर्वत्र प्रकटं वा यद् बलं चतुरङ्गवाहनं तेन कृत्वा विपक्षीभवन् बलावलेपेन संपद्यमानः प्रभवन् शत्रुतिरस्कारेण समर्थः संजायमानः स लोगविख्यातः कुङ्कणानां नाथः कुङ्कणदेशाधीशः यथा यादृशो भूतः संपन्नस्तथा अवधानं कुरु । तद्वृत्तान्तनिशमनपरो भवेति भावः ॥

हुन्तो । " अविति हुः " [६१] ॥

[णिव्वडिअ । " पृथक्स्पष्टे णिव्वडः " [६२] ॥]

पहुप्पन्तो । " प्रभौ हुप्पो वा " [६३] । पक्षे पहवन्तो ॥

हूओ । " क्ते हू " [६४] ॥

४२. षड्भिः कुलकम् । हे महाराज तव योधाः कुङ्कणं प्राप्ताः । कीदृशाः । काणेक्षितकृतम् अर्धाक्षनिरीक्षणकरणं कृत्वा दूरस्थिताभिः गगनाङ्गणगताभिः सुरवधूभिः अप्सरोभिर्दृश्यमानाः एते रणाजिरे वैरिभिरदृष्टपृष्ठा वैकुण्ठस्वर्गम्[1] आसाद्य नः पतयो भविष्यन्तीति सस्पृहं विलोक्यमाना अवष्टम्भं कुर्वन्तः चित्तधैर्यम् आदधाना वैरिसुभटानां च अतिविष्टम्भकरणाः " बहुलम् एतन्निदर्शनम् " इति चुरादिवचनाद् रामो राज्यम् अकारयद् इतिवत् स्वार्थे णिचि निश्चेष्टताजनकाः ॥

४३. कलासु शस्त्रादिशिक्षासु श्रमं करिष्णवः अभ्यासं विधातारः । अमोघं वैरिविजयेन सफलं मन्युना ओष्ठमालिन्यकरणं तत् प्रकाशयन्तः दर्शयन्तः । अशिथिलीभवनम् अलम्बनं च करिष्णवः । सप्रयत्नग्रहणाद् निश्चलाः सुस्थानस्थाश्चेत्यर्थः । एवंभूता असयश्च

---

१ BC वैकुंत°.

कम्मन्तमेत्तं-मन्निअ-रिउणो गुललन्त सामिणो विजये ।
दाउं वसुमझरन्ता पहु-आदेसं च झूरन्ता ॥ ४४ ॥
जुद्धेण भेरावन्ता[1] राम-कहं भारहं भलावन्ता ।
निअ-कुल-कमं लढन्ता सुमरन्ता खत्तिआचारं ॥ ४५ ॥
वीर-वरणं सरन्ता पयरन्ता सामिणो पसायं च ।
बावण्ण वीर-कह-विम्हरावणा वइर-पम्हुहणा ॥ ४६ ॥

फलकाः खेटकाश्च येषां ते तथा । दल इति देश्यः सैन्यार्थे । रिपुसैन्ये निःपतनम् आच्छोटनं वा कुर्वन्तः ॥

४४. क्षुरं कुर्वाणा एव क्षुरकुर्वाणमात्राणि । अत्र च क्षुरशब्देन क्षुरविधेयं शिरस्तुण्डमुण्डनादि कर्मोच्यते । अतो नापितमात्राणि मनिता रिपवो यैस्ते तथा । स्वामिनः स्वप्रभोर्विजये विजयनिमित्तं स्वकुलदेवतादि प्रति चाटु कुर्वाणाः । वसु विभूतिं दत्त्वा वर्णनापरबन्दिजनाय वितीर्य अस्मरन्तः दानशौण्डत्वाद् अजानानाः प्रभ्वादेशं स्वामिप्रदत्तशिक्षां च स्मरन्तः मनसि धारयन्तः ॥

४५. युद्धेन तादृक्संग्रामेण कृत्वा रामकथां रामरावणयुद्धवृत्तान्तं स्मरयन्तो ज्ञापयन्तः । भारतं च कौरवपाण्डवयुद्धप्रतिपादकग्रन्थविशेषम् । कौरवपाण्डवयुद्धमित्यर्थः । स्मरयन्तः निजकुलक्रमं रणाङ्गणभङ्गपराङ्मुखस्वपूर्वपुरुषसमाचारं स्मरन्तः । क्षत्रियाचारं नष्टपृष्ठानुसरणपतितप्रहारपरिहाररूपं वीरव्रतं स्मरन्तः ॥

४६. वीरवरणम् अनेन सह मया योद्धव्यमिति प्राकृतप्रतिसुभटयुद्धाङ्गीकारं स्मरन्तः अवबुध्यमानाः स्वामिनः प्रसादं च स्मरन्तः । द्विपञ्चाशद्वीरकथायाः शूद्रकादिवीरचरित्रस्य[2] विस्मरणाः तत्कथां विस्मरतो लोकान् प्रयुञ्जानाः । वैरस्य स्मरणाः एतैः सह अस्मद्भर्तुर्विरोध इति स्मर्तारः ॥

---

१ BD °मंत.° २ B सरा.° ३ BC शूद्रकावीरादिचरि°.

पम्हुसिअ-अन्न-कज्जा विम्हारिअ-वाणारिन्द-बल-ललिआ ।
वीसारिअ-रिउ-मन्ता तुह जोहा कुङ्कुणं पत्ता ॥ ४७ ॥
सीह-रव-पोक्कणा ते कोक्कन्ता किं पि सच्च-वाहरणा ।
उव्वेल्लिर-तुरय-पयल्लिरेभ-चडिआ पसरिआ अ ॥ ४८ ॥

४७. विस्मृतान्यकार्याः । रणरसिकतया त्यक्तापरप्रयोजना इति भावः । विस्मारितं निजानुपमपराक्रमेण लोकानां स्मृतिपथम् अवतरत् निषिद्धं वानरेन्द्रबलस्य सुग्रीवशौण्डीर्यस्य ललितं स्फूर्तिर्यैस्ते तथा । विस्मारितः विस्मरन् स्मृतिपथाद् उत्तरन् प्रमुक्तः रिपुमन्त्रः अस्माभिरेवमेवं योद्धव्यम् इत्यादिशत्रुपर्यालोचो यैस्ते तथा । अस्मद्भटारब्धानां प्रतिभटानां सर्वं युद्धकरणं विस्मृतम् इति भावः ॥

कुणसु । करिउं । "कृगेः कुणः"[६५] । कृगेरित्यधिकारः उत्तरसूत्राष्टके ज्ञेयः॥

णिआरिअं । " काणेक्षिते णिआरः " [६६] ॥

संदाणन्ता । अइनिट्ठुहावणा । " निष्टम्भावष्टम्भे णिट्ठुह-संदाणं " [६७]"

वावम्फिरा । " श्रमे वावम्फः " [६८] ॥

णिव्वोलणं । " मन्युनौष्ठमालिन्ये णिव्वोलः " [६९] ॥

अपयल्लिर । शैथिल्यलम्बने पयल्लः " [७०] ॥

णीलुञ्छन्ता । " निष्पाताच्छोटे णीलुञ्छः" [७१] ॥

कम्मन्त । " क्षुरे कम्मः" [७२] ॥

गुललन्त । " चाटौ गुललः" [७३] ॥

अझरन्ता । झूरन्ता । भरावन्ता । भलावन्ता । लढन्ता । सुमरन्ता । सरन्ता । पयरन्ता । विम्हरावणा । पम्हुहणा । " स्मरेर्झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुहाः" [७४] ॥

पम्हुसिअ । विम्हारिअ । वीसारिअ । "विस्मुः पम्हुस-विम्हर-वीसराः"[७५]॥

४८. सिंहरवस्य व्याहरणाः प्रतिभटान् प्रति सिंहनादान्

अह महमहन्त-णीहरिअ-मद-जले सिन्धुरम्मि चडिऊण ।
ठाणाओं नीलिओ कुङ्कुणाहिवो नीसरन्त-बलो ॥ ४९ ॥
वरहाडिआ गढाओ रण-धाडिअ-रक्खणा भडा तस्स ।
जग्गिअ-खग्गा रण-जागरा य आअड्डिआ तत्तो ॥ ५० ॥

मुञ्चन्तः । किम् अपरे मृता इदानीम् इत्यादि व्याहरन्तो जल्पन्तः । सत्यव्याहरणाः स्ववचनप्रतिपन्नार्थनिर्वाहकत्वाद् अवितथभाषकाः । प्रसृत्वराः सत्वरं गमनशीला ये तुरंगमाः प्रसृमराश्च य इभाः कुञ्जरास्तेषु आरूढाः स्थिताः । प्रसृताः परबलमनु प्रचलिताश्च ॥

पोक्कणा । कोक्कन्ता । वाहरणा । " व्याहृगोः कोक्क-पोक्कौ " [७६] ॥

उव्वेल्लिर । पयल्लिर । पसरिआ । " प्रसरेः पयल्लोवेल्लौ " [७७] ॥

४९. अथ युष्मद्योधप्रसरणानन्तरं प्रसरद्गन्धं निःसृतं गण्डादिस्थानसम्भवाद् निर्गतं मदजलं यस्य स तथा तस्मिन् सिन्धुरे कुञ्जरे आरुह्य स्थानात् स्वपत्तनमध्याद् निःसरत् पृष्ठतो निर्गच्छद् बलं सैन्यं यस्य स तथा कुङ्कुणाधिपो मल्लिकार्जुनाख्यनृपः निःसृतः ॥

महमहन्त । " महमहो गन्धे " [७८] ॥

५०. गढेति देश्यो दुर्गे । तस्माद् निसृताः । रणान्निःसृतानां कातरतया संग्रामाङ्गणान्निर्गतानां रक्षणाः तद्व्याघातपरापरसुभटनिवारकत्वेन त्रायकाः । जागरिताः शत्रुप्रहाराय कोशेभ्यो निःकाशिता इत्यर्थः । खड्गा यैस्ते तथा । जाग्रतीत्यचि जागराः रणाय जागराः सावधानाश्च तस्य कुङ्कुणाधीशस्य भटास्ततः दुर्गनिर्गमानन्तरं व्याप्ृताः परस्परं युद्धाय प्रवृत्ताः ॥

णीहरिअ । नीलिओ । नीसरन्त । वरहाडिआ । धाडिअ । " निःसरेर्णीहर-नील-धाड-वरहाडाः " [७९] ॥

जग्गिअ । जागरा । " जाग्रेर्जग्गः " [८०] ॥

---

१ BC पयल्लोवेल्लौ.

समरम्मि वावरन्ता साहट्टिअ-पर-बला असंवरिआ ।
अणसाहरिअ-प्पेम्मा मरीहि सन्नामिआ वरिउं ॥ ५१ ॥
आदरिअ-वीर-वरणा सारन्ते पहरिउं पयट्टा व ।
अणओहिअ-भड-माणा ओरसिआ इव सिवस्स गणा ॥५२॥
ओअरिअ दीहिआओ अचयन्तीकय-तरन्त-सुहडेहिं ।
तीरन्ताण वि पारन्तएहिं तेहिं कयं जुज्झं ॥ ५३ ॥

५१. समरे व्याप्रियमाणाः प्रवर्तमानाः संवृतं युगपद् अभिघात-प्रवृत्तत्वेन भयजननात् पिण्डीकृतं परबलं यैस्ते तथा । असंवृताः भयाभावाद् यथेच्छं विचरिताः । असंवृतम् उच्छलत् प्रेम यासां ताः असंवृतप्रेमाणस्ताश्च ता अमर्यश्च ताभिर्वरितुं वरणं कर्तुम् आदृताः अङ्गीकृताः ॥

आअट्टिआ । वावरन्ता । " व्याप्रेराअट्टः " [८१] ॥

साहट्टिअ । असंवरिआ । अणसाहरिअ । "संवृगेः साहर-साहट्टौ"[८२]॥

५२. आदृतवीरवरणाः । अनेन परबलवीरेण सह मया योद्धव्यम् इति कृतप्रतिज्ञा इत्यर्थः । अनवतीर्णैः अभ्रष्टैः भटमानः सुभटाभिमानो येषां ते तथा । प्रहरतः प्रहारान् ददतः प्रहर्तुं प्रवृत्ताः । एवं च मर्त्यासंभाव्यतथाविधयुद्धविधानाद् मन्यन्ते शिवस्य गणा इव अवतीर्णाः स्वर्गलोकाद् आयाताः ॥

सन्नामिआ । आदरिअ । " आदृगेः सन्नामः " [८३] ॥

सारन्ते । पहरिउं । " प्रहृगेः सारः " [८४] ॥

५३. अशक्नुवत्कृताः असमर्थीकृताः शक्नुवत्सुभटा यैस्ते तथा तैः शक्नुवतामपि मध्ये शक्नुवद्भिस्तैः कुङ्कणाधिपभटैः दीर्घिकातः

सक्कन्तो अणथक्किअ-सलहिअ-सर-वरिसणो निवो ताण ।
मणि-खचिअ-कणय-वेअडिअ-माढिओ पहरिउं लग्गो ॥ ५४
दिन्नमसोल्लिअ-मंसासणाण अणपउलिअं तओ मंसं ।
अरि-पयण-पयावेणं तेणं सर-मिल्लिरेण रणे ॥ ५५ ॥

अवतीर्य युद्धं कृतम् । समरतूर्यनिर्घोषश्रवणप्रवृद्धोत्साहत्वेन तदैव स्नानाद्यपहाय संग्रामः प्रारब्ध इति भावः ॥

अणओहिअ । ओरसिआ । ओअरिअ । " अवतरेरोह-ओरसौ " [८५] ॥

५४. शक्नुवन् इतरसुभटापेक्षया समर्थः । अफक्कितम् अनीचैर्गतम् । सर्वोत्कृष्टमित्यर्थः । अत एव श्लाघितं शरवर्षणं यस्य स तथा । मणिभिः खचितः कनकेन खचितो माठिर्यस्य स तथा । मणिस्वर्णनिर्मितसंनाह इत्यर्थः । [नृपः] ताण इति द्वितीयायाः षष्ठी [३.१३४] इति तान् गूर्जरसुभटान् प्रहर्तुं लग्नः ॥

अचयन्तीकय । तरन्त । तीरन्ताण । पारन्तएहिं । सक्कन्तो । " शकेश्चयतर-तीर-पाराः " [८६] ॥

अणथक्किअ । " फक्कस्थक्कः " [८७] ॥

सलहिअ । " श्लाघः सलहः " [८८] ॥

खचिअ । वेअडिअ । " खचेर्वेअडः " [८९] ॥

५५. अरीणां पचनो दाहकः प्रतापो यस्य स तथा तेन शरमोक्षणशीलेन रणे तेन नृपेण अपक्कमांसस्य अशनानां भक्षकाणां गृध्रादीनाम् अपक्वं मांसं ततः शरमोक्षणानन्तरं दत्तम् । अनेके सुभटास्तेन व्यापादिताः सन्तो गृध्रादिभक्ष्या अभूवन्निति भावः ॥

असोल्लिअ । अणपउलिअं । पयण । " पचेः सोल्ल-पउलौ " [९०] ॥

---

१ B सत्सतूर्यनिघो°; C ममतूर्यनिर्घो°. २ BC °पउल्लौ.

उस्सिक्किअ-सङ्केणं पच्छा अवहेडिउं निअं पि दलं ।
अणछड्डिअ-कुल-धम्मं सीह-झुणी तेण रेअविओ ॥ ५६ ॥
णिल्लुञ्छिअ[1]-भय-पसरो धंसाडिअ-भयमिभं समारूढो ।
मुञ्चन्तो बाणे णिच्चलीअ सो कोह-दुहिअप्पा ॥ ५७ ॥
जूरवणोहि उमच्छन्तेसुं जय-सिरि-अवञ्चिओ समरे ।
नाह अवेहविरेहिं पाइक्केहिं[2] न वेलविओ ॥ ५८ ॥

५६. मुक्तशङ्केन अवगणितपरपक्षभयेन तेन नृपेण अमुक्तकुल-धर्मम् अत्यक्तक्षत्रियाचारं निजमपि । दलेति देश्यः सैन्ये । तत् पश्चाद् मुक्त्वा । अतिवीर्यात् स्वबलस्य अग्रे भूत्वेत्यर्थः । सिंहध्वनिर्मुक्तः । अयम् अहं युष्माकं कृतान्त इह आगत इति अस्मद्बलस्य निकटीभूय रणे जगर्जेत्यर्थः ॥

५७. मुक्तभयप्रसरः मुक्तभयं तथाविधानेकास्त्रपातेपि निर्भीकम् इभं समारूढः क्रोधदुःखितात्मा रोषाग्निसंतप्तगात्रः स नृपः बाणान् मुञ्चन्[3] दुःखम् अमुञ्चत् ॥

मिल्लिरेण । उस्सिक्किअ । अवहेडिउं । अणछड्डिअ । रेअविओ । णिल्लुञ्छिअ । धंसाडिअ । मुञ्चन्तो । " मुचेरुछड्डावहेड–मेल्लोस्सिक्क–रेअव–णिल्लुञ्छ–धंसाडाः " [९१] ॥

णिच्चलीअ । " दुःखे णिच्चलः " [९२] ॥

५८. त्रिभिर्विशेषकम् । हे नाथ कुमारपाल[4] नृप कुङ्कणाधीशः रचितव्यूहे विहितरचनाविशेषे गूर्जरसैन्ये प्रदेशम् अरचयत् । प्रति-भटपरासनेन आत्मसैन्यस्य अवकाशं चकारेत्यर्थः । तथा निजां यशोलक्ष्मीं समारचयत् । कीदृशः । वञ्चयत्सु विप्रतारकेषु वञ्चकैः । अतिच्छलयुद्धकुशलैरित्यर्थः । तैः सह समरे सति जयश्रिया

१ B निल्लुंठिअ. २ C पायक्के°. ३ CD add सन्. ४ B निल्लुंडिअ. ५ D °पाल स कु°.

उग्गहिअ-जय-पइन्नो अवहिअ-वूहम्मि गुज्जर-दलम्मि ।
विडविड्डीअ पएसं तक्कालं रइअ-रोमञ्चो ॥ ५९ ॥
सारविए रण-छेत्ते उवहत्थिअ-आउहेहिं जुज्झन्तो ।
केलाइआउहो सो निअं समारीअ जस-लच्छिं ॥ ६० ॥
पहु-कज्ज-समारचणेण[1] सिञ्चिओ तुह[2] बलेण बाणेहिं ।
सीभर-सिम्पिअ-वसुहो मय-सेअणओ इभो तस्स ॥ ६१ ॥

अवञ्चितः । अवञ्चयितृभिः अवञ्चनाशीलैः पदातिभिः न वञ्चितः न विप्रलब्धः । छलयुद्धे प्रकटयुद्धे च अस्यैव जयोभूदित्यर्थः ॥

५९. रचितजयप्रतिज्ञः कृतपरबलभङ्गाङ्गीकारः । तत्कालं युद्धावसरे रचितरोमाञ्चः विहितपुलकः ॥

६०. रणक्षेत्रे समारचिते काष्ठकण्टकपाषाणाद्यपनयनेन समीकृते[3] समारचितायुधैः उत्तेजितास्त्रैः सह समारचितायुधो युध्यमानः संप्रहरन् ॥

जूरवणेहि । उमच्छन्तेसुं । अवञ्चिओ । अवेहविरेहिं । वेलविओ । "वञ्चेर्वेहव-वेलव-जूरवोमच्छाः" [९३] ॥

उग्गहिअ । अवहिअ । विडविड्डीअ । रइअ । "रचेरुग्गहावह-विडविड्डाः" [९४] ॥

६१. हे महाराज प्रभुकार्यसमारचनेन[3] स्वामिकार्यविधायकेन तव बलेन बाणैः कृत्वा तस्य कुङ्कणाधीशस्य शीकरैर्नासाग्रमुक्तपृषत्कैः सिक्ता वसुधा येन स तथा मदेन सप्तस्थानक्षरन्मदजलेन सेचकः भूतलस्य उक्षकः इभः सिक्तः । प्रोत इति भावः ॥

सारविए । उवहत्थिअ । केलाइअ । समारीअ । समारचणेण[3] । "समारचेरुवहत्य-सारव-समार-केलायाः" [९५] ॥

सिञ्चिओ । सिम्पिअ । सेअणओ । "सिचेः सिञ्च-सिम्पौ" [९६] ॥

---

१ BC समाचरणेण. २ BD add सति. ३ BC समाचरणेण.

पडिसुहडे पुच्छन्ता गज्जन्ता ढिक्कमाण-वसह व्व ।
अह बुक्किआ तुह भडा कुङ्कण-देसाहिवं दट्ठुं ॥ ६२ ॥
अग्घिअ-वम्मा छज्जिअ-सिरक्कया मण्डलग्ग-सहिअ-करा ।
रेहिअ-सेन्ना रीरिअ-रणङ्गणा राइआ ते अ ॥ ६३ ॥
आउड्डिअ-रह-चक्कं खुप्पन्त-हयं णिउड्डमाणेभं ।
बुड्डन्त-भडं करि-रुहिर-मज्जणे ताण आसि रणं । ६४ ॥

६२. गर्जद्वृषभा इव सदर्पनिनदद्भवेन्द्रा यथा गर्जन्तो निनादं कुर्वाणाः सन्तः प्रतिसुभटान् पृच्छन्तः अथ हस्तिनि शरवर्षानन्तरं तव भटाः कुङ्कणदेशाधिपं दृष्ट्वा अयमसाविहास्त इति विज्ञाय गर्जिताः हतोयं जितमस्माभिरित्यादि सदर्पं निनदिताः ॥

पुच्छन्ता । " प्रच्छः पुच्छः " [९७] ॥
गज्जन्ता । बुक्किआ । " गर्जेर्बुक्कः " [९८] ॥
ढिक्कमाण । " वृषेर्[४] ढिक्कः " [९९] ॥

६३. राजितवर्माणः प्रदीप्तसंनाहा राजितशिरस्काः शोभितशिरस्त्राणा मण्डलाग्रराजितकराः खड्गविभ्राजितहस्ता राजितं सैन्यं यैस्ते तथा राजितरणाङ्गणास्ते तव भटा राजितोश्च[५] ॥

अग्घिअ । छज्जिअ । सहिअ । रेहिअ । रीरिअ । राइआ । " राजेरग्घ-छज-सह-रीर-रेहाः " [१००] ॥

६४. मज्ज्यते अस्मिन् इति मज्जनं करिरुधिरं च तद्[६] मज्जनं च तस्मिन् । यावति करिरुधिरे मज्ज्यते तावतीत्यर्थः । करिणां रुधिराणि तेषु मज्जने बुडने सति वा । मग्नरथचक्रं बुडितरथपादं मज्जद्धयं मज्जदिभं मज्जद्भटं रणं तेषां गूर्जरकुङ्कणभटानाम् आसीत् जातम् ॥

---

१ C चुक्किआ. २ C सरिक्क°. ३ C चुक्किआ. ४ So BC and A too, though the vrtti appears to consider वृषेः as the reading. ५ D राजिताश्च कामिताश्च. ६ B om. तद् मज्जनं च.

आरोलिअ-सर-माला-वमालणो मल्लिअज्जुणो राया।
पुञ्जिअ-पहु-लज्जिर-गुज्जरेहि जीहाविओ तेहि ॥ ६५ ॥
ओसुक्कन्तो तेअण-गिराहि सो खत्त-धम्म-लुहण-भडे।
उग्घुसिअ-सेल्ल रोसाणिआसिणो के वि सिक्खविही ॥६६॥
लुञ्छन्ता घम्म-जलं कज्जल-पुञ्छिअ-मुह व्व तेण भडा।
पर-तेअ पुंसणेणं फुसिअ-जसा हक्किआ के वि ॥ ६७ ॥

आउड्डिअ। खुप्पन्त। णिउड्डुमाण। बुड्डन्त। मज्जणे। " मस्जेराउड्डु-णिउड्डु-बुड्डु-खुप्पाः " [१०१]॥

६५. पुञ्जिता राशीकृता याः शरमालास्तासां पुञ्जको विस्तारकः मल्लिकार्जुनो राजा पुञ्जिता भयवशात् पिण्डीभूता अत एव प्रभोः स्वस्वामिनो लज्जितारः कथं वयम् एवंविधा मुखं दर्शयिष्याम इति लज्जनशीला ये गूर्जरास्तैः लज्जितः कथम् एतैर्भृत्यमात्रैर्युध्ये इति लज्जमानः तैस्तथाभूतैर्लज्जितो लज्जां प्रापितः ॥

आरोलिअ। वमालणो। पुञ्जिअ। " पुञ्जेरारोल-वमालौ " [१०२]॥

लज्जिर। जीहाविओ। " लस्जेर्जीहः " [१०३]॥

६६. तेजन्यः अमर्षजनिका या गिरः उक्तयस्ताभिः रे रे क्षत्रिया मा पलायध्वम् इत्यादिवाग्भिः। संस्कृते सनम् अन्तरेण गुप्तिजादीनाम् अप्रयोग इति ओसुक्कन्तो इत्यस्य धात्वन्तरेण अर्थः कथ्यते। दीपयन्। यन्मते सनम् अन्तरेणापि प्रयोगस्तन्मते तेजमान इत्यपि भवति। स मल्लिकार्जुननृपो मृष्टाः उत्तेजिताः। सेल्लेति देश्यः। कुन्ता यैस्ते तथा। ते च मृष्टासयश्च ते तथा तान् क्षत्रधर्ममार्जनभटान् क्षत्रियाचारनिर्मलीकारकसुभटान् कानपि अशिक्षयत् शस्त्रैरताडयत् ॥

ओसुक्कन्तो। तेअण। " तिजेरोसुक्कः " [१०४]॥

६७. घर्मजलं स्वेदोदबिन्दून् मृजन्तः वस्त्रादिना उत्पुंसयन्तः।

---

१ BC om. °णिउड्डु°, though they give the example णिउड्डुमाण. २ BC भटावशात्. ३ B om. पुञ्जिअ.

पहु-नामापुसंणो धम्माहुलणो वेरि-नाम-मज्जणओ ।
तं मूरीअ गइन्दं गुज्जर-लोओ अवेमइओ ॥ ६८ ॥
खुडिअ-सुहडो सूरिअ-तुरंगमो विरिअ-बाण-पसरो य ।
मुसुमूरिअ-सिरताणो करञ्जिओ कुङ्कुणाहिवई ॥ ६९ ॥
पविरञ्जिआतवत्तो नीरञ्जिअ-विजय-वेजयन्तीओ ।
सो लूण-सीस-कमलो कओ तुहाभञ्जिअ-भडेहि ॥ ७० ॥

जेष्यत्यधुनास्मान् असाविति विच्छायवदनत्वाद् उत्प्रेक्ष्यन्ते । कज्जल-मृष्टमुखा इव अञ्जनलिप्तानना इव । मृष्टयशसः अपासितकीर्तयो भटाः परतेजोमार्जनेन शत्रुप्रतापविध्वंसकेन तेन मल्लिकार्जुननृपेण निषिद्धाः अग्रतो विचरन्तः सिंहनादेन निरस्ताः ॥

६८. प्रभुनाम्नः अमार्जनः तादृश्यपि संग्रामे संमुखीनत्वाद् अनुत्पुंसकः । प्रकटीकारक इत्यर्थः । धर्मामार्जनः क्षत्रधर्मानपासकः । वैरिनाममार्जकः वैरिविनाशेन तन्नाम्नोपि ध्वंसकः । अभग्नो गूर्जरलोकः अस्मद्बलवीरजनः तं प्राग्व्यावर्णितस्वरूपं गजेन्द्रं मल्लिकार्जुननृपहस्तिनम् अभाङ्क्षीत् शस्त्रैरभैत्सीत् ॥

लुहण । उग्घुसिअ । रोसाणिअ । लुञ्छन्ता । पुञ्छिअ । पुंसणेणं । फुसिअ । अपुसणो । अहुलणो । मज्जणओ । " मृजेरुग्घुस-लुञ्छ-पुञ्छ-पुंस-फुस-पुस-लुह-हुल-रोसाणाः " [१०५] ॥

६९. भग्नसुभटः रणाङ्गणनष्टपदातिवर्गो भग्नतुरंगः ध्वस्तहयो भग्नबाणप्रसरः खण्डितशरप्रपञ्चो भग्नशिरस्त्राणः लूनशिरस्कश्च कुङ्कुणाधिपतिर्भग्नः शस्त्रैर्भिन्नः ॥

७०. भग्नातपत्रः छिन्नच्छत्रो भग्नविजयवैजयन्तीकः छिन्नविजयसूवार्तोर्ध्वीकृतपताकः स मल्लिकार्जुननृपः लूनशीर्षकमलः तव

---

१ BC °पुसुणो though they have °पुसणो in the commentary.
२ B मुसमू°. ३ BD °सूचार्थो; C °सूवार्तो°.

नय-पडिअग्गिर अणुवच्चिओ[1] सि दाहिण-दिसाइ तुममिण्हि ।
विढविअ-कुङ्कुण-सत्तङ्ग-संपओ अज्जिअ-जसोह ॥ ७१ ॥
पहु सिरि-नयर-सिरीए जुज्जसि जुप्पसि तिलङ्ग-लच्छीए ।
जुञ्जसि कञ्चि-सिरीए भुञ्जन्तो दाहिणिं इण्हि ॥ ७२ ॥
सिन्धु-वई तुह चमढण-वेलिल्लो तुमइ दिन्न-चङ्कणओ ।
न जिमइ दिवसे जेमइ निसाइ पच्छिम-दिसाइ तह ॥७३॥

अभग्नभटैः महासंग्रामविमर्देपि अपराङ्मुखैर्वीरैः कृतः विहितः । व्यापादित इत्यर्थः ॥

मूरीअ । अवेमइओ । सूडिअ । सूरिअ । विरिअ । मुसुमूरिअ[2] । करञ्जिओ । पविरञ्जिअ । नीरञ्जिअ । अभञ्जिअ । " भञ्जेर्वेमय-मुसुमूर-मूर-सूर-सूड-विर-पविरञ्ज-करञ्ज-नीरञ्जाः " [१०६] ॥

७१. हे नयानुव्रजितः नीत्यनुगमनशील अर्जिता आत्मसात्कृता कुङ्कुणानां सप्ताङ्गसंपत् स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलरूपलक्ष्मीर्येन स तथा । अत एव अर्जितयशओघ, असि त्वं दक्षिणदिशा अनुव्रजितः अनुगतः । दक्षिणदिक्स्वामी संवृत्त इत्यर्थः ॥

पडिअग्गिर । अणुवच्चिओ[3] । " अनुव्रजेः पडिअग्गः " [१०७] ॥

विढविअ । अजिअ । " अर्जेर्विढवः " [१०८] ॥

७२. हे प्रभो कुमारपालनृप दक्षिणाम् अवाचीं दिशम् इदानीं भुञ्जानः उपभोगयन् श्रीनगरश्रिया युनक्षि युक्तो वर्तसे । तिलङ्गलक्ष्म्या युनक्षि । काञ्चीश्रिया च युनक्षि । दक्षिणदिग्विजयात् तदन्तर्वर्तिदेशस्वामित्वम् आप्नोसीति भावः ॥

जुज्जसि । जुप्पसि । जुञ्जसि । " युजो जुञ्ज-जुज-जुप्पाः " [१०९] ॥

७३. तथा तव भोजनस्य वेला विद्यते यस्य स भोजनवेलावान् ।

---

१ B °वञ्जिओ २ So BC; A has मुसमू°. ३ B om. this example.

तम्बोलं न समाणइ कम्मण-काले वि नण्हए जवणो ।
विसए अ नोवभुञ्जइ भएण तुह वसुह-कम्मवण ॥ ७४ ॥
मणि-गढिअ-कणय-घडिआहरणे उव्वेसरो वर-तुरङ्गे ।
संगलिअ लक्ख-सङ्घे पेसइ तुह रिउ-असंघडिओ ॥७५ ॥
हरिस-मुरिआणणो सो महि-मण्डण कासि-रीडणो राया ।
टिविडिकइ तुह वारं हय-चिञ्चिअ-हत्थि-चिञ्चइअं ॥ ७६॥

भवतो वेलाधर इत्यर्थः । त्वया दत्तभोजनः जीवत्वसौ वराक इत्यनुकम्पया वितीर्णग्रासमात्रजनकैदेशः पश्चिमदिशः सिन्धुपतिः प्रतीचीदिक्संबन्धिस्वामी दिवसे न भुङ्क्ते[3] निशायां भुङ्क्ते । स्वाम्यसाक्षात्कारे[4] वेलाधरा रात्रौ भुञ्जत इति स्थितिः ॥

७४. हे वसुधोपभोजक पृथ्वीपालक तव भयेन हेतुना जवनः जवनदेशाधीशः ताम्बूलं न भुङ्क्ते । भोजनकालेपि न भुङ्क्ते । विषयांश्च शब्दादीन् देशान् वा नोपभुङ्क्ते । सर्वं ताम्बूलास्वादनादि मुक्त्वा केवलत्वदाराधनोपायान् अधीत इत्यर्थः ॥

भुञ्जन्तो । चमढण । चड्डणओ । जिमइ । जेमइ । समाणइ । कम्मण । अण्हए । " भुजो भुञ्ज-जिम-जेम-कम्माण्ह-समाण-चमढ-चड्डाः" [११०] ॥

उवभुञ्जइ । कम्मवण । " वोपेन कम्मवः " [१११] ॥

७५. रिपुभिः असंघटितः भवद्विपक्षैःपृथग्भूतः सन् उव्वेसरैःवरः[5] मणिघटितकैनकघटिताभरणानि संघट्य मेलयित्वा लक्षसंख्यान् । प्रभूतान् इत्यर्थः । वरतुरंगमांश्च तव प्रेषयति भवन्निमित्तम् उपढौकयति ॥

गढिअ । घडिअ । " घटेर्गढः " [११२] ॥

संगलिअ । असंघडिओ । " समो गलः " [११३] ॥

७६. हे महीमण्डन धरित्रीभूषक हर्षेण प्रसन्नो मयि महाराज

१ C उच्चेसरो. २ B om. °क°. ३ B om. from भुंक्ते to रात्रौ. ४ C °त्कारे वेला°. ५ C °विपक्षे. ६ C उच्चैश्वरः. ७ B °घट्टित°.

चिञ्चिल्लिओ अखुट्टिअ-भत्तीइ तुमम्मि मगह-देस-निवो ।
उक्खुडिअ-पुव्व-गव्वो अतुट्टिअं पाहुडं देइ ॥ ७७ ॥
अखुडिअ-गमणमतोडिअ-मदमतुडिअ-लक्खणं महेभ-कुलं ।
अणिलुक्कन्त सिणेहो गउडो पेसीअ तुज्झ कए ॥ ७८ ॥
लुक्किअ-जसमुल्लूरिअ-पयावमुल्लुकिअ-मेइणिं काही ।
घोलन्ती तुह सेणा भय-घुलिअं कन्नउज्जेसं ॥ ७९ ॥

इति प्रमोदेन स्फुटिताननः विकसितमुखः काशेर्मण्डनः शोभाजनकः । वाराणसीस्वामीत्यर्थः । स सर्वप्रसिद्धः तव हयैर्मण्डितं शोभितं तत्तथा तच्च तद्धस्तिमण्डितं च तत्तथाभूतं द्वारं मण्डयति । मध्यम् आविशन् प्रत्यहं दौवारिकेण निषिद्धः प्रायः सिंहद्वारमेव अलंकरोतीत्यर्थः ॥

मुरिअ । " हासेन स्फुटेर्मुरः " [११४] ॥

७७. त्वयि अतुडितभक्त्या अखण्डितबहुमानेन मण्डितो भूषितः तुडितपूर्वगर्वः गलितप्राच्याभिमानो मगधदेशनृपः अतुडितं निरन्तरं प्राभृतं रत्नादिढौकनं ददाति तुभ्यं प्रयच्छति ॥

मण्डण । रीडणो । टिविडिक्क । चिञ्चिअ । चिञ्चइअं । चिञ्चिल्लिओ । " मण्डेश्चिञ्च-चिञ्चअ-चिञ्चिल्ल-रीड-टिविडिकाः " [११५] ॥

७८. अतुडितस्नेहः अनपगतप्रीतिः गौडः गौडदेशाधिपतिस्तव कृते अतुडितगमनम् अखण्डितपादन्यासम् अतुडितमदं निरन्तरा-निवृत्तदानप्रवाहम् अतुडितलक्षणं संपूर्णलक्षणोपेतं महेभकुलं प्रैषीत् प्राहिणोत् ॥

७९. हे नृप तव सेना घूर्णमाना चलन्ती सती तुडितयशसं विगलितकीर्तिं तुडितप्रतापं गततेजसं तुडितमेदिनीकं भग्नावनिम् ।

तुज्झ पहल्लिर-सिविरे घुम्माविअ-ढंसमाण-कुम्माम्मि ।
दिट्ठे वि दसण्ण-वई विवट्टमाणो भए मरही ॥ ८० ॥
अणकढिअ-दुद्ध-सुइ-जस पयाव-धम्मट्ठिआरि-जस-कुसुम ।
तुह गण्ठिअ-वूहेणं विरोलिओ तस्स पुर-जलही ॥ ८१ ॥

बाहुलकाद् अत्र कप्रत्ययाभावः । भयघूर्णितं साध्वसचकितं कन्यकुब्जेशम् अकार्षीत् ॥

अखुट्टिअ । उक्खुडिअ । अतुट्टिअं । अखुडिअ । अतोडिअ । अतुडिअ । अणिलुक्कन्त । लुक्किअ । उल्लूरिअ । उल्लुक्किअ । " तुडेस्तोड-तुट्ट-खुट्ट-खुडोक्खुडोल्लुक-णिलुक-लुक्कोल्लूराः " [११६] ॥

८०. हे भूपते तव घूर्णितश्चलितो विवर्तमानः धराधस्तिष्ठन् कूर्मो येन स तथा तस्मिन् घूर्णयितृ विचरणशीलं यच्छिबिरं स्कन्धावारस्तस्मिन् दृष्टेपि । आस्तां युध्यमाने । दशार्णपतिः भये विवर्तमानः सन् अम्रियत प्राणान् अमुचत् ॥

घोलन्ती । घुलिअं । पहल्लिर । घुम्माविअ । "घूर्णो घुल-घोल-घुम्म-पहल्लाः" [११७] ॥

ढंसमाण । विवट्टमाणो । " विवृतेर्ढंसः " [११८] ॥

८१. हे अकथितदुग्धशुचियशः अग्न्यनावर्तितक्षीरनिर्मलकीर्ते प्रतापघर्मकथितारियशःकुसुम तेजस्तापग्लापितरिपुकीर्तिपुष्प तव ग्रथितव्यूहेन दृब्धेन सेनानिवेशेन कर्त्रा तस्य दशार्णपतेः पुरमेव अतिविस्तीर्णत्वात् जलधिः मथितः रत्नाश्वगजादिलिप्सया विलोडितः । तन्नगरं विलुण्टितम् इत्यर्थः ॥

अणकढिअ । अट्ठिअ । " कथेरट्ठः " [११९] ॥

गण्ठिअ । " ग्रन्थो गण्ठः " [१२०] ॥

---

१ D लुण्टितम् .

मन्थिअ-दहिणो तुप्पं व घुसलिआ तस्स नयरओ कणयं ।
गिण्हन्तेहिं तुह सेणिएहिं अवअच्छिआ अम्हे ॥ ८२ ॥
तस्स चमूवा समरे णुमज्जिआ तुह भडेहि णिव्वरिआ ।
णिज्झोडणेहि णिल्लूरणा वि अणलूरिअ-पयावा ॥ ८३ ॥
छिन्दिअ-छत्त-दुहाविअ-सिरेक्क-णिच्छल्लिउत्तमङ्गाण ।
उद्दालिआ दसण्णाण सिरी चोलुक्क-सुहडेहिं ॥ ८४ ॥

८२. हे धराधीश मथितदध्नः तुप्प इति देश्यत्वाद् नवनीतं तदिव तस्य दशार्णपतेः मथिताद् नगरात् कनकं तव सैनिकैस्तैः प्रसिद्धैर्गृह्यद्भिः आददानैर्वयं ह्रादिता हर्षिताः ॥

विरोलिओ । मन्थिअ । घुसलिआ । " मन्थेर्घुसल-विरोलौ " [१२१] ॥

अवअच्छिआ । " ह्रादेरवअच्छः " [१२२] ॥

८३. हे महाराज तस्य दशार्णपतेः छेदनाः शस्त्रैः प्रतिभटानां विदारकाः अत एव अच्छिन्नप्रतापा अखण्डिततेजसोपि । चमूपाः सैनिकास्तव छेदनैर्विदारकैर्भटैश्छिन्नाः सन्तः समरे निषण्णाः स्थिताः । मृता इत्यर्थः । ये छेदना अच्छिन्नप्रतापाश्च ते कथं छिन्ना इति विरोधाभासः अपिशब्दार्थः ॥

णुमज्जिआ । " नेः सदो मज्जः " [१२३] ॥

८४. छिन्नानि विदारितानि च्छत्राणि येषां ते च छिन्नाः शिरस्का येषां ते च छिन्नानि उत्तमाङ्गानि येषां ते च तथा । तेषां दशार्णानां दशार्णदेशक्षत्रियाणां श्रीः सप्राङ्गसंपत् चौलुक्यसुभटैः आच्छिन्ना गृहीता ॥

णिव्वरिआ । णिज्झोडणेहि । णिल्लूरणा । अणलूरिअ । छिन्दिअ । दुहाविअ । णिच्छल्लिअ । " छिदेर्दुहाव-णिच्छल्ल-णिज्झोड-णिव्वर-णिल्लूर-लूराः " [१२४] ॥

---

१ C सिण्णिएहिं. २ BCD णिच्छो°. ३ BC छंदिअ°. ४ BCD °सिरि°. ५ BC घुसलिअं. ६ BCD अवअच्छइ.

तिहुअण-जस-ओअन्दण-रिउ-अच्छेदण-चमूइ पहु तुज्झ ।
मलिऊण बलं तिउरीसरस्स परिहट्टिओ माणो ॥ ८५ ॥
चड्डिअ-नक्का मड्डिअ-महा-तडा खड्डिआखिलारामा ।
पन्नाडिअ-द्रह-पङ्का तुज्झ चमूए कया रेवा ॥ ८६ ॥
पय-मढिअ-पंसु-मसिणे चुलुचुलैमाणाणिलेण कय-फन्दे ।
रेवा-तड-लय-गहणे निव्वलिओ तुह बल-निवेसो ॥ ८७ ॥

८५. हे प्रभो तव । त्रिभुवनयशस आच्छेदना शत्रुभ्यो हठाद् ग्राहिका अत एव रिपूणाम् आच्छेदना ध्वंसिका या चमूः सेना तया त्रिपुरीश्वरस्य चेदिनगरीशस्य बलं सैन्यं मृदित्वा मानो मृदितः भग्नः ॥

उद्दालिआ । ओअन्दण । अच्छेदण । "आङा ओअन्दोद्दालौ" [१२५]॥

८६. मृदितनक्रा पिष्टजलचरजीवविशेषा मृदितमहातटा विदारित-बृहत्कूला मृदिताखिलारामा भग्नानेकोद्याना मृदितह्रदपङ्का विलोडितान्त-स्थितनदकर्दमा रेवा नर्मदा तव चम्वा कृता ॥

८७. पादाभ्यां मृदितो यः पांसुस्तद्वद् मसृणे कोमले स्पन्दमाना-निलेन किंचिद्वहद्वातेन कृत्वा कृतस्पन्दे विहितमनाक्कम्पे रेवातट-लतागहने तव बलनिवेशः स्कन्धावारो निष्पन्नः संजातः ॥

मलिऊण । परिहट्टिओ । चड्डिअ । मड्डिअ । खड्डिअ । पन्नाडिअ । मढिअ । "मृदो मल-मढ-परिहट्ट-खड्ड-चड्ड-मड्ड-पन्नाडाः" [१२६] ॥

चुलुचुलैमाण । फन्दे । "स्पन्देश्चुलुचुलः" [१२७] ॥

---

१ BCदलं. २ BC चुलुचुलु°. ३C °वारोपि. ४ B खडिअ. ५B चुलुचुलु°; C चुलुचलु°.

नीपाइअ-जयं-कज्जं अविअट्टिअ-विक्कमं बलं तुज्झ ।
अविलोट्टिअ-जय-महुराहिवस्स फंसावेही विजयं ॥ ८८ ॥
अविसंवाइ-परिक्खा तणु-पक्खोडण-झडन्त-पंसु-कणा ।
णीहरिअ-नक्क-चक्कं तुह तुरया जँउणंमुत्तिन्ना ॥ ८९ ॥
रिउ-अक्कन्दावणयं अखिज्जमाणं-हयमजूरिएभकुलं ।
अविसूरन्त-चमूवं पत्तं महुराइ तुह सेन्नं ॥ ९० ॥

८८. निष्पादितजयकार्यं प्रसाधितप्रत्यर्थिभङ्गप्रयोजनम् । अविसंवदितः समरसंमर्देपि निर्व्यूढो विक्रमः शौर्यं यस्य तत् तथा [तव] बलम् । अविसंवदितः अतिपराक्रमित्वाद् निश्चितो जयो यस्य स तथा । स चासौ मथुराधिपश्च तस्य विजयं विसमवादयत् । त्वत्सैन्यं तं जिगायेत्यर्थः ॥

निव्वलिओ । नीपाइअ । " निरः पदेर्वलः " [१२८] ॥

८९. हे नृप तव अविसंवादिनी अविघटनशीला परीक्षा एते शस्त्रैर्भिन्ना अपि सुभटान् रणाङ्गणे न पातयन्तीति विचारो येषां ते तथा । तनुशदनेन वपुर्धूननेन शीयमानाः पतन्तः पांसुकणा येभ्यस्ते तथा तुरगाः । आक्रन्दितम् उपरिष्टात् तुरगगमनेन सकरुणं शब्दितं नक्राणां चक्रं समूहो यस्यां सा तथा यमुनां कालिन्दीम् उत्तीर्णाः परं पारं प्राप्ताः ॥

अविअट्टिअ । अविलोट्टिअ । फंसावेही । अविसंवाइ । " विसंवदेर्विअट्ट-विलोट्टफंसाः " [१२९] ॥

पक्खोडण । झडन्त । " शदो झड-पक्खोडौ " [१३०] ॥

९०. हे क्षोणीपते तव रिपूणाम् आक्रन्दनकम् आक्रन्दविधायकम्

---

१ BD °जइ°. २ BC फंसाविही. ३ BC जउण°. ४ B अखिज्जमाहय-मजूरि; C अखिज्जमणेहयमजूरि°; it would be admissible to read अखिज्जमाणहयजूरि° (= अखिज्जमाणहय + अजूरि°.) ५ C निव्यूढो. ६ B मधुरा°. ७ BCD फंसाविही.

उत्थङ्घिअ-वारेहिं रुन्धिअ-मग्गेहि हक्कमाणेहिं ।
कुज्झन्तेहिं तुह सेणिएहिं जूराविआ रिउणो ॥ ९१ ॥
तुह जायन्त-पवेसे सिन्ने जम्मन्त-परिहवो तत्तो ।
ताडिअ-भओ महुरेसो न तङ्खवीआजि-संरम्भं ॥ ९२ ॥
तङ्घिअ-कणय-चएणं विरङ्घिअं थिप्पिऊण तुह सेन्नं ।
महुरेसो तणिअ-दिही रक्खीअ निअं पुरिं महुरं ॥ ९३ ॥

अखिद्यमानहयम् अखिन्नेभकुलम् अखिद्यमानचमूपं सैन्यं मथुरायां प्राप्तम् । सुखसुखेन तत् तस्यां गतम् इत्यर्थः ॥

णीहरिअ । अक्कन्दावणयं । " आक्रन्देर्णीहरः । [१३१] ॥

अखिज्जमाण । अजूरिए । अविसूरन्त । " खिदेर्जूर-विसूरौ " [१३२]॥

९१. हे नरेन्द्र तव रुद्धद्वारैः वेष्टितप्रतोल्यादिनगरमुखैः अत एव रुद्धमार्गैः निषिद्धवर्त्मभिः । निवारितलोकप्रचारैरित्यर्थः । निषेधद्भिः प्रतिभटान् निवारयद्भिः कुध्यद्भिः सकोपैः सैनिकै रिपवः क्रोधिताः क्रोधं प्रापिताः ॥

उत्थङ्घिअ । रुन्धिअ । " रुधेरुत्थङ्घः " [१३३] ॥

हक्कमाणेहिं । " निषेधेर्हक्कः " [१३४] ॥

कुज्झन्तेहिं । जूराविआ । " क्रुधेर्जूरः [१३५] ॥

९२. हे महीपाल तव जायमानप्रवेशे सैन्ये सति ततः सैन्यात् जायमानपरिभवः अल्पसैनिकत्वाद् उत्पद्यमानतिरस्कारः । अत एव ततभयः प्रभूतसाध्वसः मथुरेशः आजिसंरम्भं समराटोपं नातनिष्ट न चकार ॥

जायन्त । जम्मन्त । " जनो जा-जम्मौ " [१३६] ॥

९३. तर्हि किं चकारेत्याह । हे नरेन्द्र ततकनकचयेन कृत्वा

---

१ BD आक्रंदेणीहरः. २ B om. this example. ३ BC जूराविअ. B मधु°.

सग्गल्लिअन्त-जस-भर जङ्गल-वइणोवसप्पिउं दिण्णा ।
तुह रिउ-झङ्खावण-घण-पयाव-संतप्पिएण गया ॥ ९४ ॥
जस-ओअग्गिअ-तिहुअण तेण कया भत्ति-वाविअ-मणेण ।
असमाणिअ-गुण वइरं समाविउं तुज्झ विन्नत्ती ॥ ९५ ॥

ततं[1] तव सैन्यं तृप्त्वा संतोष्य मथुरेशस्ततधृतिः विहितचित्तसौख्यः सन् निजां पुरीं मथुराम् अरक्षत् ॥

तडिअ । तडुविअ । तडुिअ । विरल्लिअं । तणिअ । " तनेस्तड–तडु-तडुव-विरल्लाः " [१३७] ॥

थिप्पिऊण । " तृपस्थिप्पः " [१३८] ॥

९४. हे स्वर्गोपसर्पद्यशोभर त्रिदिवोल्लसत्कीर्तिनिकर उपसर्पितुं त्वाम् आश्रयितुं जङ्गलपतिना सपादलक्षाधिपेन रिपूणां संतापको यो घन-प्रतापः प्राज्यं त्वदाज्ञानङ्गीकारेण विरोधंकं यत् तेजस्तेन संतप्तेन सता तव गजा दत्ताः ॥

अल्लिअन्त । उवसप्पिउं । " उपसर्पेरल्लिअः " [१३९]

झङ्खावण । संतप्पिएण । " संतपेर्झङ्खः " [१४०] ॥

९५. हे यशोव्याप्तत्रिभुवन असमाप्ताः अनिष्ठिताः । असंख्याता इत्यर्थः । गुणा यस्य स तथा तस्य संबोधनम् । तव वैरं समाप्य त्वदाज्ञाङ्गीकारेण विरोधं निष्ठां नीत्वा वैरं समाप्तुं निष्ठां नेतुं वा भक्ति-व्याप्तमनसा तेन जङ्गलपतिना विज्ञप्तिः कृता ॥

ओअग्गिअ । वाविअ । " व्याप्तेरोअग्गः " [१४१] ॥

असमाणिअ । समाविउं । " समापेः समाणः " [१४२] ॥

---

१ BCD तं for ततं. २ B मधु°. ३ BCD om. °न°. ४ BC विरोधं. ५ So emended from संतपे झंखः of B, and संतपे डंखः of C; A संतापेर्झंखः; See Pischel, foot-note *ad loc.*

तइ पेल्लिओ तुरुक्को ढिल्ली-नाहो गलत्थिओ तह य ।
अड्डक्खिओ अ कासी रिउ-घत्तण छुह महाएसं ॥ ९६ ॥
सोल्लिज्जइ जह लुद्धो तह मं णोल्लेसु रिउ-हुलण-कज्जे ।
कं कं परीसि न तुमं किणा वि खिविआ न तुज्झाणा ॥९७॥
गुलगुञ्छिऊण हत्थं उत्थङ्किअ तज्जणिं भणामि इमं ।
हक्खुविअं तुमए चिअ मह दुग्गं वेरि-उक्खिवण ॥ ९८ ॥

९६. एकादशभिर्गाथाभिर्विज्ञप्तिकामेवाह । हे रिपुक्षेपण वैरिनिरासक त्वया तुरुष्को म्लेच्छाधिपतिः क्षिप्तः । तथा ढिल्लीनाथः योगिनीपुरेश्वरश्च क्षिप्तः । काशिः वाराणसीशश्च क्षिप्तः । यः कश्चिद् आत्ममानी नृपः स सर्वस्त्वया तिरस्कृत इत्यर्थः । मम जङ्गलपतेरादेशं क्षिप विसृज । मम निरोपं ददस्वेत्यर्थः ॥

९७. हे क्षोणीपते यथा लुब्धः स्वसेवकः क्षिप्यते सर्वस्मिन् कार्ये नियुज्यते तथा रिपुक्षेपणकार्ये स्वशत्रुतिरस्कारप्रयोजने मां क्षिप नियुङ्क्ष्व । तथा कं कं त्वं न क्षिपसि । अपि तु सर्वमपि शत्रुवर्गं निरस्यसि । अत एव केनापि तवाज्ञा न क्षिप्ता । सर्वोपि त्वन्निरोपपरः संवृत्त इत्यर्थः ॥

पेल्लिओ । गलत्थिओ । अड्डक्खिओ । घत्तण । छुह । सोल्लिज्जइ । णोल्लेसु । हुलण । परीसि । खिविआ । " क्षिपेर्गलत्थाड्डक्ख-सोल्ल-पेल्ल-णोल्ल-छुह-हुल-परी-घत्ताः " [१४३] ॥

९८. हे वैर्युत्क्षेपण अरातिनिरासक त्वयैव मम दुर्गं कोट्टः उत्क्षिप्तम् उत्पाटितम् । नान्योस्य संमुखमपि निरीक्षितुं क्षम इत्यर्थः । इदम् एतत् हस्तम् उत्क्षिप्य ऊर्ध्वीकृत्य तर्जनीं प्रदेशिन्यङ्गुरीं च उत्क्षिप्य भणामि सकलभूपालमण्डलीप्रत्यक्षं प्रतिपादयामि ॥

---

१ B ढि°. २ B°लुणु°. ३ BD गुलु°.

अल्लत्थिअ-विजय-धजा उब्भुत्तिअ-गुरु करा तुहं करिणो ।
उस्सिक्कन्ति गिरिं पि हु रिउ-णीरवं कं न अक्खिवसि ॥९९॥
कमवसइ जुण्ण-कोलो लुट्टइ सेसो सुअन्ति दिक्करिणो ।
कुम्मो वि लिसइ अणवेविरम्मि तइ पहु मही-धरणे ॥१००॥
आयम्बमाण-हिअया आयज्झन्तीउ विलविरा रण्णे ।
झङ्खन्त-सिग्गु तुह रिउ-वहूउ दइए वडवडन्ति ॥ १०१ ॥

९९. रिपून् आक्षिपति तिरस्करोति । "कर्मणोऽण्" [हे० ५.१] इत्यणि रिप्वाक्षेपस्तत्संबोधनम् । तव उत्क्षिप्तविजयध्वजाः ऊर्ध्वीकृत-विजयवैजयन्तीकाः । उत्क्षिप्तगुरुकराः उल्लालितबृहच्छुण्डादण्डाः करिणः । हु इति संभावयामि । गिरिमपि उत्क्षिपन्ति उत्पाटयन्ति । अतस्त्वं कं नाक्षिपसि । यस्य तव एवंविधा दन्तिनः स त्वं सर्वमपि विजयसे इत्यर्थः ॥

गुलेंगुच्छिऊण । उत्थङ्घिअ । हक्खुविअं । उक्खिवण । अल्लत्थिअ । उब्भुत्तिअ । उस्सिक्कन्ति । "उत्क्षिपेर्गुलगुच्छोत्थङ्घाल्लत्थोब्भुत्तोस्सिक्क हक्खुवाः" [१४४] ॥

णीरव । अक्खिवसि । "आक्षिपेर्णीरवः" [१४५] ॥

१००. हे प्रभो अवेपितरि अकम्प्रे निश्चले महीधरणे पृथ्वीप्राग्भार-धारके त्वयि सति जीर्णकोलः आद्यवराहः स्वपिति । शेषः फणिपतिः स्वपिति । दिक्करिणो दिग्गजाः स्वपन्ति । कूर्मः कमठः स्वपिति । एतत्कार्यस्य भवता करणाद् एते निश्चिन्ताः संवृत्ता इत्यर्थः ॥

कमवसइ । लोट्टइ । सुअन्ति । लिसइ । "स्वपेः कमवस-लिस-लोट्टाः" [१४६] ॥

१०१. हे नरेन्द्र तव वेपमानहृदयाः साध्वसवशात् कम्पमानमानसाः ।

---

१ BCD अब्भु°. २ B°णीवर. ३ B लसइ. ४ B गुलु°. ५ BC अब्भु.

मय-लिम्पिअ-वसुहा तुह न णडन्ति गया विरन्ति न य तुरया
अणगुप्पन्त-परक्कम अवहावसु को तुह दुइज्जो ॥ १०२ ॥
संदुमइ घरं संधुक्कइ पुरमब्भुत्तए तहोज्जाणं ।
तुज्झ पयावग्गि-पलीविआण सव्वं पि तेअविअं ॥ १०३ ॥

वेपमानाः कायेपि वेपथुभृतः । विलपिष्यो विलपनशीलाः । विलपच्छिशवो रुदद्बालका रिपुवध्वः अरण्ये दयिते विलपन्ति । हा नाथा युष्मान् विना कथं वयं प्राणान् धरिष्याम इति दयितविषयान् विलापान् कुर्वन्तीत्यर्थः ॥

अणवेविरम्मि । आयम्बमाण । आयज्झन्तीउ । "वेपेरायम्बायज्झौ" [१४७]॥

विलविरा । झङ्खन्त । वडवडन्ति । "विलपेर्झङ्ख-वडवडौ" [१४८]॥

१०२. हे अगुप्यत्पराक्रम स्थिरशौण्डीर्य तव मदलिप्तवसुधाः दानसिक्तभूमयो गजा न गुप्यन्ति प्रधानत्वाद् रणसंमर्देपि न व्याकुलीभवन्ति । तुरगाश्च न गुप्यन्ति अतः क्रपस्व । मयि प्रसीदेत्यर्थः । यस्मात् कस्तव द्वितीयः । न कश्चित् तव प्रतिपक्षभूतोस्तीति भावः ॥

लिम्पिअ । "लिपो लिम्पः" [१४९]
णडन्ति । विरन्ति । अणगुप्यन्त । "गुप्येर्विर-णडौ" [१५०]
अवहावसु । "क्रपोऽवहो णिः" [१५१]

१०३. हे महीश तव प्रतापाग्निना प्रदीप्तानां प्रज्वलितानां गृहं प्रदीप्यते तथा पुरं प्रदीप्यते तथा उद्यानं प्रदीप्यते । किं बहुना । सर्वमपि प्रदीप्तम् । त्वच्छत्रूणां चन्दनविलेपनचन्द्रिकाद्यपि संतापहेतुः संवृत्तम् इत्यर्थः ॥

---

१ B °रायम्बावज्झो; C °रायम्बायब्भो. २ C डंखंत. ३ C °र्डेख°. ४ B °शौडीर्य. ५ B om. तथा पुरं प्रदीप्यते. ६ C तच्छ°.

जइ संभावसि सग्गे लुब्भसि अह वा आहिन्द-लोगम्मि ।
खउरइ इन्दो पडुहइ वासुगी ता खु अक्खोह ॥ १०४ ॥
आरभिअ मए भत्तिं आढविअं पहु तुमम्मि दासत्तं ।
आरम्भिअं खु निव्वाहिस्सं कत्तो उवालम्भो ॥ १०५ ॥
पच्चारन्ति न गरुआ झङ्खण-जोग्गे वि मारिसम्मि जणे ।
जइ कह वि अभत्तो हं वेलवणिज्जो तुह अहं ता ॥ १०६ ॥

संदुमइ । संधुक्कइ । अब्भुत्तए । पलीविआण । तेअविअं । " प्रदीपे-स्तेअव-संदुम-संधुक्काब्भुत्ताः " [१५२] ॥

१०४. हे अक्षोभ निःप्रकम्प यदि त्वं स्वर्गे स्वर्गनिमित्तं लुभ्यसि गार्ध्यं करोषि । अथवा अहीन्द्रलोके नागलोकनिमित्तं लुभ्यसि तदा । खु इति संभावयामि । इन्द्रः क्षुभ्यति । वासुकिः शेषः क्षुभ्यति । किमयम् अत्रापि नं स्थातुं दास्यतीत्यसावसौ क्षोभं वहतीत्यर्थः ॥

संभावसि । लुब्भसि । " लुभेः संभावः " [१५३] ॥
खउरइ । पडुहइ । अक्खोह । " क्षुभेः खउर-पडुहौ " [१५४] ॥

१०५. हे प्रभो भक्तिं सेवाम् आरभ्य त्वयि दासत्वम् आरब्धम् । ननु आरब्धमपि नं निर्वाहयिष्यसीत्याह । आरब्धम् अङ्गीकृतं च दास-त्वम् । खु इति निश्चितम् । निर्वाहयिष्यामि । ततः कुत उपालम्भः । न कथमपि एवं मम वचनीयता भविष्यतीति भावः ॥

आरभिअ । आढविअं । आरम्भिअं । " आङो रभे रम्भ-ढवौ " [१५५]

१०६. किंच हे नराधिप गुरुका युष्मत्सदृशा महीयांसः उपालम्भ-

---

१ C तो. २ B न । स्था°; CD नः स्था°. ३ C om. न.

इअ विन्नत्ति सोउं राया जम्भायन्त-जणम्मि निसीहे ।
लच्छि-विअम्भिअ-णिसुढिर-सयणे णिव्वाओ लोअण-वीसामे ॥

योग्येपि निर्भर्त्सनार्हेपि मादृशे जने नोपालम्भन्ते न विरूपकं प्रतिपादयन्ति । परं यद्यहं तव कथमपि अभक्तः अवज्ञापरस्तदा उपालम्भनीयः शिक्षणीयः ॥

उवालम्भो । पचारन्ति । झङ्खण । वेलवणिजो । " उपालम्भेर्झङ्ख-पचार-वेलवाः " [१५६] ॥

१०७. इति पूर्वोक्तप्रकारेण विज्ञप्तिं सांधिविग्रहिकोक्तविज्ञपनं श्रुत्वा निशम्य जृम्भमाणः निद्रातुकामत्वात् जृम्भां गृह्णन् जनो यत्र तस्मिन् निशीथे अर्धरात्रे लक्ष्म्या विजृम्भितं यत्र तत्तथा । महार्घमित्यर्थः । तच्च तन्नम्रं च निम्नमध्यं यच्छयनं शय्या तस्मिन् राजा कुमारपालभूपो लोचनयोर्विश्रामे खेदापनोदनिमित्तं विश्रान्तः । सुष्वापेत्यर्थः । पादाकुलकं छन्दः ॥

जम्भायन्त । " अवेर्जृम्भो जम्भा " [१५७] ॥ अवेरिति किम् । विअम्भिअ ।

णिसुढिर । " भाराक्रान्ते नमेर्णिसुढः " [१५८] ॥

णिव्वाओ । वीसामे । " विश्रमेर्णिव्वा " [१५९] ॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रयमहाकाव्यवृत्तौ षष्ठः सर्गः समाप्तः ॥

---

१ C °विअंभणिअ°. २ BC °वीसामो. ३ BC °लं.° ४ BC शिष्य° • ५ C निद्रानुकारिमत्वात्. ६ C °र्थ°; D महर्घ्य.

सप्तमः सर्गः ।

ओहाविअ-सयल-बलो उत्थारिअ-अन्तरङ्ग-रिउ-वग्गो ।
थुंन्दिअ-करणो राया निद्दन्ते चिन्तमिअ काही ॥ १ ॥
अक्कमिआ विसएहिं टिरिटिल्लिन्ता पुरन्धि-सेवाए ।
ही दुण्दुल्लन्ति भवे चक्कम्मविआ कुकम्मेहिं ॥ २ ॥

१. अथ प्रबोधकाले परमश्रावकसमुचितां स्त्रीविरक्तव्यासक्तगुण-दोषस्त्रीजुगुप्सास्थूलभद्रादिमहर्षिजिनवचनतदुक्तानुष्ठाननिरतप्रशंसापञ्च-परमेष्ठिस्तवश्रुतदेवताप्रभावव्यावर्णनरूपां चिन्तामेव चतुरशीत्या गाथा-भिराह । आक्रान्तानि स्वबलेन पराभूतानि सकलबलानि समस्तप्रत्य-र्थिपार्थिवसैन्यानि येन स तथा । आक्रान्तान्तरङ्गरिपुवर्गः विजितमद-मानमनोभवसंमदक्रोधलोभरूपान्तरारातिसमूहः । आक्रान्तकरणः वशी-कृतेन्द्रियो राजा कुमारपालभूपो निद्रान्ते स्वापविरामे इति वक्ष्यमाणां चिन्ताम् अकार्षीत् ॥

२. कथंकथं चिन्ताम् अकरोद् इत्याह । विषयैः शब्दरूपरसगन्ध-स्पर्शैराक्रान्ताः वशीकृताः पुरंध्रीसेवया सीमन्तिनीसंभोगेन हेतुना भ्राम्यन्तः पर्यटन्तः कुकर्मभिः ज्ञानावरणीयादिभिर्भ्रमिताः भ्रमं प्रापिता जीवाः । हीति खेदे । भवे चातुर्गतिकसंसारे भ्रमन्ति विचरन्ति ॥

ओहाविअ । उत्थारिअ । थुंन्दिअ । अक्कमिआ । " आक्रमेरोहावोत्थार-त्थुंन्दाः " [१६०] ॥

---

१ BC छिंदि°. २ C °तिल्लिंता. ३ BC छुंदिअ. ४ BC °च्छंदाः or °त्थंदाः.

काम-गह-भमडिएहिं भमाडिओ भम्मडेइ को न भवे ।
गय-काम-झण्टणो पुण तलअण्टइ सिद्ध-भूमीसु ॥ ३ ॥
ढण्ढल्लिअ-भुमयं भुमिअ-धणू जग-झम्पणो गुमिअ-आणो ।
जं न फुमावइ मयणो अफुसिअ-बुद्धी खु सो धन्नो ॥ ४ ॥
ढुमइ पुरे ढुसइ वणे परइ थलीसुं परीइ जल-मज्झे ।
अभमिअ-चित्तो इत्थीहि णीइ धन्नो पसम-रज्जं ॥ ५ ॥

३. कामग्रहेण भ्रान्तैः भ्रान्तिम् आप्तैर्नीलपटादिदर्शनिकैः कृत्वा भ्रान्तः मोहम् उपगतः को भवे न भ्राम्यति अपि तु तादृशः प्राणी सर्वोपि संसारे सरतीत्यर्थः । गतं कामभ्रमणं मन्मथमोहो यस्य स तथाविधः पुनः सिद्धभूमिषु सिद्धक्षेत्रेषु भ्रमति गच्छति ॥

४. भ्रान्तभ्रु चलितनेत्रोर्ध्वरोमपद्धति यथा भवति एवं भ्रमितं विश्ववशीकरणाय चलितं धनुर्येन स तथा । अत एव जगद्भ्रमणः भुवनभ्रान्तिकारको भ्रमिताश्चश्च सर्वत्र विलसितशासनो मदनो यं कमपि पुरुषं न भ्रमयति न चालयति सः अभ्रमितबुद्धिः निश्चलमतिः खु निश्चितं धन्यः प्रशस्यः ॥

५. स्त्रीभिरभ्रान्तचित्तः अमूढमनाः सन् पुरे भ्राम्यति वने भ्राम्यति स्थलीषु भ्राम्यति जलमध्ये च भ्राम्यति । शीलप्रभावाद् न क्वापि देवतादिकृतं स्खलितं संपद्यत इत्यर्थः । किं बहुना । सकलानर्थहेतुस्त्री-व्यावृत्तमनस्त्वाद् वनं परमपदं लब्ध्वा धन्यः प्रशमराज्यं गच्छति । निरुपमसुखहेतूपशमैकतानः संपद्यत इति भावः ॥

टिरिटिल्लन्ता । ढुण्ढुल्लन्ति । चक्कम्मविआ । भमडिएहिं । भमाडिओ । भम्मडेइ । झण्टणो । तलअण्टइ । ढण्ढल्लिअ । भुमिअ । झम्पणो । गुमिअ । फुमावइ ।

---

१ B तण°; C तणअंतइ; D तणअंटइ. २ C अच्छीहि. ३ D संसारे संसर°. ४ B om. स्थलीषु भ्राम्यति.

सो चिअ सोक्खमइच्छइ पसमं उक्कसइ अक्कसइ सग्गं ।
मोक्खं पि हु अणुवज्जइ अईइ न हु जो जुवइ-सङ्गं ॥ ६ ॥
तारुण्णे णिम्माहिए अवज्जसन्तेसु हाणिमक्खेसु ।
ही पच्चडुइ वुड्ढो वि न पसमं काम-पच्छन्दी ॥ ७ ॥
णीणन्ति मित्त-भज्जं रम्भन्ति सुअं वहुं पि पदअन्ति ।
णीलुक्कन्ति च गुरु-गेहिणिं पि काम-वस-परिअलिआ ॥८॥

अफुसिअ । दुमइ । दुसइ । परइ । परीइ । अभमिअ । " भ्रमेष्टिरिटिल-दुण्दुल्ल-ढण्ढल्ल-चक्कम्म-भम्मड-भमड-भमाड–तलअण्ट–झण्ट-झम्प–भुम–गुम-फुम-फुस-दुम-दुस-परी-पराः " [१६१] ॥

६. हु इति निश्चितं यो युवतिसङ्गं न गच्छति । रमणीं न सेवत इत्यर्थः । स एव सौख्यं गच्छति । प्रशमं गच्छति । स्वर्गं गच्छति । किं बहुना । मोक्षं चिदानन्दरूपपरमपदमपि गच्छति ॥

७. तारुण्ये यौवने गते गलिते सति अक्षेषु इन्द्रियेषु च हानिं हासं गच्छसु प्राप्नुवत्सु सत्सु । हीति खेदे । वृद्धोपि जराजर्जरिततनुः पुरुषोपि कामं विषयाभिलाषं गच्छति याति इत्येवंशीलः कामगामी सन् न प्रशमं गच्छति । तादृशोपि कामविह्वलो न परत्र हितम् आचरतीत्यर्थः ॥

८. कामवशगताः मन्मथपारतन्त्र्यप्राप्ता मित्रभार्यां गच्छन्ति । सुतां स्वपुत्रिकां गच्छन्ति । वधूं स्नुषामपि गच्छन्ति । किं बहुना । गुरोः पितृकल्पस्यात्मोपाध्यायस्य गेहिनीं कलत्रमपि गच्छन्ति च । लोकधर्मविरुद्धं तस्यास्तस्याः सीमन्तिन्याः सेवनं कुर्वन्तीत्यर्थः ॥

---

१ B सोक्खं. २ B° चक्कम्मभम्मडतलअंट°, omitting भमड and भमाड; C ° चक्कमभम्मडभमाडतलअंट° omitting भमड. ३ C परहितं. ४ B तस्या for तस्यास्तस्याः.

महिलाण वसे परिअल्लिऊण वोलन्त-हरिअमिह पावा ।
अवसेहन्ति तिरिच्छीउ वि अवहरिउज्जल-विवेआ ॥ ९ ॥
जे णिरिणासिअ-मेरा वम्महवस-गा समं न णिवहन्ति ।
अहिपच्चुईआ[2] नूणं ते मुहिआ कम्म-भूमिम्मि ॥ १० ॥
महिलाण पेम्म-संगयमागच्छन्तीण जो न अब्भिडइ ।
उम्मत्थइ नाण-सिरी तस्सब्भागच्छइ विवेओ ॥ ११ ॥

९. महिलानां वशे गत्वा । तत्परतन्त्रीभूयेत्यर्थः । गच्छद्भीकं भ्रश्यल्लज्जं यथा भवति एवं गतोज्ज्वलविवेकाः नष्टविशदकृत्याकृत्यविचाराः । अत एव पापाः कुत्सितकर्माचरणाद् अधर्माणः इह जगति तिरश्चीः गोगर्दभ्यादिका अपि । आस्ताम् उभयलोकविरुद्धा मानुषीः । गच्छन्ति कामयन्ते ॥

१०. गतमेराः नष्टमर्यादा मन्मथवशगाः स्त्रीसंभोगपरा ये शमं रागाद्यभावं न गच्छन्ति कर्मभूमौ आर्यक्षेत्रे नूनं निःसंदेहं ते मुधा आर्यक्षेत्रोत्पत्त्येकसाध्यस्य शमस्य असाधनान्निरर्थकम् आगता उत्पन्नाः॥

णीइ । अइच्छइ । उक्कसइ । अक्कसइ । अणुवज्जइ । अईइ । णिम्महिए । अवज्जसन्तेसु । पच्चुइ । पच्छन्दी । णीणन्ति । रम्भन्ति । पदअन्ति । णीलुक्कन्ति । परिअलिआ । परिअल्लिऊण । वोलन्त । अवसेहन्ति । अवहरिउ । णिरिणासिअ । णिवहन्ति । " गमेरई-अइच्छाणुवज्जावज्जसोक्कसाक्कस-पच्चु-पच्छन्द-णिम्मह-णी-णीण-णीलुक्क-पदअ-रम्भ-परिअल्ल-वोल-परिअल-णिरिणास-णिवहावसेहावहराः " [१६२] ॥

११. प्रेम्णा संगतं सप्रेम यथा भवति एवम् आगच्छन्तीनां रन्तुं

---

१ B °विवेय. २ B °पचुइआ. ३ C आर्या. ४ B °वज्जसोक्कुसाक्कस°; C °वज्जसोक्कुसाक्कुसु; A °वज्जसोक्कुसपच्चड° omitting two letters. In the text and the examples both B and C have उक्कसइ and अक्कसइ.

न भवे पच्चागच्छइ अपलोट्टिअ-माणसो जुवइ-सङ्गे ।
पडिसाय-मणो परिसामिएहिं कहिओवसम-मग्गो ॥ १२ ॥
संखुड्डण-कुसलाणं उब्भावन्तीण के वि रमणीण ।
किलेकिंचिअ-मोट्टाइअ-कोट्टमिएहिं न खेड्डन्ति ॥ १३ ॥

ढौकमानानां महिलानां यो न संगच्छते न संयुक्तो भवति । महिलासु न रज्यतीत्यर्थः । तस्य ज्ञानश्रीः अभ्यागच्छति संमुखम् आढौकते । विवेकश्च अभ्यागच्छति । सकलसमीहितपदविज्ञानप्रेक्षापूर्वकारिता-पात्रम् असौ संजायत इत्यर्थः ॥

अहिपच्चुइआ । आगच्छन्तीण । " आङा अहिपच्चुअः " [१६३] ॥

संगय । अब्भिडइ । " समा अब्भिडः " [१६४] "

उम्मत्थइ । अब्भागच्छइ । " अभ्याङोम्मत्थः " [१६५] ॥

१२. युवतिसङ्गे अप्रत्यागतमानसः प्रतिनिवृत्तचित्तः शान्तमनाः कषायानुपप्लुतस्वान्तः शान्तैः शमयुक्तैश्च कथितोपशममार्गः उपदिष्ट-प्रशमवर्त्मा न भवे प्रत्यागच्छति । रागद्वेषाद्यनर्थहेतुवामाभिष्वङ्ग-निवृत्तत्वाज्जरामरणविषयपरमपदम् आसादयतीत्यर्थः ॥

पच्चागच्छइ । अपलोट्टिअ । " प्रत्याङा पलोट्टः " [१६६] ॥

पडिसाय । परिसामिएहिं । उवसम । शमेः पडिसा-परिसामौ "[१६७]।

१३. रमणकुशलानां सुरतक्रीडानिपुणानां रममाणानां भोगिभिः सह क्रीडन्तीनां रमणीनाम् " निर्विशेषं न सामान्यम् " इति रमिः क्रीडामात्रेप्युक्तो विशेषक्रीडने वर्तते । अतो रतरतैरिति । कोर्थः । किले-किंचितमोट्टायितकुट्टमितैः कृत्वा केपि नीरागाः केचन महा-

---

१ BC किलि°. २ C कोड°. ३ BD °प्रद°. ४ D विषयं परम°. ५ BC किलि°.

रममाणीओ रामा णीसरणिज्जं अवेल्लणिज्जं च ।
अग्घविअ-वम्महाओ को अग्घाडइ सिणेहेण ॥ १४ ॥
मायाइ उद्धुमाया अहिरेमिअ-तुच्छयाइ अङ्कुमिआ ।
चवलत्तं-पूरिआओ को तुवरइ दट्ठुमित्थीओ ॥ १५ ॥

त्मानो न रमन्ते । नानाकामचेष्टाविशिष्टास्ता न सेवन्त इत्यर्थः । तत्र स्मितहसितरुदितभयरोषगर्वदुःखश्रमाभिलाषसंकरः किलिकिंचितम् । प्रियकथादौ तद्भावभावनोत्था चेष्टा मोट्टायितम् । अधरादिग्रहाद् दुःखेपि हर्षः कुट्टमितम् । संस्कृतैरेव किलिकिंचितादिशब्दैः किलिकिंचेत्यादिसिद्धौ रमेरेतदादेशविधानम् अनेकधा शब्दव्युत्पत्तिरिति न्यायप्रदर्शनार्थम् । प्राकृते रमणमात्रेपि च एते प्रयुज्यन्त इति ज्ञापनार्थं वेति ॥

१४. रमयतीति " प्रवचनीयादयः " इति [हे० ५.१] कर्तरि अनीये रमणीयं कमनीयरूपपुरुषम् अरमणीयं जराकुष्ठाद्यभिभूतपुरुषं च रममाणाः सेवमानाः पूर्णमन्मथाः आङ्गिकसात्त्विकविकारकरणविचक्षणत्वाद् अन्यूनमनसिजा रामाः कः स्नेहेन पूरयति । गम्यागम्यविचारविकलासु तासु न कोपि विचक्षणोऽनुरागम् आधत्त इति भावः ॥

संखुड्डुण । उब्भावन्तीण । किलिकिंचिअ । मोट्टाइअ । कोड्डुमिएहिं । खेड्डुन्ति । रममाणीओ । णीसरणिज्जं । अवेल्लणिज्जं । " रमे संखुड्ड-खेड्डोब्भाव-किलकिंच-कोड्डुम-मोट्टाय-णीसर-वेल्लाः " [१६८] ॥

१५. मायया पूर्णा भृताः । पूर्णतुच्छतया समग्रागाम्भीर्येण पूर्णाः । चपलत्वपूर्णाः अस्थैर्यव्याप्ताः स्त्रीर्द्रष्टुं कस्त्वरते । न कोपि विद्वान् सस्पृहम् अवलोकितुम् उद्यच्छत इत्यर्थः ॥

---

१ BC अहरे°. २ BC किलि°. ३ BC °कुट्टि°.

तूरन्ति अतूरन्तं पि हु जअडावन्ति तुरिअ-मयणाओ।
अहह हलिद्दी-राया खिरन्त-सेएहिं अङ्गेहिं ॥ १६ ॥
पच्चडमाण-सरीरा झरन्त-खाल व्व पज्झरिअ-रमणा।
धीरा अणिड्डुअन्ते वि णिच्चलावेइ ही महिला ॥ १७ ॥

अग्घविअ। अग्घाडइ। उड्डुमाया। अहिरेमिअ[1]। अङ्गुमिआ। पूरिआओ।
"पूरेरग्घाडोग्घवोड्डुमाङ्गुमाहिरेमाः" [१६९][2] ॥

१६. त्वरितमदनाः उल्लसितमनोभवा हरिद्रावद् रागो यासां तास्तथा। अस्थिरप्रेमानुबन्धाः। अहहेति खेदे। तादृश्योपि कष्टं क्षरत्स्वेदैः सात्त्विकविकारवशात् स्विन्नैरङ्गैः कृत्वा त्वरन्ते स्वयं भोगिसंभोगाय उत्सहन्ते। अत्वरमाणं संभोगानुद्यतं[3] पुमांसं त्वरयन्ति तथाविधविलासकरणेन प्रेरयन्ति ॥

तुवरइ। जअडावन्ति। "त्वरस्तुवर-जअडौ" [१७०] ॥

तूरन्ति। अतूरन्तं। "त्यादिशत्रोस्तूरः" [१७१] ॥

तुरिअ। "तुरोऽत्यादौ" [१७२] ॥

१७. क्षरच्छरीरा निर्गच्छत्स्वेदोदबिन्दुप्रवाहतनुः। क्षरत् वहद् यत्। खालेति देश्यः। अशुचिजलनिर्गमस्थानम्; तदिव क्षरितं रमणं स्मरकूपिका यस्याः सा तथा। महिला अक्षरतः अनार्द्रहृदयानपि धीरान्। हीति खेदे। क्षारयति आर्द्रहृदयान् करोति। सत्त्वाद्बालयतीति यावत् ॥

खिरन्त। पच्चडमाण। झरन्त। पज्झरिअ। अणिड्डुअन्ते। णिच्चलावेइ।
"क्षरः खिर-झर-पज्झर-पच्चड-णिच्चल-णिड्डुआः" [१७३] ॥

---

१ BC अहरे°. २ C °डोग्घ°. ३ BC संभोगानुद्यतं. ४ BC °आ.

उत्थल्लिअ-परिफाडिअ-भेगोवम-रमणि-रमण-रमिराण ।
सत्ती विअलइ थिप्पइ कन्ती बुद्धी अ णिट्ठुहइ ॥ १८ ॥
तस्स विसट्टउ हिअयं सयहुत्तं दलउ बुद्धि-कोसल्लं ।
जो लिहइ वलिअ-भत्तं व वम्फि-लालं रमणि-अहरं ॥१९॥

१८. पूर्वम् उच्छलितः परिवृत्तः पश्चात् परिस्फाटितः । विदारितोदरदेश इत्यर्थः । यो भेको मण्डूकस्तेन उपमा सादृश्यं यस्य तत् तथा । एवंविधं यद् रमणीरमणं तद्रन्तारो रमणशीलास्तेषाम् । तादृशवराङ्गसक्तानाम् इत्यर्थः । शक्तिर्बलं विलगति भ्रश्यति । कान्तिर्विगलति बुद्धिश्च विगलति । उपलक्षणमात्रम् एतत् । अन्यदपि कम्पादि स्त्र्यादिसक्तानां संजायते । यदुक्तम् ।

कम्पः स्वेदः श्रमो मूर्छा भ्रमिर्ग्लानिर्बलक्षयः ।
राजयक्ष्मादिरोगाश्च भवेयुर्मैथुनोत्थिताः ॥

उत्थल्लिअ । " उच्छल उत्थल्लः " [१७४] ॥

विअलइ । थिप्पइ । णिट्ठुहइ । " विगलेस् थिप्प-णिट्ठुहौ " [१७५] ॥

१९. वलितभक्तमिव वान्तभोजनमिव । वलिन्यः अधःपतनशीला लाला यत्र तत् तथाविधं रमण्यधरं सुन्दरीदशनच्छदं यो लेढि पिबति । तस्य पुरुषस्य शतकृत्वः शत वारान् हृदयं दलतु भेदम् आप्नोतु । बुद्धिकौशलं च दलतु । तथाविधाकार्यनिरतस्य चैतन्यपाण्डित्यादि विफलम् इत्यर्थः ॥

विसट्टउ । दलउ । वम्फि । वलिअ । " दलि-वल्योर्विसट्ट-वम्फौ "[१७६]॥

---

१ C णिडहइ. २ D तादृशवराङ्गनावराङ्ग°.

अणफुडिअ-इन्दवारण-रम्मा रामा अफिट्ट-कडुअत्ता।
रे हिअय फुट्ट चुक्कसि किं मग्गा ताहि भुल्लविअं ॥ २० ॥
अब्भंसि-दूसिअच्छं अफिडिअ-कहमाणणं महेलाण।
रच्चेइ तत्थ वि मूढो नासिअ-मई णिवहिअ-विवेओ ॥ २१ ॥
सेहइ सीलं पडिसन्ति धी-गुणा संजमो वि अवहरइ।
णिरणासइ सुअमवसेहइ सच्चं जुवइ-सत्ताण ॥ २२ ॥

२०. अभ्रष्टम् अविदीर्णं यद् इन्द्रवारणं विशालाफलं तद्वद् रम्या बहिर्मनोहराः। अभ्रष्टं कर्तुकत्वम् अन्तरमधुरपरिणामो यासां तास्तथा रामाः। तस्मात् हे हृदय भ्रष्ट दुःशीलस्वभाव ताभिर्भ्रंशितं सत् किं मार्गाद् भ्रश्यसि। तथाभूतासु तासु अनुरागम् उत्सृज्य धर्मध्यानैकतानं हे मनो भवेत्यर्थः।

२१. अभ्रष्टदूषिकाक्षम् अनपगतमलनेत्रम् अभ्रष्टकफम् अप्रच्युतश्लेष्म महेलानाम् आननम्। परं तत्रापि तादृशेपि आनने नष्टमतिर्नष्टविवेको मूढो रजति। तदवलोकनचुम्बने रागम् आधत्त इत्यर्थः॥

अणफुडिअ। अफिट्ट। फुट्ट। चुक्कसि। भुल्लविअं। अब्भंसि। अफिडिअ। "भ्रंशेः फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्लाः" [१७७]॥

२२. युवतिसक्तानां स्त्रीलम्पटानां शीलं सदाचारो नश्यति प्रयाति।

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहोर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः॥ इति।

---

१ CD °बहु°. २ C रयइ. ३ C °चीर्ण°. ४ C °डु°. ५ B °ति. ६ BC °चुंबनं. ७ B om. this example. ८ BC om. फुट्ट. ९ B भुल्ला. १० D ऊहोपोहो.

ओवासइ न विवेओ थी-सङ्गे इअ गुरूहि संदिसिअं ।
अप्पाहामो ता तत्त-पिच्छिरो ताउ को निअइ ॥ २३ ॥
जे भावि-पुलंअणा भूअ-देक्खणा वट्टमाण-सच्चवणा ।
तेहि निअच्छिअ भणिअं मा इत्थीओ पुलोएह ॥ २४ ॥

ते नश्यन्ति । संयमः शुभानुष्ठानमपि नश्यति । श्रुतं सिद्धान्तो नश्यति । सत्यं च नश्यति । न किंचिदपि परत्र परित्राणहेतुः शुभं तेषां संभवतीति भावः ॥

नसिअ । णिवहिअ । सेहइ । पडिसन्ति । अवहरइ । णिरणासइ । अवसेहइ । " नशेर्णिरणास-णिवहावसेह-पडिसा-सेहावहराः " [१७८] ॥

२३. स्त्रीसङ्गे योषित्संपर्के विवेकः युक्तायुक्तविचारो नावकाशते नावकाशं लभते इति गुरुभिः अस्मत्पूर्वाचार्यैः संदिष्टम् अस्माकं पुरः प्रतिपादितम् । तस्मात् तत्त्वद्रष्टा विज्ञातपरमार्थः कस्ताः स्त्रीः पश्यतीति वयमपि संदिशामः मुक्त्यर्थिनं प्रतिपादयामः ॥

ओवासइ । " अवात् काशो वासः " [१७९] ॥

संदिसिअं । अप्पाहामो । " संदिशेरप्पाहः " [१८०] ॥

२४. भाविनो भविष्यदर्थस्य दर्शनाः द्रष्टारः । भूतदर्शनाः अतीतार्थवीक्षकाः । वर्तमानदर्शनाः विद्यमानार्थविलोकयितारः त्रिकालवेदिन इत्यर्थः । एतैर्महात्मभिर्दृष्ट्वा सकलाकुशलकारणं स्त्रिय इति विज्ञाय भणितम् । किम् । स्त्रीर्मा पश्यत । यदि स्वस्य क्षेमम् अभिलषेत तदा स्त्रीणां विलोकनमपि मा कुरुतेत्यर्थः ॥

---

१ B पुण°. २ BC दक्खणा. ३ BC °लषत.

अवयच्छन्तो वि जणो नोअक्खइ कामिणिं अवक्खन्तो ।
न गुरुं चजइ नन्नं पासइ जं तीइ पासत्थो ॥ २५ ॥
असरीरिणमवअक्खइ अवआसइ सील-जाइ-रहिअं पि ।
अवयज्झिऊण तं पि हु जो इत्थिं छिवइ तस्स नमो ॥२६॥

२५. कामिनीं पश्यन् सस्पृहं वीक्षमाणो[1] जनः पश्यन्नपि
यकृच्छकृन्मलश्लेष्ममज्जास्थिपरिपूरिताः ।
स्नायुस्यूता बहीरम्याः स्त्रियश्चर्मप्रसेविकाः ॥

इत्यादिकामिनीस्वरूपं जानन्नपि न पश्यति न मनस्यवधारयति । यस्मात् तस्याः कामिन्याः पार्श्वस्थः संभोगाय समीपवर्ती न गुरुं पश्यति । नान्यं मातापित्रादिकं पश्यति । तदेकतानो न गुर्वादिकं गुरुत्वादिना मन्यत इत्यर्थः । यदुक्तम्

न देवान् न गुरून् नापि

इत्यादि ॥

२६. अशरीरिणं गलिताङ्गोपाङ्गं[3] पश्यति सानुरागदृष्ट्या विलोकते[4] । शीलजातिरहितमपि पश्यति । तदपि एवंविधमपि योषिदसच्चेष्टितम् हु इति निःसंदेहम् दृष्ट्वा[5] यः स्त्रियं स्पृशति आलिङ्गति तस्मै नमः । उपहासपरोयं नमस्कारः । तेन निर्विवेकचूडामणेस्तस्य धिक्कारोस्त्वित्यर्थः ॥

पिच्छिरो । निअइ । पुलअणा । दक्खणा । सच्चवणा । निअच्छिअ । पुलोएइ । अवयच्छन्तो । उअक्खइ । अवक्खन्तो । चजइ । पासइ । अवअक्खइ । अवआसइ । अवयज्झिऊण । " दृशो निअच्छ-पेच्छावयच्छावयज्झचज-सच्चव-देक्खोअक्खावक्खावयक्ख-पुलोअ[6]-पुलअ-निआवआस-पासाः " [१८१] ॥

---

१ C अवि°. २ BC °क्ष्य°. ३ C मलि°. ४ B drops from विलोकते to दृष्ट्वा. ५ BC अक्खइ. ६ BC° पुलोपुलअ°.

फासिज्जइ कविकच्छू फंसिज्जइ अहव कुविअ-वग्घी वि ।
फरिसिज्जइ न उणेत्थी धम्म-सरीरं हणइ छिहिआ ॥ २७ ॥
आलिहइ नरमणालुङ्गणिज्जमवि नीअ-रच्चणी नारी ।
मूढाण रिअइ सा वि हु हिअए पविसन्त-कामम्मि ॥२८॥
नारीउ हिअय पम्हुस मा ताओ पम्हुसन्ति पर-लोअं ।
रोश्चन्ति धम्म-बीजं न य रोहइ चड्डिअं तं च ॥ २९ ॥

२७. कपिकच्छूः स्पृश्यते । अथवा कुपिता व्याघ्री अपि स्पृश्यते । शरीरमात्रानर्थकारिण्योरेतयोः स्पर्शो वरम् इत्यर्थः । न पुनः स्त्री स्पृश्यते । यतो धर्मशरीरम् अत्रामुत्र अनेककल्याणप्रदसुकृततनुं स्पृष्टा सती हन्ति विनाशयति ॥

२८. नीचरक्तनी हीनकृतप्रेमानुबन्धा सती नारी अस्पर्शनीयं न्यग्जातीयमपि नरं स्पृशति । परं मूढानाम् प्रविशन् स्थितिम् आसादयन् कामो यत्र तस्मिन् । कामोद्रेकयुक्त इत्यर्थः । हृदये सापि अगम्यगामुकापि प्रविशति पदम् आदधाति । रच्चणीत्यत्र " व्रज-नृत-मदां चैः " [४.२२५] इति बहुवचनाद् रक्तेर्जस्य च्चत्वम् ॥

छिवइ । फासिज्जइ । फंसिज्जइ । फरिसिज्जइ । छिहिआ । आलिहइ । अणालुङ्गणिज । " स्पृशः फास-फंस-फरिस-छिव-छिहालुङ्गालिहाः " [१८२]। रिअइ । पविसन्त । " प्राविशे रिअः " [१८३] ॥

२९. रे हृदय स्वान्त नारीर्मा स्पृश मा स्प्रष्टुम् अभिलष । यतस्ता नार्यः परलोकं प्रमुष्णन्ति । स्पर्शमात्रेण परभवहितं पुंसां निघ्नन्तीत्यर्थः। तथा ता धर्मबीजं पिंषन्ति चूर्णयन्ति । तच्च धर्मबीजं पिष्टं सत् न प्ररोहति । न स्वर्गापवर्गफलदायि भवतीत्यर्थः ॥

पम्हुस । पम्हुसन्ति । " प्रान्मृश-मुषोर्म्हुसः " [१८४] ॥

---

१ B पा°. २ BC पं°. ३ C उण°. ४ BC रोच°. ५ C श्लिष्टा; D स्पृष्टा श्लिष्टा. ६ C °रजनी. ७ B चः; C वः. ८ BC चत्वम्. ९ B °म्ह°.

णिरिणासिअ-मेरं [1]णिरिणज्जिअ-हिरिअं च णिवहिअ-गुणं च।
पीसिअ-सीलं नारिं भुक्किर-सुणइं व को सिहइ ॥ ३० ॥
विलेयाहि [2]असाअड्ढिअं-[3]हिअओ अणकड्ढिओ [4]अ विसएहिं।
अज्झिअ-निव्वाण-सिरी सो धन्नो थूलभद्द-मुणी ॥ ३१ ॥
कामेण करिसिअ-सरेणावि अणाइञ्छिओ अणच्छेइ।
मह मणमयञ्छिरेहिं गुणेहिं सिरि-थूलभद्द-मुणी ॥ ३२ ॥

३०. पिष्टमेरां ध्वस्तमर्यादां पिष्टह्रीकां परास्तलज्जां च। पिष्टा गुणा गाम्भीर्यादयो यया सा तथा ताम्। पिष्टशीलां विदारितसदाचारां च नारीं भषित्री भषणशीला यां शुनकी कुक्कुरी तामिव कः काङ्क्षति। न कोपे विवेकी तदङ्गसङ्गम् अभिलषतीति भावः॥

रोञ्चन्ति। चड्डिअं। णिरिणासिअ। णिरिणज्जिअ। णिवहिअ। पीसिअ। "पिषोर्णिवह-णिरिणास-णिरिणज-रोञ्च-चड्डाः" [१८५]॥

भुक्किर। "भषेर्भुक्कः" [१८६]॥

३१. वनिताभिरकृष्टहृदयः अनावर्जितचित्तः। विषयैश्च शब्दादिभिरकृष्टः। तद्वशं न गत इति यावत्। कृष्टनिर्वाणश्रीः समीपीकृतमोक्षलक्ष्मीः स तथाविधाहारनिवासवेश्यासंप्राप्तावपि मथितमन्मथमानत्वेन प्रसिद्धः स्थूलभद्रमुनिर्धनं धर्मरूपं लब्धो धन्यः॥

३२ कृष्टशरेणापि मनोभेदाय आकर्णानीतेषुणापि कामेन[11] नाकृष्टः न वशीकृतः श्रीस्थूलभद्रमुनिः कर्ष्टृभिः कर्षणशीलैः। आवर्जकैरिति यावत्। गुणैः कृत्वा मम मनः कर्षति आवर्जयति॥

---

१ C सिरि°. २ B वलआ°. ३ B °ट्ठिअ°; C °ठिअ°. ४ C °ट्टि°. ५ B om. या. ६ B कुकारी. ७ BC रोच°. ८ BC अणकृष्ट°. ९ C °नि. १० C °ब्ध्वा. ११ B कामेनाकृष्टः; C कामनाकृष्टः.

अक्खोडिआसि-तिक्खं धन्नो बम्हं चरिंसु वइर-रिसी ।
दुण्दुल्लण-कुसला जस्स तुल्लमज्ज वि गमेसन्ति ॥ ३३ ॥
ढण्ढोलिआगमत्थं घत्तिअ तत्तं गवेसिअप्पाणं ।
एक्को च्चिअ वइर-रिसी परिअन्तिअ-परम-बम्ह-सिरी ॥३४॥
बम्ह-सिरीइ सिलिसिअं तव-सिरि-सामग्गिअं च आजम्मं ।
नाण-सिरीए अवयासिअं च वइरं नमंसामो ॥ ३५ ॥

असाअड्ढिअं[1]। अणकड्ढिओ। अच्चिअ। करिसिअ। अणाइच्छिओ। अणच्छेइ। अयच्छिरेहिं। " कृषेः कड्ढ-साअड्ढा[2]ञ्चाणच्छायच्छाइच्छाः " [१८७] ॥

३३. कोशात् कृष्टासिवत् तीक्ष्णं ब्रह्मचर्यं चरितवान् अनुष्ठितवान् वज्रर्षिर्धन्यः । यस्य तुल्यं गवेषणकुशला अद्यापि गवेषयन्ति गवेषणेन अदर्शनं गम्यते । ततश्च अद्ययावत् तत्सदृशं न पश्यन्तीत्यर्थः । चरिंसु इत्यत्र आर्षत्वात् क्त्वतुः स्थाने इंसुः ॥

अक्खोडिअ । " असावक्खोडः " [१८८] ॥

३४. आगमार्थं गवेषयित्वा निभाल्य तत्त्वम् आगमार्थरहस्यं गवेषयित्वा आत्मानं स्वस्वरूपं च गवेषयित्वा एक एव वज्रर्षिः श्लिष्टपरमब्रह्मश्रीः अङ्गीकृतसर्वोत्कृष्टब्रह्मचर्यलक्ष्मीकः । यथा आबाल्यतो वज्रर्षिः श्रामण्यं प्रपेदे तथा नान्य इत्यर्थः ॥

दुण्दुल्लण । गमेसन्ति । ढण्ढोलिअं[3]। घत्तिअ। गवेसिअ । " गवेषेर्दुण्दुल्ल-ढण्ढोल-गमेस-घत्ताः " [१८९] ॥

३५. आजन्म ब्रह्मश्रिया श्लिष्टं तपःश्रिया श्लिष्टं च ज्ञानश्रिया श्लिष्टं च कर्णाभ्यटनैकादशाङ्गीपाठात्[4] । वज्रं वज्रस्वामिनं नमस्यामः ॥

---

१ C °ड्ढिअ°. २ B °ड्ढा°. ३ BC ढंढोलि. ४ D कर्णाभ्यष्टनिका°.

मक्खन्तं व सुहाए चोप्पडमाणं व चन्दण-रसेण ।
के मुक्खं आहन्ता गयसुकुमालं न वम्फन्ति ॥ ३६ ॥
जो अहिलङ्घइ धम्मं मुक्खं अहिलङ्घए महइ सुक्खं ।
सो वच्चउ सिहणिज्जं सिरि-गोअम-सामिणो मग्गं ॥ ३७ ॥
अविलुम्पिअ-भव-सुक्खो जीव-दयं जम्मओ वि कङ्खन्तो ।
अज्ज वि सामइअ-जसो भवाविहीरो जयइ अभओ ॥ ३८

परिअन्तिअ । सिलिसिअं । सामग्गिअं । अवयासिअं । " श्लिषेः सामग्गावयासपरिअन्ताः " [१९०] ॥

३६. सुधया म्रक्षयन्तम् इव चन्दनरसेन म्रक्षयन्तम् इव स्वचरितावदातेन परमनिर्वृतिजननात् तद्विलेपनं कुर्वन्तम् इव मोक्षं काङ्क्षन्तः के गजसुकुमालं न काङ्क्षन्ति अपि तु सर्वेपि तत्सदृशीभवितुम् अभिलषन्तीत्यर्थः ॥

मक्खन्तं । चोप्पडमाणं । " म्रक्षेश्चोप्पडः " [१९१] ॥

३७. यो धर्मं काङ्क्षति मोक्षं काङ्क्षति सौख्यं च काङ्क्षति स धर्मार्थी पुरुषः काङ्क्षणीयम् आत्मनिस्ताराय भव्यैरभिलषणीयं श्रीगौतमस्वामिनो मार्गं धर्माचारं काङ्क्षतु इच्छतु । अनेनैवं तल्लाभात् ।

३८. न काङ्क्षितं भवसौख्यं येन स यथा । जन्मतोपि जन्मप्रभृत्यपि जीवदयां दीनानाथजन्तुजातप्राणरक्षां काङ्क्षन् अद्यापि सर्वार्थसिद्धिप्राप्तेः पश्चादपि । संप्रत्यपीति यावत् । प्रतीक्षितं जगत्यवस्थितं यशो यस्य स तथा । भवे न प्रतीक्षते भवाप्रतीक्षः[3] संसारोद्विग्न इत्यर्थः । अभयकुमारमुनिर्जयति ॥

आहन्ता । वम्फन्ति । अहिलङ्घइ । अहिलङ्घए । महइ । वच्चउ । सिहणिज्जं । अविलुम्पिअ । कङ्खन्तो । " काङ्क्षेराहाहिलंङ्घाहिलङ्घ-वच्च-वम्फ-मह-सिह-विलुम्पाः " [१९२] ॥

---

१ B अनैव. २ BD अविभवाप्रतीक्ष; C भवने प्रतीक्षते अविभावप्रतीक्ष. ३ BC सिहि. ४ B कांक्षेराहाहिलंघवच्चवस्पुमह°.

विरमालिअ संसारे जेण पडिक्खाविआ समय-सत्था ।
जयइ सुधम्मो तच्छिअ-कम्मो चच्छिअ-कुतित्थि-मओ ।३९।
सिवै-रम्पण-मिच्छा-दिट्ठि-रम्फणो तक्खिऊण अवमग्गे ।
विअसाविअ-सिद्धन्तो भयवं जम्बू-मुणी जयइ ॥ ४० ॥
कोआसिअ-गहिअ-वओ दर-वोसट्टिअ-सरोज-हसिर-मुहो ।
अणंगुज्झाविअ-स-कुलो भयवं पहव-प्पहू जयइ ॥ ४१ ॥

३९. संसारे प्रतीक्ष्य स्थित्वा येन समयशास्त्राणि सिद्धान्तग्रन्थाः । द्वादशाङ्गानीत्यर्थः । प्रतीक्षितानि स्थापितानि । कृतानीत्यर्थः । यत्तदोर्नित्याभिसंबन्धात् सः तष्टानि चूर्णितानि कर्माणि येन स तथा । तष्टकुतीर्थिमदः मृदितकुमताभिमानः सुधर्मा सुधर्मस्वामिगणभृत् जयति । सत्था इत्यत्र " वाक्यर्थवचनाद्याः " [१.३३] इति पुंस्त्वम् ॥

सामइअ । अविहीरो । विरमालिअ । पडिक्खाविआ । " प्रतीक्षेः सामय-विहीर-विरमालाः " [१९३] ॥

४०. शिवस्य तक्षणा विनाशका ये मिथ्यादृष्टयस्तेषां तक्षणो वित्रासकः अपकृष्टा मार्गाः[5] कुमतानि तान् तक्षित्वा उपमृद्य विकाशितसिद्धान्तः प्रकटितागमो भगवान् पूज्यो जम्बूमूनिः जम्बूस्वामिमहर्षिर्जयति ॥

तच्छिअ । चच्छिअ । रम्पण । रम्फणो । तक्खिऊण । " तक्षेस्तच्छ-चच्छ-रम्प-रम्फाः " [१९४] ॥

४१. विकसितो दीप्तः सन् गृहीतव्रतः अङ्गीकृतचारित्रः । विकासितं वा अनेकशिष्यकरणेन विस्तारितं गृहीतं व्रतं येन स तथा । दरम् ईषद् विकसितं स्फुटितं यत् सरोजं तद्वत् हसितृ स्मेरं मुखं

---

१ C विस°. २ BC सिवि°. ३ BC अणु°. ४ CD insert अपामार्गाः (= अपमार्गाः ?) after मार्गाः. ५ B drops the example.

अणडिम्भन्त-ल्हसाविअ-कुतित्थिअं थिरमसंसि जिण-वयणं।
जर-मरण-वोज्झिराणं भव-डरिआणं हरउ तासं ॥ ४२ ॥
सो वज्जइ न भवाओ गुरूहिं साहूहिं णुमिअ-सम्मत्तो ।
णिमिअ-मणो जिण-समए कया वि जो न हु पलोट्टेइ ॥४३॥

यस्य स तथा। अहासितस्वकुलः अलज्जितनिजक्षत्रियवंशस्तादृग्वीरव्रतेन तत्त्वं विज्ञाय प्रव्रज्याङ्गीकारात् भगवान् प्रभवप्रभुः प्रभवसूरिर्जयति ॥

विअसाविअ । कोआसिअ । वोसट्टिअ । " विकसेः-कोआस-वोसट्टौ " [१९५] ॥

हसिर । अणगुज्झाविअ । " हसेर्गुज्झः " [१९६] ॥

४२ अस्रस्ताः स्वमतात्[1] अभ्रष्टाः सन्तः स्रंसिता भ्रंशम् आपिताः कुतीर्थिका येन तत्[2] तथा । स्थिरं ध्रुवं महाविदेहादिक्षेत्रेषु सर्वदा सद्भावात् अतएव अस्रंसि न कथमपि स्रंसते जिनवचनं जरामरणत्रस्तानां भवत्रस्तानां त्रासं भयं हरतु ॥

अणडिम्भन्त । ल्हसाविअ । असंसि । " स्रंसेर्ल्हस-डिम्भौ " [१९७]॥

४३. गुरुभिः धर्माचार्यैः । कैर्गुरुभिः । साधुभिः । न्यस्तसम्यक्त्वः आरोपितसम्यक्त्वः न्यस्तमनाश्च सन् जिनसमये हु निश्चितं यः कदापि न पर्यस्यति[3] न विपरीतो भवति स भवाद् न बिभेति । परमपदप्राप्तिहेतुसम्यक्त्वार्हत्समयनिश्चलमनस्त्वाद् न भीतिं करोतीत्यर्थः ॥

वोज्झिराणं । डरिआणं । तासं । वज्जइ । " त्रसेर्डर-वोज्झ-वज्जाः " [१९८] ॥

णुमिअ । णिमिअ । " न्यसो णिम-णुमौ " [१९९] ॥

---

१ C अणु°. २ B°दा°. ३ B om. तत्. ४ BCD पर्यवस्यति.

पल्हट्टिअ-पावा पल्हत्थिअ-कलिणो अ नीससण-जोग्गे ।
विग्घे वि अझङ्खिरया णिल्हसिअ-जिणागमा हुन्ति ॥४४॥
ऊसलिअ-गुणोसुम्भिअ-संजम-पुलआअमाण-हिअयस्स ।
गुञ्जोल्लिअ-जिण-वयणस्सारोअइ कस्स नो नाणं ॥ ४५ ॥
उल्लसिअ-भिसन्त-सिरी भासिर-नाणेण गसिअ-मिच्छत्तो ।
मोहाधिसिअ-विवेओ जिण-मयमोवाहए धन्नो ॥ ४६ ॥

४४. पर्यस्तपापाः क्षिप्राशुभप्रकृतयः । पर्यस्तकलयश्च परास्तपरस्परविरोधाः । निःश्वसनयोग्येपि दुःखदायित्वात् कदुष्णबाष्पजननार्हेपि विघ्ने अनिःश्वसितारः अनिःश्वसनशीलाः । धीरा इति यावत् । उल्लसितजिनागमाः स्वान्तोद्बुद्धार्हत्समया भवन्ति ॥

पलोट्टेई । पल्लट्टिअ । पल्हत्थिअ । " पर्यसः पलोट्ट-पल्लट्ट-पल्हत्थाः " [२००] ॥

नीससण । अझङ्खिरया । " निःश्वसेर्झङ्खः " [२०१] ॥

४५. उल्लसिता उद्भूता गुणाः क्षान्त्यादयो यस्य स तथा । स चासौ उल्लसितसंयमश्च प्रकटीभूतचारित्रः स तथा । स चासौ उल्लसद्दृदयश्च धर्मोत्साहमानमनाश्च स तथा । तस्य उल्लसितजिन वचनस्य अन्तःपरिस्फुरितार्हत्सिद्धान्तस्य कस्य न ज्ञानम् उल्लसति । अपि तु तादृक्षस्य सर्वस्य सम्यगवबोधः प्रादुर्भवतीति भावः ॥

४६. उल्लसिता प्रादुर्भूता भासमाना दीप्यमाना श्रीः धर्मसाधनसंपद् यस्य स तथा । भास्वरज्ञानेन दीप्रसम्यगवबोधेन ग्रस्तमिथ्यात्वः मथितमिथ्यादर्शनः मोहेन अज्ञानेन अभिग्रस्तः विवेको युक्तकारिता यस्य स तथा । धन्यः पुण्यवान् जिनमतम् अवगाहते परिभावयति ॥

---

१ B °घ°. २ BCD ओहावए. ३ BC पलोट्टिअ. ४ B पल्ल°. ५ B ग्रस्तो.

ओगाहिअ-जिण-वयणो गुण-ठाण-वलग्गिओ चडइ मुक्खं ।
भव-सुह-अणगुम्मडिओ अगुम्मिओ मोहणिज्जेहिं ॥ ४७ ॥
अहिऊलइ कम्म-गणं आलुङ्घइ इन्धणं जहा डहणो ॥
वलणिज्ज-हरण-बुद्धी गिण्हन्तो भयवओ वयणं ॥ ४८ ॥

णिल्लसिअ । ऊसलिअ । ऊसुम्भिअ । पुलआअमाण । गुञ्जोल्लिअ । अरोअइ[1] । उल्लसिअ । उल्लसेरूसलोसुम्भ-णिल्लस-पुलआअ-गुञ्जोल्लारोआः " [२०२] ॥

भिसन्त । भासिर । " भासेर्भिसः " [२०३] ॥

गसिअ । अधिसिअ ॥ " ग्रसेर्धिसः " [२०४] ॥

४७. अवगाहितजिनवचनः परिभावितार्हद्भाषितः गुणस्थानानि मिथ्यात्वादीनि तेषु आरूढः । आद्ये सर्वदावस्थानाद् आरोहो न घटत इति उत्तरोत्तरगुणस्थानेषु कृतावस्थान इत्यर्थः । भवसुखेन अमुग्धः अमोहितो वा । मोहयन्तीति मोहनीयाः स्त्र्यादिविषयास्तैरमोहितः अमूर्छितो मोक्षम् आरोहति[2] अध्यास्ते[3] ॥

ओवाहए । ओगाहिअ । " अवाद्गाहेर्वाहः " [२०५] ॥

वलग्गिओ । चडइ । " आरुहेश्चड-वलग्गौ " [२०६] ॥

अणगुम्मडिओ । अगुम्मिओ । मोहणिज्जेहिं । "मुहेर्गुम्म-गुम्मडौ"[4][२०७]॥

४८. ग्राह्यग्रहणबुद्धिः उपादेयार्थोपादानमतिः अत एव भगवतः अर्हतो वचनं सकलोपादेयमूर्धमुकुटं भगवत्सिद्धान्तं गृह्णन् अङ्गीकुर्वन् । तदुपदिष्टं समाचरन्नित्यर्थः । कर्मगणं ज्ञानावरणादिव्रातं[5] दहति भस्मसात् करोति । विनाशयतीति यावत् । इन्धनं यथा दहनो दहति ॥

---

१ C आरो°. २ C अपरोहिति. ३ B उहावए; C ओहावए. ४ B drops °गुम्म. ५ C °वराणीदि.°

पंङ्गिअ-संजम-भारा निरुवारिअ-पवयणे अणुसरन्ता ॥
अहिपच्चुअन्ति मुत्तिं जोअं घेत्तूण सील-धणा ॥ ४९ ॥
गेण्हिअ वयाइँ घेत्तुं घेत्तव्वं वोत्तुमवि अ वोत्तव्वं ॥
जे उज्जुआ खु ताणं वोत्तूण गुणे कयत्थु म्हि ॥ ५० ॥

अहिऊलइ । आलुङ्घइ । डहणो । " दहेरहिऊलालुङ्घौ " [२०८] ॥

४९. गृहीतसंयमभारान् अङ्गीकृतव्रतभरान् गृहीतप्रवचनान् सूत्रतोर्थतश्च विज्ञातद्वादशाङ्गान् अनुस्मरन्तः । सफलजन्मान एत इति भावनया पूर्वमहर्षीन् ध्यायन्त इत्यर्थः । शीलं चारित्रं धनं येषां ते शीलधना मुनयो योगं परमसमाधिं गृहीत्वा आसाद्य मुक्तिं निर्वृतिं गृह्णन्ति गच्छन्ति ॥

वलणिज्ज । हरण । गिण्हन्तो । पंङ्गिअ । निरुवारिअ । अहिपच्चुअन्ति । " ग्रहो वल-णोल्ह-हर-पंङ्ग-निरुवाराहिपच्चुआः " ॥ [२०९] ॥

५०. व्रतानि गृहीत्वा ग्रहीतव्यम् अर्हत्प्रणीतोपादेयतत्त्वं ग्रहीतुं ज्ञातुं वक्तव्यं सदुपदेशादिप्रतिपाद्यमपि च वक्तुं भणितुं ये खुः निश्चितम् उद्यताः । स्वपरोपकारकरणतत्परा इति यावत् । तेषां गुणान् क्षान्त्यादीन् उक्त्वा कृतार्थः कृतकृत्योस्मि ॥

घेत्तूण । घेत्तुं । घेत्तव्वं । " क्त्वातुमूतव्येषु घेत् " [२१०] ॥ क्वचिन्न भवति । गेण्हिअ ॥

वोत्तुं । वोत्तव्वं । वोत्तूण । " वचो वोत् " [२११] ॥

---

१ BC पिङ्गिअ°. २ B उज्जुवा. ३ B om. अङ्गीकृतव्रतभरान्. ४ BC येषु.

भोत्तूणं भोत्तव्वं भोत्तुं निव्वुइ-सुहाइँ मोत्तु-मणा ।
मोत्तव्वारम्भं मोत्तूण महन्ता तवस्सन्ति ॥ ५१ ॥
सोअ-वसा रोत्तूण वि रोत्तु-मणा विम्हरन्ति रोत्तव्वं ।
दट्ठूण जाण मुत्तिं अरहन्ताणं नमो ताणं ॥ ५२ ॥
जे दट्ठव्वे दट्ठुं इन्दो काहीअ लोअण-सहस्सं ।
दंसण-तत्तिं काउं अरहन्ताणं नमो ताणं ॥ ५३ ॥

५१. भोक्तव्यं शुभाशुभम् अनुभवनीयं भुक्त्वा संवेद्य । निर्वृति-सुखानि भोक्तुं संवेदयितुम् । मोक्तव्यारम्भं हेयव्यापारं मुक्त्वा परित्यज्य । मोक्तुमनसो निर्वैरीतुकामा महान्तः महामुनयस्तपस्यन्ति । बाह्याभ्यन्तरभेदभिन्नं द्वादशविधं तपः कुर्वन्ति ॥

५२. शोकवशात् स्वबन्धुवियोगसमुद्भवदुःखपरतन्त्रत्वाद् रुदित्वापि रोदनं कृत्वापि रोदितुमनसः रोदनपरायणचेतसः प्राणिनः येषां मूर्तिं वपुर्दृष्ट्वा रोदितव्यं विपन्नस्वबान्धवादिकं विस्मरन्ति न स्मृतिपथम् आनयन्ति तेभ्योऽर्हद्भ्यो नमः नमस्कारोस्तु ॥

भोत्तूणं । भोत्तव्वं । भोत्तुं । मोत्तु° । मोत्तव्वा । मोत्तूण । रोत्तूण । रोत्तु° । रोत्तव्वं । " रुद-भुज-मुचां तोन्त्यस्य " [२१२] ॥

५३. यान् द्रष्टव्यान् लोकातीतसौभाग्यादियुक्तत्वाद् वीक्षणीयान् द्रष्टुं दर्शनाय लोचनसहस्रम् इन्द्रः अकरोत् अकार्षीत् चकार वा । दर्शनमपि किमर्थम् इत्याह । दर्शनेन निर्निमेषवीक्षणेन तृप्तिम् आत्मनः संतोषं कर्तुम् । तेभ्योर्हद्भ्यो नमः ॥

दट्ठूण । दट्ठव्वे । दट्ठुं । " दृशस्तेन ट्ठः " [२१३] ॥

काऊणं कायव्वं कम्मं काहिन्ति जे ण पुणरुत्तं ।
जग-बोहमिच्छिराणं अरहन्ताणं नमो ताणं ॥ ५४ ॥
जो अणुगच्छइ जच्छइ [2]छिन्दिउमच्छइ तणुं च तेसिं पि ।
अणभिन्दिअ-भावाणं अरहन्ताणं नमो ताणं ॥ ५५ ॥
सविहे न जाण कुज्झइ जुज्झइ मुज्झइ भवे अगिज्झन्तो ।
देही बुज्झइ सिज्झइ अरहन्ताणं नमो ताणं ॥ ५६ ॥

५४. कर्तव्यं सकलकर्मक्षयं कृत्वा ये पुणरुत्तम् इति भूयोपि न [3]कर्म करिष्यन्ति कर्तारो वा । वीतरागत्वात् [4]न मुक्तिम् अपहाय बुद्धवत् स्वदर्शनतिरस्कारनिवारणाय इह जन्म आसाद्य पुनरपि कर्म भन्त्स्यन्तीत्यर्थः । तेभ्यो जगद्बोधम् एषितृभ्यः अभिलाषुकेभ्योर्हद्भ्यो नमः ॥

काहीअ । काउं । काऊणं । कायव्वं । काहिन्ति । "आ कृगो भूतभविष्यतोश्च" [२१४] ॥

५५ योनुगच्छति भक्त्या पृष्ठलग्नः प्रयाति । तथा यो यच्छति सादरं स्ववस्तु ददाति । यस्तु तनुं छेत्तुम् आस्ते । तेष्वपि अभिन्नभावेभ्यो निर्विशेषमनस्केभ्यस्तेभ्यो जगत्प्रसिद्धेभ्योर्हद्भ्यो नमः ॥

इच्छिराणं । अणुगच्छइ । जच्छइ । [5]अच्छइ । "गमिष्यमासां छः" [२१५] ॥

छिन्दिउं । अणभिन्दिअ । " छिदि-भिदो न्दः " [२१६] ॥

५६. येषां सविधे समीपे भवे अगृध्यन् गार्ध्यम् अगच्छन् । संसारविरक्तो भवन्निति यावत् । देही जन्तुर्न [6]न क्रुध्यति न कोपं

---

१ B दाहिंति. २ B drops छिन्दिउम् अच्छइ. ३ B om. कर्म. ४ C ननु. ५ B om. अच्छइ. ६ B om. न.

रुन्धिअ-करणं रुम्भिअ-पवणं रुज्झिअ-मणं अपडिएहिं ।
झायव्वाण मुणीहिं अरहन्ताणं नमो ताणं ॥ ५७ ॥
सडिअ-रया कढिअ-मला वड्ढिअ-तव-तेअ-वेढिअङ्गा य ।
जाणञ्ज वि वर-मुणिणो अरहन्ताणं नमो ताणं ॥ ५८ ॥

गच्छति । तथा न युध्यते न[1] युद्धं करोति यतो न मुह्यति न मोहम् उपगच्छति । मोहमूलत्वात् क्रोधयुद्धयोः । किंतु बुध्यते[2] अवगततत्त्वो भवति । तथा च सति सिध्यति सिद्धो भवति । तेभ्योर्हद्भ्यो नमः ॥

कुज्झइ । जुज्झइ । मुज्झइ । अगिज्झन्तो । बुज्झइ । सिज्झइ । " युध बुध-गृध-क्रुध-सिध-मुहां ज्झः " [२१७] ॥

५७. रुद्धकरणम् । रुद्धपवनम् । रुद्धमनः कृतेन्द्रियोच्छ्वासनिःश्वासचित्तनिरोधं यथा भवति एवम् अपतितैः ध्यानाद् अस्खलितैर्मुनिभिर्ध्यातव्येभ्यस्तेभ्यः प्रसिद्धेभ्योर्हद्भ्यो नमः ॥

रुन्धिअ । रुम्भिअ । रुज्झिअ । " रुधो न्ध-म्भौ च " [२१८] ॥

५८. सन्नरजसः गलितबध्यमानकर्माणः । कथितमलाः भस्मीकृतबद्धकर्माणः । यतो वृद्धं वृद्धिं गतं यत् तपस्तेजस्तेन वेष्टितं व्याप्तम् अङ्गं येषां ते तथा च वरमुनयः अद्यापि दुष्षमाकालेपि वर्तन्ते येषाम् अर्हताम् । यन्मतसंस्थिता इत्यर्थः । तेभ्योर्हद्भ्यो नमः ॥

अपडिएहिं । सडिअ[3] । " सद-पतोर्डः " [२१९] ॥

कढिअ । वड्ढिअ । " कथ-वर्धो ढः " [२२०] ॥

वेढिअ । " वेष्टः " [२२१] ॥

---

१ BD om. न. २ C °ति. ३ B अडिअ.

दुक्कड-संवेल्लिअओ भव-पासोव्वेढणोज्जओ लोओ ।
उव्वेल्लिज्जइ जेहिं अरहन्ताणं नमो ताणं ॥ ५९ ॥
जे झाउं संपज्जइ अणखिज्जिर-सिज्जिराण सा सिद्धी ।
ते वच्चामो सरणं नच्चिर-मच्चिर-मणा सिद्धे ॥ ६० ॥
आणन्द-रोविराणं जेसु नवन्ताण होइ नोव्वेवो ।
धाइ समुहं च मुत्ती ताण नमो सव्व-सिद्धाणं ॥ ६१ ॥

५९. दुष्कृतेन अशुभकर्मणा संवेष्टितो व्याप्तः । परं भवपाशोद्वेष्टने संसारबन्धनमोक्षणे उद्यतः कृतप्रयत्नो लोको यैरुद्वेष्ट्यते बन्धनमुक्तः क्रियते तेभ्योर्हद्भ्यो नमः ॥ दुक्कड इत्यत्र आर्षत्वात् तस्य डः ॥

संवेल्लिअओ । " समो ल्लः " [२२२] ॥

उव्वेढण । उव्वेल्लिज्जइ । " वोदः " [२२३]॥

६०. यान् ध्यात्वा स्मृत्वा अखेत्तृस्वेत्तृणाम् अखेदनखेदनशीलानाम् खेदस्वेदरहितानाम् इति यावत् । अस्माकं सा सिद्धिः तत् सिद्धत्वं संपद्यते । तान् सिद्धान् नर्तितृ नर्तनशीलम् । भक्तिवशाद् उत्कलिकाकलितम् इत्यर्थः । तथा मदितृ तोषणशीलं मनो येषां ते तथाभूता वयं शरणं व्रजामः ॥ झाउं इत्यत्र सेधनक्रियापेक्षया प्राक्काल्यम् न संपद्यते इत्यपेक्षया । तच्च भाविमेवेति ॥

संपज्जइ । अणखिज्जिर । सिज्जिराण । " स्विदां जः " [२२४] ॥

वच्चामो । नच्चिर । मच्चिर । " व्रज-नृत-मदां चः " [२२५] ॥

६१. यान् आनन्दरोदितृणां हर्षाश्रुमोचनशीलानां सतां नमतां नमस्कुर्वतां न उद्वेगो भवति । किंतु यान् नमतां मुक्तिः संमुखम्

---

१ B भावित्तमे°; C भविति°.

कुपहे धावन्ति अंखादिमं च खादन्ति तेहि वि समं जो ।
धावइ खाइ अ तं पि हु बोहन्ते झामि आयरिए ॥ ६२ ॥
कम्माइँ वोसिरन्ता अतुट्टिरेणं तवेण सकन्ता ।
अफुडिअ-अचलिअ-महिमा आयरिआ दिन्तु ते बोहिं ॥६३॥

अभिमुखं च धावति सत्वरम् आयाति । तेभ्यः सर्वसिद्धेभ्यो नमः ॥ जेसु इति " द्वितीयातृतीययोः सप्तमी " [३.१३५] इति सप्तमी ॥

रोविराणं । नवन्ताण । " रुद-नमोर्वः " [२२६] ॥

उव्वेवो । " उद्विजः " [२२७]

६२. ये कुपथे अमार्गे । अनीताविति यावत् । धावन्ति । तथा ये खाद्यते यत् तत् खादं तस्य भावः खादत्वं न विद्यते खादत्वं यस्य तत् तथा अखाद्यं वस्तु खादन्ति । तैरपि समं यो धावति कुपथे गच्छति खादति अभक्षणीयं भक्षयति च । हु इति निश्चितम् । तमपि तादृशमपि प्राणिनं स्वयम् अधर्मम् अधर्मविप्रलब्धं च । अस्मादृशम् इत्यर्थः । बोधयतो धर्मदेशनया सन्मार्गे प्रवर्तयत आचार्यान् ध्यायामि संस्मरामि ॥

धाइ।खाइ। "खाद-धावोर्डुक्" [२२८] ॥ बहुलाधिकाराद् वर्तमानाभविष्य-द्विध्याद्येकवचन एव । तेनेह न । धावन्ति । अखादिमं । खादन्ति ॥ क्वचिन्न । धावइ ॥

६३. कर्माणि व्युत्सृजन्तः आत्मनो दूरीकुर्वन्तः । ननु अनादि-कालालीनकर्मणां कथं व्युत्सर्ग इत्याह । अत्रोटिनाँ अच्छिदुरेण । संपूर्णेनेति यावत् । तपसा शक्नुवन्तः सामर्थ्यं बिभ्रतः । अस्फुटितः अन्यौजसा अखण्डितः अत एव अचलितः अकम्पितः । स्थिर इत्यर्थः । महिमा माहात्म्यं येषां ते तथा । ते सर्वप्रसिद्धा आचार्या बोधिं जिनधर्मावाप्तिं ददतु प्रयच्छन्तु ॥

---

१ B drops अखादिमं च खादन्ति. २ CD स्वयमधर्मविप्र°. ३ BC अत्रोटिता.

फुट्टिअ-मोहो लोओ चल्लइ अपमिल्लिअ-व्वओ मोक्खे ।
जेहिं अपमीलिअच्छं पेच्छामो ते उवज्झाए ॥ ६४ ॥
अणउम्मिल्लिअ-नाणोम्मीलणआ हरिस-पसविरा लोए ।
सुअ-जलमोज्झाया पवरिसन्तु वित्थरिअ-गुण-भरिआ॥६५॥

वोसिरन्ता । " सृजो रः " [२२९] ॥
अतुट्टिरेणं । सक्कन्ता । " शकादीनां द्वित्वम् " [२३०] ॥

६४. यैः कृत्वा स्फुटितः विदारितो मोहो येन स तथा । अपमीलितव्रतः उद्बुद्धचारित्रः लोको मोक्षे चलति गच्छति । तान् उपाध्यायान् अपमीलिताक्षं निर्निमेषनयनं यथा भवति एवं पश्यामः । उपाध्यायदर्शने वयं सतृष्णा इत्यर्थः ॥

अफुडिअ । अचलिअ । फुट्टिअ । चल्लइ । " स्फुटि-चलेः " [२३१] ॥

६५. अनुन्मीलितम् अनुद्भूतं यज्ज्ञानं तस्य उन्मीलना व्यञ्जकाः । हर्षं प्राणिप्रमोदं प्रसवितारः जननशीलाः । विस्तृताः सर्वत्र प्रसृता ये गुणास्तैर्भृताः निचिता उपाध्याया लोके जनमध्ये श्रुतमेव निर्मलपावित्र्यहेतुत्वात् जलं प्रवर्षन्तु । निर्वृतिफलोत्पत्तये अस्मभ्यं प्रयच्छन्त्वित्यर्थः ॥

अपमिल्लिअ । अपमीलिअ । अणउम्मिल्लिअ । उम्मीलणआ । "प्रादेर्मीलेः" [२३२] ॥
पसविरा । " उवर्णस्यावः " [२३३] ॥
वित्थरिअ । भरिआ । " ऋवर्णस्यारः " [२३४] ॥
पवरिसन्तु । " वृषादीनामरिः " [२३५] ॥

---

१ BC °णओ. २ B om. this and the following example. ३ BC om. this example. ४ C °णओ; B उम्मीलः for उम्मीलणआ. ५ C प्रादेर्मीलः.

नो रूसइ नो तूसइ जेऊण मणं लयम्मि जो नेन्तो ।
मोत्तुं भवं विणीअं तं साहु-जणं नमंसामि ॥ ६६ ॥
उप्पाइअ-सद्दहणो असद्दहाणे वि देइ जो बोहिं ।
संसार-नासिरो हं तं साहुं चिय विहेमि गुरुं ॥ ६७ ॥
पञ्च वि अरहन्ताइं परमेट्ठी झाह झाअह किमन्नं ।
होऊण निव्विकप्पा पसम-रया होअऊण तहा ॥ ६८ ॥

६६. यो भवं मोक्तुं त्यक्तुं मनो जित्वा वशीकृत्य लये साम्यावस्थायां नयन् सन् नो रुष्यति अमित्रे रोषं न करोति । नो तुष्यति मित्रे तोषं न करोति । तं विनीतं जितेन्द्रियं साधुजनं नमस्यामि ॥

रूसइ । तूसइ । " रुषादीनां दीर्घः " [२३६] ॥

जेऊण । नेन्तो । मोत्तुं । " युवर्णस्य गुणः " [२३७] ॥ क्वचिन्न । विणीअं ॥

६७. अश्रद्दधाने जिनप्रणीतजीवादिपदार्थे तथेति प्रत्ययरहितेपि उत्पादितश्रद्दधानः जनितास्तिक्यबुद्धिर्यो बोधिं ददाति । संसाराद् नशिता नशनशीलोहं तमेव साधुं गुरुं विदधामि ॥

सद्दहणो । असद्दहाणे । "स्वराणां स्वराः" [२३७] ॥ क्वचिन्नित्यम् । देइ । नासिरो । विहेमि ॥

रूसइ । तूसइ । " व्यञ्जनाद् अद् अन्ते " [२३९] ॥

६८. भो भव्याः निर्विकल्पाः एते ध्येया न वेति संशयरहिता भूत्वा तथा प्रशमरता उपशमपरा भूत्वा पञ्चापि अर्हदादीन् ध्यायत । किमन्यं

---

१ B om. असद्दहाणे°. २ BC होइऊण. ३ BC put रूसइ । तूसइ । " व्यञ्जनाद् अद् अन्ते " after विणीअं । and before सद्दहणो &c; A, Pischel and the Bombay edition all read खराणां स्वराः । व्यञ्जनाददन्ते ॥

जिणउ कलिं अघ चिणिअं धुणिअ-सिरं सुणिअ-गुण-गणा थुणिआ
इन्देहि वि जग-पुणणी सुअ-देवी सयल-अघ-लुणणी ॥ ६९ ॥
सो हुणइ भप्पे-मज्झे ख-पुप्फमुच्चेइ पङ्कयाइँ थले ।
तह उच्चिणेइ मोत्तुं सुअ-देविं महइ जो अन्नं ॥ ७० ॥

हरिहरादिकं ध्यायत । हरिहरादिध्यानम् अपहाय अर्हद्ध्यानपरा भवतेति भावः ॥

झाह । झाअह । होऊण । होअऊण । "स्वराद् अनतो वा" [२४०] ॥

६९. श्रुतगुणगणा सकलजनश्रवणगोचरप्राप्तवरप्रदानादिगुणनिचया इन्द्रैरपि आस्ताम् अन्यैः धुतशिरो यथेत्येवं स्तुता श्लाघिता जगतः पवनी पावित्र्यजनिका सकलाघस्य लवनी विच्छेदिका श्रुतदेवी अघेन चितं स्फीतं कलिं कलहं जयतु । आश्रितम् अस्मादृशं निर्मत्सरं विद्धात्वित्यर्थः ॥

७०. स पुरुषो भस्ममध्ये जुहोति हवनं करोति । खपुष्पम् उच्चिनोति । तथा पङ्कजानि स्थले उच्चिनोति । यः श्रुतदेवीं मुक्त्वा अन्यां महति पूजयति काङ्क्षति वा । श्रुतदेवीतोन्यासां देवतानाम् आराधनं भस्महुतादिकल्पम् इत्यर्थः ।

जिणउ । चिणिअं । धुणिअ । सुणिअ । थुणिआ । पुणणी । लुणणी । हुणइ । " चि-जि-श्रु-हु-स्तु-द्रु-पू-धूगां णो ह्रस्वश्च " [२४१] ॥ बाहुलकात् क्वचिद् वा । उच्चेइ उच्चिणेइ ॥

---

१ B थुहिय. २ BC °पुलणी. ३ C भम्भ°. ४ D अर्हदादिध्यान°. ५ BC होइऊण; The *Dhuṇḍhikā* has: एच्च क्त्वातुम्तव्य° [III. 157]॥ अत्। इ। होऊण । होइऊण ।.

लक्खेहिं पि हुणिज्जइ हुव्वइ कोडीहिं अहव मन्ताणं ।
सुअ-देवया थुणिज्जइ न जा न ता चिव्वए नाणं ॥ ७१ ॥
तेण चिणिज्जइ नाणं जिव्वइ मोहो जिणिज्जए कालो ।
सुअ-देवी अन्नेहि वि थुव्वन्ता सुव्वए जेण ॥ ७२ ॥
स-जसं सयं सुणिज्जइ लुव्वइ कम्मं लुणिज्जए पावं ।
पुव्वइ अप्पप्प-कुलं पुणिज्जए महिअ सुअ-देविं ॥ ७३ ॥
भव-भय-धुव्वन्तेहिं पवण-धुणिज्जन्त-तूल-तरलस्स ।
फलमाउअस्स चिम्मइ सुअ-देवीए पसाएण ॥ ७४ ॥

७१. मन्त्राणां लक्षैर्हूयते । अथ वा कोटिभिर्हूयते । कामपि देवताम् उद्दिश्य होमः क्रियते । परं न यावच्छ्रुतदेवता स्तूयते न तावत् ज्ञानं चीयते वृद्धिम् उपैति । अत्र कर्मकर्तरि क्यात्मनेपदे ॥

७२. येन आस्तां यत् स्वयं स्तूयते अन्यैरपि स्तूयमाना श्रुतदेवी श्रूयते तेन पुरुषेण ज्ञानं चीयते स्फीतीक्रियते । मोहः अज्ञानं जीयते पराभूयते तथा कालो मृत्युश्च जीयते अचिराद् मोक्षप्राप्तेः ॥

७३. महित्वा पूजयित्वा श्रुतदेवीम् स्वयशः स्वयं श्रूयते । स्वय श्रोतव्यतया श्लाघ्यं यशस्तेन लभ्यत इत्यर्थः । कर्म लूयते । पापं लूयते । आत्मा पूयते । पवित्रः क्रियते । आत्मकुलं पूयते । अर्चकपुरुषेणेति शेषः ॥

७४. भवभयेन धूयमानैः कम्पमानपुरुषैः पवनेन धूयमानं यत् तूलं रूतं तद्वत् तरलं चञ्चलं तस्य आयुषः फलं श्रुतदेव्याः प्रसादेन चीयते उपचितं क्रियते । परमपुरुषार्थमहानन्दः प्राप्यत इत्यर्थः ॥

---

१ C पच्चइ. २ B श्रूयते. ३ B स्तूयते. ४ BC रुतं. ५ C चमर°; D चरम°.

चिव्वइ अह न चिणिज्जइ जिव्वइ अहवा जिणिज्जए नावि ।
सुव्वइ अह न सुणिज्जइ हुव्वइ न हुणिज्जए अहवा । ७५॥
थुव्वइ अह न थुणिज्जइ पुव्वइ णाइं पुणिज्जए अहवा ।
लुव्वइ अह न लुणिज्जइ धुव्वइ न धुणिज्जए अहवा ॥७६॥
खम्मइ अह न खणिज्जइ हम्मइ नो वा हणिज्जए जेण ।
सव्वं पि तस्स सहलं सुअ-देवि-विइण्ण-पुण्णस्स ॥ ७७ ॥

७५. त्रिभिर्विशेषकम् । येन चीयते अध्यात्मादिषु उपचितेन भूयते । अथ वा न चीयते । जीयते । इन्द्रियादिषु वशिना भूयत इत्यर्थः । अथ वा नापि जीयते । श्रूयते गुरुमुखात् सर्वशास्त्रेषु श्रवणं क्रियते । अथ न श्रूयते । हूयते हवनं क्रियते अथ वा न हूयते ।

७६. स्तूयते देवतादिषु स्तवनं क्रियते । अथ न स्तूयते । पूयते जलादिना पवित्रेण भूयते । अथ वा न पूयते । लूयते अशुभलवनं क्रियते । अथ न लूयते । धूयते पापरजःप्रकम्पनपरेण भूयते । अथवा न धूयते ॥

७७. खन्यते निध्यादिनिमित्तं भूम्यादिखननं क्रियते । अथ न खन्यते । हन्यते शत्रुविनाशनं क्रियते नो वा हन्यते । परं श्रुतदेवी-वितीर्णपुण्यस्य तस्य । अपिरेवार्थे । सर्वमेव सफलम् । यत् किंचित् कुर्वतोपि श्रुतदेवीप्रसादात् सर्वं समीहितं तस्य संजायत इत्यर्थः ॥

हुणिजइ हुव्वइ । थुणिजइ थुव्वन्ता । चिव्वए चिणिजइ । जिव्वइ जिणिजए । सुव्वए सुणिजइ । लुव्वइ लुणिजए । पुव्वइ पुणिजए । धुव्वन्तेहिं धुणिजन्त । चिव्वइ चिणिजइ । जिव्वइ जिणिजए । सुव्वइ । सुणिजइ । हुव्वइ । हुणिजए । थुव्वइ

---

१ B om. °इ जिव्वइ अहवा जिणिज्ज°. २ C नु. ३ B हणज्जइ. ४ B om. अथ न to क्रियते. ५ B om. थुणिजइ. ६ BC put थुव्वन्ता before सुव्वए. ७ B om. जिव्वइ जिणिजए. ८ B om. सुव्वए.

खम्मइ कुबोह-सेलो खणिज्जए मूलओ वि पाव-तरू।
हम्मइ कली हणिज्जइ कम्मं सुअ-देवि-झाणेण ॥ ७८ ॥
सुअ-देविं झाअन्तो अव्वाहय-भत्ति-निच्चल-मणेण।
हम्मइ संसार-दुहं मोहं हन्तूण हन्तव्वं ॥ ७९ ॥
दुब्भउ गाई वुब्भउ भारो लिब्भउ खडं च तेणं खु।
पवयण-गाई-बोहि-क्खीरं न दुहिज्जए जेण ॥ ८० ॥

थुणिजइ। पुव्वइ। पुणिज्जए। लुव्वइ लुणिजइ। धुव्वइ धुणिजएँ। "न वा कर्मभावे व्वः क्यस्य च लुक्" [२४२]॥

चिम्मइ चिव्वइ चिणिजइ[1]। "म्मश्चेः" [२४३]॥

७८. श्रुतदेवीध्यानेन कृत्वा पुरुषेण कुबोध एव सन्मार्गरोधकत्वात् शैलः खन्यते विदार्यते। पापमेव अशुभफलदायित्वात् तरुः मूलतोपि खन्यते। कलिः राटिर्हन्यते क्षिप्यते। कर्म ज्ञानावरणादि हन्यते॥

७९. अव्याहता अखण्डिता या भक्तिस्तस्यां निश्चलं यद् मनस्तेन कृत्वा श्रुतदेवीं ध्यायन् सन् हन्तव्यम् अपायजनकत्वाद् ध्वंसनीयं मोहम् अज्ञानं हत्वा संसारदुःखं हन्ति मोहमूलत्वात् संसारदुःखस्य॥

खम्मइ। खणिजइ। हम्मइ। हणिजएँ[2]। खम्मइ। खणिजएँ[3]। हम्मइ। हणिजइ। "हन्खनोऽन्त्यस्य" [२४४]॥ बाहुलकात् हन्तेः कर्तर्यपि। हम्मइ॥ क्वचिन्न। हन्तूण। हन्तव्वं॥

८०. येन प्रवचनरूपा गौरेवं[4] गौः बोधिमेव क्षीरं न दुह्यते क्षार्यते। तेन पुरुषेण खु इति निश्चितम् गौर्दुह्यताम्। भार उह्यतात्। खटस्तृणानि[5] लिह्यताम्। कर्तव्यकरणविकलस्य तस्य आभीरभारवाहकबलीवर्दभाव एव परमार्थत इति भावः॥

---

१ B °इ. २ BC चिणिजए. ३ BC °इ. ४ B °इ. ५ B गौरेवेव. ६ C °स्तृणेमे.

जेण वहिज्जइ हिअए सुअ-देवी तेण रुब्भए कम्मं ।
रुन्धिज्जइ कलि-ललिअं लिहिज्जए अमयमाकण्ठं ॥ ८१ ॥
डज्झइ भवो डहिज्जइ पावं ताणं खु वज्झइ न धम्मो ।
बन्धिज्जइ जेहिं थुई पवयण-देवीइ भावेणं ॥ ८२ ॥
भावाउ जाणुरुज्झइ अणुरुन्धिज्जइ थवाउ[1] पूआए ।
उवरुज्झइ उवरुन्धिज्जइ तवओ सा जयउ वाणी ॥ ८३ ॥

८१. येन हृदये श्रुतदेवी उह्यते धार्यते तेन पुरुषेण कर्म रुध्यते निवार्यते । कलिललितं कलिकालविजृम्भितं रुध्यते । अमृतम् आकण्ठं लिह्यते आस्वाद्यते । निर्वृतेन भूयत इत्यर्थः ॥

दुब्भउ दुहिजए । वुब्भेउ[3] वहिजइ । रुब्भए रुन्धिजइ । लिब्भेउ[3] लिहिजए । " ब्भो दुह-लिह-वह-रुधामुचातः " [२४५] ॥

८२. यैर्भावेन प्रवचनदेव्याः स्तुतिर्बध्यते ग्रथ्यते । खु इति निश्चितम् । तैः पुरुषैर्भवो दह्यते भस्मसात् क्रियते । विनाश्यत इति यावत् । पापं दह्यते तथा धर्मो न बध्यते कर्मान्तरेण नावष्टभ्यते ॥ ताणं इति तृतीयायाः षष्ठी ॥

डज्झइ डहिजइ । " दहो ज्झः " [२४६] ॥
बज्झइ बन्धिजइ । " बँन्धो न्धः " [२४७] ॥

८३. सा वाणी वाग्देवता जयतु सर्वोत्कर्षेण वर्तताम् । या भावाद् अन्तरङ्गबहुमानतः अनुरुध्यते प्रसाद्यते । सुप्रसन्ना क्रियत इति यावत् । स्तवाद् अनुरुध्यते । पूजाया अर्चनाद् उपरुध्यते अनुकूल्यते । तपसो द्वादशविधतपश्चरणाद् उपरुध्यते ॥

---

१ C थवाअ. २B om. this example. ३ B om. this example. ४ B बंधो धः; C बंधो वः.

भत्ती-संरुज्झन्ता संरुन्धिज्जन्तआण मोहेण ।
न कह वि अवगम्मन्ती सुअ-देवी देउ मह बोहिं ॥ ८४ ॥
भण्णन्ती सुअ-देवि त्ति भणिज्जन्ती ति-लोअ-माअ त्ति ।
कम्मेण व भावेणाणुगम्ममाणा दिसउ कज्जं ॥ ८५ ॥
भत्तीए कीरन्तीइ अहीरन्तीइ सइ हरिज्जन्ती ।
वेडी-करिज्जमाणा तीरन्ते मोह-जलहिम्मि ॥ ८६ ॥

८४. भक्त्या संरुध्यमाना आत्मायत्तीक्रियमाणा । तथा मोहेन संरुध्यमानैर्न कथमपि अवगम्यमाना ज्ञायमाना श्रुतदेवी मह्यं बोधं सर्वपदार्थविषयविज्ञानं ददातु ॥

अणुरुज्झइ अणुरुन्धिजइ । उवरुज्झइ उवरुन्धिजइ । संरुज्झन्ता संरुन्धिजन्तआण । " समनूपाद् रुधेः " ॥ [२४८]

८५. श्रुतदेवतेति भण्यमाना उत्कीर्त्यमाना त्रिलोकमातेति भण्यमाना । वेति चार्थे । कर्मणा पूजादिक्रियया भावेन[1] अन्तरङ्ग-बहुमानेन अनुगम्यमाना आश्रीयमाणा भगवती सरस्वती कार्यं प्रस्तावाद् मम कुमारपालस्य विधेयं दिशतु आज्ञापयतु ॥

अवगम्मन्ती । भण्णन्ती । भणिज्जन्ती । अणुगम्ममाणा । " गमादीनां द्वित्वम् " [२४९] ॥

८६. अथ कुमारपालभूपस्य कर्तव्यम् उपदिशत्विति मनोरथानन्तरोपस्थितश्रुतदेवतादर्शनं गाथाषट्केनाह । षड्भिः कुलकम् । अथ प्रयोजनपृच्छानन्तरं प्रशमाक्रान्तस्य उपशमव्याप्तस्य नृपोत्कृष्टस्य भूपपुंगवस्य कुमारपालस्य श्रुतदेवी प्रत्यक्षा दृष्टिगोचरासीत्

---

१ D भावेन च अन्त°.

अजरिज्जन्त-मयं पि हु जीरन्त-मयं जयं पि पकुणन्ती ।
पतरिज्जन्त-भवोदहि-सेऊवम-चरण-रेणु-कणा ॥ ८७ ॥
जेहि विढप्पइ कित्ती विढविज्जइ जेहि उज्जलं नाणं ।
अज्जिज्जइ जेहि सिरी सव्वेहि वि तेहि झायव्वा ॥ ८८ ॥
सव्वं णव्वइ जेहिं अणज्जमाणा बुहेहि तेहिं पि ।
अमुणिज्जन्त-सरूवा [1]सिद्धेहि वि वाहरिज्जन्ती ॥ ८९ ॥

किंभूता । [2]अहियमाणया अन्येनानपास्यमानया । निश्चलयेति यावत् । क्रियमाणया विधीयमानया भक्त्या अन्तरङ्गबहुमानेन कृत्वा सदा ह्रियमाणा आवर्ज्यमाना । आत्मसा[3]त् क्रियमाणेत्यर्थः । मोहोऽज्ञानम् तदेव जलधिस्तस्मिंस्तीर्यमाणे लङ्घ्यमाने वेडा प्रवहणं क्रियमाणा । संसाराद् उत्तितीर्षुभिराश्रीयमाणेत्यर्थः ॥

८७. हु इति निश्चितम् । जगदपि न जनमात्रम् अजीर्यमाणमदमपि अभ्रश्यमानाभिमानमपि जीर्यमाणमदम् । विनयपरम् इत्यर्थः । प्रकुर्वती विदधाना प्रतीर्यमाणः आराधकैर्विलङ्घ्यमानो यो भवो दधिस्तत्र निस्तारक[4]त्वात् सेतूपमाश्चरणरेणुकणा यस्याः सा तथा ॥

८८. यैः कीर्तिरर्ज्यते आसाद्यते यैरुज्ज्वलं निर्मलं ज्ञानम् अर्ज्यते यैः श्रीरर्ज्यते तैः पुरुषैः सर्वैरपि ध्यातव्या ॥

८९. यैः सर्वमपि ज्ञायते तैरपि बुधैरज्ञायमाना एवंस्वरूपेत्यबुध्यमाना । सिद्धैरपि अणिमाद्यैश्वर्यसंपन्नपुरुषैरपि अज्ञायमानस्वरूपा व्याह्रियमाणा भण्यमाना । श्रुतदेवताध्यानेनैव कीर्तिज्ञाने संपद्येते इत्यर्थः ॥

---

१ BD सव्वेहि वि; C सद्धेहि वि. २ B अहियमाणयाऽन्येनानपा°; C अहियमाणयोऽन्योनानपा°; D अपहिय°. ३ BC °सत्. ४ C °कृत्वात्.

वाहिप्पन्ताढप्पन्त-मङ्गले गिण्हणिज्ज-अभिहाणा ।
आढविअ-थुईहि सया सिप्पन्ती भत्ति-घिप्पन्ती ॥ ९० ॥
सुर-वहु-छिप्पन्त-पया छिविज्जमाणा थुईहि सुअ-देवी ।
पसमाप्फुण्णस्स[1] निवोकुसस्स[2] अह आसि[3] पच्चक्खा ॥ ९१ ॥

९० व्याह्रियमाणं नैमित्तिकादिना भण्यमानम् आरभ्यमाणं बन्ध्वादिना क्रियमाणं च यन्मङ्गलं शुभकार्यं तस्मिन् गृह्यमाणाभिधाना त्वत्प्रसादान्निर्विघ्नं भवत्विति उत्कीर्त्यमाननामा । आरब्धस्तुतिभिः भक्तजनकृतस्तवनैः कृत्वा सदा स्निह्यमाना स्निहेरन्तर्भूतण्यर्थत्वात्[5] स्नेहवती क्रियमाणा । सिच्यमाना स्तावकेन आत्मनि आर्द्रहृदया क्रियमाणा । भक्त्या गृह्यमाणा आत्मसात् क्रियमाणा । न दुराराधेत्यर्थः ॥

९१. सुरवधूभिः स्पृश्यमानौ प्रणामावसरे भालेन घृष्यमाणौ पादौ यस्याः सा । तथा स्तुतिभिः कविस्तोत्रैश्च स्पृश्यमाना विषयीक्रियमाणा ॥

कीरन्तीइ । अहीरन्तीइ । हरिजन्ती । करिज्जमाणा । तीरन्ते । अजरिज्जन्त । जीरन्त । पतरिज्जन्त । " हृ-कृ-तॄ-ज्रामीरः " [२५०] ॥

विढप्पइ विढविज्जइ अजिज्जइ । " अर्जेर्विढप्पः " [२५१] ॥
णव्वइ । अणज्जमाणा । अमुणिज्जन्त । " ज्ञो णव्व-णजौ " [२५२] ॥
वाहरिजन्ती वाहिप्पन्त । " व्याहृगेर्वाहिप्पः " [२५३] ॥
आढप्पन्त आढविअ । " आरभेराढप्पः " [२५४] ॥
सिप्पन्ती । " स्नेह-सिचोः सिप्पः " [२५५] ॥
गेण्हणिज्ज घेप्पन्ती । " ग्रहेर्घेप्पः " [२५६] ॥

---

१ B °पुण्णस्स; C °पुणस्स. २ B °कसस्स. ३ B हासि. ४ BCD °दाद-निर्वि°. ५ BC °तेनर्थत्वा° for °तण्यर्थत्वा°. ६ C स्तव°.

अणथक्कन्त-गिराए अमयासाराणुहारिणीइ तदो ।
इअ उत्तं देवीए वच्छल्लेणं महन्देणं ॥ ९२ ॥
तइ इन्दो निच्चिन्दो विहरदु अन्देउरम्मि सो दाव ।
इन्दस्स ताव मित्तं हवेसि महि-सामिआ तुमयं ॥ ९३ ॥

छिप्पन्त छिविज्जमाणा । " स्पृशेश्छिप्पः " [२५७] ॥
अप्फुण्ण[2] । उक्कुसस्स । " क्तेनाप्फुण्णादयः " [२५८] ॥

९२. ततो नृपप्रत्यक्षानान्तरं महता वात्सल्येन अनुकूलतया देव्या श्रुतदेवतया[3] । अमृतस्य आसारः वेगवद्वर्षस्तम् अनुहरति सदृशीकरोतीत्येवंशीला णिनि ङ्याम् अनुहारिणी तया अफ्फुक्कन्ती[4] अन्तरा अत्रुट्यन्ती[5] या गीर्वाक् तया कृत्वा इति वक्ष्यमाणम् उक्तम् ॥

अणथक्कन्त । " धातवोर्थान्तरेपि " [२५९] ॥ केचित् कैश्चिद् उपसर्गैर्नित्यम्[6] । अणुहारिणीइ ॥

[इति] प्राकृतभाषा समाप्ता ॥

तदो । " तो दोऽनादौ शौरसेन्याम् अयुक्तस्य " [२६०] ॥ अयुक्तस्येति किम् । उत्तं ॥

९३. उक्तमेव गाथाष्टकेनाह । त्वया कृत्वा । तावद् इति अभ्युप-

---

१ BCD स्पृश°. २ B आपुन्न । उक्कोसस्स । क्तेनापुन्नदयः । ; C अफुन्न । उक्कोसस्स । क्तेनापुन्नादयः ।. A reads the sūtra thus: क्तेनाफुन्नादयः ।. ३ B °देवया. ४ BC अप°. ५ BC उपसर्गे. ६ After उपसर्गे which it reads for उपसर्गैः, C differs from B up to the end of the Sarga, giving a different commentary from the latter. See Note at the end of the Sarga.

हंहो मणस्सि रायं जं अव भयवं ति विन्नवेदि भवं ।
रक्खिज्जसु तेण तुमं जिण-वइणा मेइणी-मघवं ॥ ९४ ॥
अय्यावत्ते सयले कद-कज्जो तं खु थाम-सिरि-णाह ।
जिण-नाध-सुमरणे इधमज्जिद-इह-लोअ-पर-लोअ ॥ ९५ ॥

गमे । ततश्च अभ्युपगतम् एतत् । स विश्वप्रसिद्ध इन्द्रो निश्चिन्तः । एतदरातीनां सकलदानवानां त्वया हननाद् निःशङ्कः सन् अन्तःपुरे विहरतु रमताम् । तथा तुमयं इति अयं त्वम् । अथ वा युष्मदः सिना सह तुमयं इति कश्चित् तदा तुमयं इति त्वम् । हे महीस्वामिन् पृथ्वीपते इन्द्रस्य तावद् मित्रं बान्धवो भवसि संजातः । भवसीति सैत्सामीप्ये [हे०. ५. ४] इत्यादिना वर्तमाना ॥

महन्देणं । निच्चिन्दो । अन्देउरम्मि । " अधः क्वचित् " [२६१] ॥

दाव ताव । " वादेस्तावति । " [२६२] ॥

९४. मनस्विन् अभिमानिन् हंहो राजन् भवान्, अव भगवन् इति, यं विज्ञपयति भक्तिपूर्वं वदति । तेन जिनपतिना मेदिनीमघवन् त्वं रक्ष्यस्व त्रायस्व । तेन तव पालनं क्रियताम् इति यावत् ॥

महि-सामिआ । मणस्सि । " आ आमन्त्र्ये सौ वेनो नः" [२६३] ॥

रायं । " मो वा " [२६४] ॥

भयवं । भवं । " भवद्भगवतोः" [२६५] ॥ क्वचिद् अन्यत्रापि । मघवं ॥

९५. स्थामश्रीः पराक्रमलक्ष्मीः तस्या नाथ इह अस्मिन् जगति जिननाथस्मरणे सति अर्जितेहलोकपरलोक सफलीकृतेहपरभव खु निश्चितं सकले आर्यावर्ते समस्तार्यजनपदेषु त्वं कृतकृत्यः निष्पन्नप्रयोजनः ॥

---

१ B तत्सा°; C wanting.

तायध समग्ग-पुहविं तायह सग्गं पि भोदु तुह भद्दं ।
होदु जयस्सोत्तंसो तुह कित्तीए अपुरवाए ॥ ९६ ॥
सत्तीइ अपुव्वाए होदूण हरि व्व हविय सेसो व्व ।
होत्ता भरहो व्व तुमं एग-च्छत्तं कुणसु रज्जं ॥ ९७ ॥
करियावणि-उद्धारं गुरु-भावं गडुय कडुय बलि-बन्धं ।
गच्छिय लच्छिमुविन्दो भोदि भवं भोदु इन्द-समो ॥९८॥

अय्यावत्ते कज्जो । " न वा र्यो य्यः" [२६६] ॥

सिरि-णाह जिण-नाध । " थो धः" [२६७] । अपदादावित्येव[1] । थाम ॥

९६. हे नरेन्द्र समग्रपृथिवीं त्रायस्व पालय । स्वर्गं दिवमपि त्रायस्व । तथा तव भद्रं भवतु । तव अपूर्वया लोकोत्तरया कीर्त्या कृत्वा जगत उत्तंसः शिरःशेखरश्च भवतु ॥

इधेध[2] इह । तायध तायह । " इह-हचोर्हस्य " [२६८] ॥

भोदु होदु । " भुवो भः " [२६९] ॥

९७. अपूर्वया शक्त्या पराक्रमेण कृत्वा हरिः इन्द्रः कृष्णो वा स इव भूत्वा संपद्य शेषः अनन्तः स इव भूत्वा भरतः आद्यचक्री स इव भूत्वा च त्वम् एकच्छत्रं राज्यम् आधिपत्यं कुरु ॥

अपुरवाए अपुव्वाए । " पूर्वस्य पुरवः " [२७०] ॥

होदूण । हविय । होत्ता । "क्त्वे इय-दूणौ" [२७१] ॥

९८. अवनेः उद्धारं द्विषद्विपद्बन्धो रक्षणं कृत्वा गुरुभाव[3] गत्वा बलिनां बन्धं कृत्वा लक्ष्मीं गत्वा आसाद्य च भवान् उपेन्द्रो भवति । यतः सोपि कृतप्रलयकालसमुद्रमग्नपृथिव्युद्धारः बलिबन्धने संजात-महाप्रमाणः विहितबलिदानबन्धः समासादितलक्ष्मीकश्चेति । तथा भवतु भवान् इन्द्रसमः । परमैश्वर्येण अधुना शक्रकल्पः संजायताम् इति भावः ॥

---

१ BD °दादित्ये°. २ C इधं. ३ D °वं गौरवं ग°.

अम्हेहि तुह पसंसा किज्जदि अन्नेहि किज्जदे न कहं।
कित्ती रमिस्सिदि[1] तुहा सग्गादु रसातलादो वि ॥ ९९ ॥
दाणिं तुह तुट्ठा ता देमि वरं इअ तुमम्मि जुत्तमिमं।
जुत्तं णिमं खु मग्गसु इह किं णेदं ति मा चिन्त ॥१००॥
भणिओ निवो किमेदं तिहुयण-रज्जं पि तुमइ तुट्ठाए।
तुज्झ ग्येव पसाया सुरीओ हञ्जे त्ति भण्णन्ति ॥ १०१ ॥

करिअ। गडुअ। कडुअ। गच्छिअ। "कृ-गमो डडुअः" [२७२]॥
भोदि। "दिरिचेचोः" [२७३]॥

९९. हे महाराज अस्माभिः। सकललोकनमस्करणीयाभिरित्यर्थः। तव प्रशंसा श्लाघा क्रियते अतः कथम् अन्यैर्विबुधैः न क्रियते। अपि तु विधीयत एव। तथा तव कीर्तिः आ स्वर्गाद्[2] आ रसातलादपि स्वर्गं रसातलं च व्याप्य रमिष्यते विचरिष्यति॥

किज्जदि। किज्जदे। "अतो देश्च" [२७४]॥ अत इति किम्। भोदि॥
रमिस्सिदि[3]। "भविष्यति स्सिः" [२७५]॥
सग्गादु। रसातलादो। "अतो ङसेर्डादो-डादू" [२७६]॥

१००. हे नृप इदानीं तव तुष्टा। तस्मात् त्वयि वरं ददामीति युक्तम् इदम्। युक्तं भगवत्या वरवितरणम्। परम् अहं कथं याच्ञां करोमीत्याह। खु इति निश्चितम् युक्तम् इदम्। मम पार्श्वाद् याचनं समुचितम् इति भावः। अतो मार्गय वरं याचस्व। इह मयि विषये किम् एतद् इति मा चिन्तय। अस्याः सकाशात् किं वरमार्गणेन इतीदं मा पर्यालोचयेति भावः॥

दाणिं। "इदानीमो दाणिं" [२७७]॥
ता। "तस्मात् ताः" [२७८]॥

१०१. हे भगवति त्वया तुष्टया किम् एतद् वरप्रदानमात्रम्। न किंचिद् इत्यर्थः। यतस्त्रिभुवनराज्यमपि। आस्तां पृथिवीपतित्वमात्रम् इति

१ BD रमिस्सदि; C रम्मिसिदि. २ BD सर्गा°. ३ BD रमिस्सदि।.

हीमाणहे देवि तुमं सि दिट्ठा हीमाणहे हं चकिदो भवादो ।
णं अम्महे [1]किं पि [3]भणोवएसं हीही भणन्ता वि समन्ति जेण ॥

नृपो भणितः विज्ञपयितुम् आरब्धवान् । तथा तवैव प्रसादात् सुर्यो देव्यः हञ्जे त्ति चेटिका इति भण्यन्ते चेटिकावद् आहूयन्त इत्यर्थः ॥

जुत्तमिमं जुत्तं णिमं । किं णेदं किमेदं । "मोन्त्याण्णो वेदेतोः "[२७९] ॥

तुज्झ य्येव । " एवार्थे य्येव " [२८०] ॥

हञ्जे त्ति । " हञ्जे चेट्याह्वाने " [२८१] ॥

१०२. हीमाणहे इति आश्चर्ये । देवि[4] श्रुतदेवते त्वं दृष्टा विलोकिता असि भवसि । हीमाणहे इति निर्वेदे । अतः निर्विण्णत्वाद् अहं भवात् चकितस्त्रस्तः । णमिति नन्वर्थे । अम्महे इति हर्षे । ततः हे भगवति ननु सहर्षं कमपि कंचन उपदेशं भण आदिश । येन उपदेशेन कृत्वा । हीहीति विदूषकाणां हर्षद्योतने । ततो हीही भणन्तः हर्षेण हीहीशब्दं कुर्वन्तः निरन्तरं हसनशीला विदूषका अपीत्यर्थः । शाम्यन्ति उपशमिनो भवन्ति । भण उपदेशम् इत्यनेन उत्तरसर्गार्थसूचनम् । इन्द्रवज्रा छन्दः ॥

हीमाणहे । हीमाणहे । " हीमाणहे विस्मय-निर्वेदे " [२८२] ॥

णं । " णं नन्वर्थे " [२८३] ॥

अम्महे । " अम्महे हर्षे " [२८४] ॥

हीही ॥ " हीही विदूषकस्य " [२८५] ॥

" शेषं प्राकृतवत् " [२८६] । शौरसेन्यां यत् कार्यम् उक्तं ततोन्यत् प्राकृतवदिति । अतः जेणेति " टा-आमोर्णः " [३.६] " टा-ण-शस्येत् " [३.१४] च प्रवर्तते ॥

[इति] शौरसेनी भाषा समाप्ता ॥

इत्याचार्यश्रीहेमचन्द्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रय-
महाकाव्यवृत्तौ सप्तमः सर्गः समाप्तः ॥

---

१ BD किं वि. २ C भणोपदेसं. ३ BD आश्चर्य. ४ D हे देवि. ५ BC °वदिति; D °वदेव. ६ BCD टामोर्णः.

अष्टमः सर्गः ।

कधिदे शुभोवदेशे शलश्शदीए तदो अपस्खलिदे ।
भव-कस्ट-गिम्ह-पदहण-विघस्टणे शुस्टु-मेघे व ॥ १ ॥
अदिशुस्तिदं निविस्टे चदुस्त-वग्गं विवय्यिद-कशाए ।
शावय्य-योग-लहिदे शाहू शाहदि अणञ्ञ-मणे ॥ २ ॥

१. ततः नृपविज्ञप्तिकानन्तरं भवकष्टमेव ग्रीष्मप्रदहनं निदाघसंतापस्तस्य विघट्टणे अपनयने सुष्ठुमेघ इव वर्षुकजलद इव । अप्रस्खलितः अबाधितः शुभोपदेशः सरस्वत्या कथितः प्रतिपादितः ॥

कधिदे । शुभोवदेशे । " अत एत् सौ पुंसि मागध्याम् " [२८७] ॥
शलश्शदीए । " र-सोर्ल-शौ " [२८८] ॥
अपस्खलिदे । कस्ट । " स-षोः संयोगे सोऽग्रीष्मे " [२८९] ॥ अग्रीष्म इति किम् । गिम्ह ।
विघस्टणे । शुस्टु । " ट्ट-ष्ठयोः स्टः " [२९०] ॥

२. उपदेशमेव एकाशीत्या गाथाभिराह । अतिसुस्थितम् अतिसमाहितं यथा भवति एवं निविष्टः[1] धर्मध्याननिरतः अत एव विवर्जितकषायः क्रोधादिरहितः । सावद्ययोगरहितः सपापव्यापारवर्जितः[2]। अनन्यमनाः मोक्षैकतानमानसः साधुः संयतः चतुर्थवर्गं निर्वाणं साधयति निष्पादयति । आत्माधीनम् आधत्त इति यावत् ॥

अदिशुस्तिदं । चदुस्त । " स्थ-र्थयोः स्तः " [२९१] ॥
विवय्यिद । शावय्य-योग । " ज-द्य-र्यां यः " [२९२] ॥

---

१ BD निविष्टे; C निविष्ठे. २ D विवर्जितः.

पुञ्जे निशाद-पञ्जे सुपञ्जले यदि-पधेण वञ्जन्ते ।
शयल-यय-वश्वलत्तं गश्चन्ते लहदि पलम-पदं ॥ ३ ॥
श-पल-विवञ्का-लहिदे पेस्कन्ते सव्वमोल्ल-दिस्टीए ।
मिद-पियमाचस्कन्ते चिष्ठदि मग्गम्मि मोञ्कस्स ॥ ४ ॥
एदस्स वधं कलिमो भत्तिं एदाह इदि मदी जाहँ ।
ताणं दोण्हं पि हगे हिदे त्ति बुद्धी पउदव्वा[2] ॥ ५ ॥

३. पुण्यः सुकृती निशातप्रज्ञः कुशाग्रीयबुद्धिः सुप्राञ्जलः कौटिल्यरहितः यतिपथेन साधुमार्गेण व्रजन् प्रयान् सकलजगद्वत्सलत्वं त्रिजगदानुकूल्यं च गच्छन् समाचरन् सन् पुरुषः परमपदं मुक्तिं लभते प्राप्नोति ॥

अणञ्ज-मणे । पुञ्जे । पञ्जे । सुपञ्जले । "न्य-ण्य-ञ्ज-ञ्जां ञ्जः"[२९३]॥
वञ्जन्ते । "व्रजो जः" [२९४] ॥
गश्चन्ते । "छस्य श्चोनादौ" [२९५] ॥ लाक्षणिकस्यापि । वश्वलत्तं ॥

४. स्वपरविवक्षारहितः शत्रौ मित्रे च समभावः । अत एव सर्वं समस्तलोकम् आर्द्रदृष्ट्या सकरुणदृशा प्रेक्षमाणः विलोकयन् मितं प्रियं च आचक्षाणः वदन् मोक्षस्य मार्गे पदव्यां तिष्ठति ॥

विवञ्का । मोञ्कस्स । "क्षस्य ञ्कः" [२९६] ॥
पेस्कन्ते । आचस्कन्ते । "स्कः प्रेक्षाचक्ष्योः" [२९७] ॥
चिष्ठदि । "तिष्ठश्चिष्ठः" [२९८] ॥

५. एतस्य वधं कुर्मः भक्तिम् एतस्य कुर्मः इति मतिः आत्मानं प्रति एवं बुद्धिर्ययोः । ताणं दुण्हमिति षष्ठीसप्तम्योः अर्थं प्रत्यभेदात् तयोर्द्वयोरपि विषये अहं वयं वा इति हिता बुद्धिः प्रयोक्तव्या ।

---

१ None of the three MSS. have taken care to distinguish all cases of *anunāsika* by the particular concave mark. २ BD पउदव्वा.

पञ्ञान राचिञा गुन-निधिना रञ्ञा अनञ्ञ-पुञ्ञेन ।
चिन्तेतव्वं मतनाति-वेरिनो किळ विजेतव्वा ॥ ६ ॥
सुद्धाकसाय-हितपक-जित-करन-कुतुम्ब-चेसटो योगी ।
मुक्क-कुटुम्ब-सिनेहो न वलति गन्तून मुक्ख-पतं ॥ ७ ॥

अहमेवायं वयमेव एते इत्यनुकूलः अभेदभावः करणीय इत्यर्थः । अत्र भक्तिकरणमतौ इति उपमानार्थः । अन्यथा भक्तिं चिकीर्षौ सर्वस्यापि आत्मभावो भवत्येव । ततश्च यथा भक्तिं चिकीर्षौ आत्मभावस्तथा जिघांसावपि कर्तव्य इति भावः ॥

एदस्स एदाह । " अवर्णाद्वा ङसो डाहः " [२९९] ॥

जोँहँ । ताणं । " आमो डाहँ वा " [३००] ॥

हगे । " अहं-वयमोईगे " [३०१] ॥

"शेषं शौरसेनीवत् "[३०२]। मागध्यां यदुक्तं ततोन्यत् शौरसेनीवद् द्रष्टव्यम् । अतः हिदे त्ति । " तो दोऽनादौ० " '[४.२६०] इति तस्य दः ॥ पयोद्दव्वा " अधः क्वचिद् " [४.२६१] इति तस्य दः ॥

[इति] मागधी भाषा समाप्ता ॥

६. प्राज्ञानां राज्ञा विचक्षणाधीशेन गुणनिधिना गाम्भीर्यौदार्यधैर्यादिशेवधिना । न अन्यः पुण्यो यस्मात् स तथा । तेन राज्ञा नृपेण मदनादिवैरिणः आन्तराः षट् शत्रवः किल इति प्रसिद्धौ विजेतव्याः अभिभवनीया इति चिन्तयितव्यं पर्यालोच्यम् ॥

पञ्ञा । " ज्ञो ञ्ञः पैशाच्याम् " [३०३] ॥

राचिञा । [रञ्ञा ।] ' राज्ञो वा चिञ् " [३०४] ॥

अनञ्ञ-पुञ्ञेन । " न्य-ण्योर्ञ्ञः " ॥ [३०५]

गुन । वेरिनो । " णो नः " [३०६] ॥

मतनाति । विजेतव्वा । " त-दोस्तः " [३०७] ॥

किळ । " लो ळः " [३०८] ॥

७. शुद्धं निर्मलम् अकषायं क्रोधादिरहितं हृदयं यस्य । अत एव

१ BCD जाणं.

यन्ति कसाया नत्थून यन्ति नड्डून सव्व-कम्माइं ।
सम-सलिल-सिनातानं उज्झित-कत-कपट-भरियान ॥ ८ ॥
यति अरिह-परम-मन्तो पैंढिय्यते कीरते न जीव-वधो ।
यातिस-तातिस-जाती ततो जनो निव्वुतिं याति ॥ ९ ॥

करणानि इन्द्रियाणि तान्येव आत्मनो मोहजननात् कुटुम्बं तस्य चेष्टा स्वस्वविषये व्यापारः । जिता परास्ता करणकुटुम्बचेष्टा च येन स तथा मुक्तकुटुम्बस्नेहः परित्यक्तबन्धुवर्गानुरागः योगी शुभध्यानैकतानः संयमी मोक्षपदं गत्वा प्राप्य न वलते न संसारे समायाति ॥

सुद्धाकसाय । " श-षोः सः " [३०९] ॥
हितपक । " हृदये यस्य पः " [३१०] ॥
कुतुम्ब कुटुम्ब । " टोस्तुर्वा " [३११] ॥
गन्तून । " क्त्वस्तूनः " [३१२] ॥

८. शम एव कोपसंतापहारकत्वात् सलिलम् । तेन स्नातानाम् । निर्धूतान्तरकुवासनामलानाम् इत्यर्थः । उज्झिता त्यक्ता कृतकपटा[2] दर्शितालीकस्नेहत्वाद् रचितनिकृतिः भार्या यैस्तेषां पुरुषाणां कषाया नष्ट्वा तान् मुक्त्वा यान्ति गच्छन्ति सर्वकर्माणि च नष्ट्वा यान्ति ॥

नत्थून । नड्डून । " ड्डून-त्थूनौ ष्टुः " [३१३] ॥
चेसटो । सिनेहो । सिनातानं । भरियान । "र्य-स्न-ष्टां रिय-सिन-सटाः क्वचित्॥ [३१४] ॥

९. यदि अर्हताम् इत्युपलक्षणम् । अर्हदादीनाम् इत्यर्थः । परममन्त्रः । पञ्चपरमेष्ठिनमस्कार इति भावः । पठ्यते परावर्त्यते । जीववधश्च न क्रियते । ततः अर्हदादिमन्त्रगुणनात् जीववधविरतेर्वा यादृशतादृशजातिः हीनोत्तमकुलोपि जनो निर्वृतिं याति ॥

पैंढिय्यते । " क्यस्येय्यः " [३१५] ॥

---

१ BD पठि°. २ BC कृतकपटपटा. ३ BC पठि°.

अच्छति रन्ने सेले वि अच्छते दढ-तपं तपन्तो वि ।
ताव न लभेय्य मुक्कं याव न विसयान तूरातो ॥ १० ॥
तूरातु नेन घेप्पति मुत्ति-सिरी नाइ योग-किरियाए ।
चत्तारि-मङ्गलं-पभुति-मन्तमुक्खोसमानेन ॥ ११ ॥

कीरते । " कृगो डीरः " [३१६] ॥

यातिस । तातिस । " यादृशादेर्दुस्तिः [३१७] ॥

याति । " इचेचः " [३१८] ॥

१०. अरण्य आस्ते शैलेपि आस्ते दृढं तीव्रं तपस्तप्यमानोपि कुर्वन्नपि । परं तावद् न मोक्षं लप्स्यते प्राप्स्यति यावद् विषयाणाम् । " क्वचिद् द्वितीयादेः " [३.१३४] इति पञ्चम्याः स्थाने षष्ठी । अतः विषयेभ्य इत्यर्थः । न दूरात् । विषयेषु यावद् न विरज्यतीत्यर्थः ॥

अच्छति । अच्छते । "आत् तेश्च"[३१९]॥ आत् इति किम्। याति॥

लभेय्य । " भविष्यत्येय्य एव " [३२०] ॥

११. चत्तारिमङ्गलं इति पदं प्रभृति यस्य चत्तारिमङ्गलं अरहन्ता मङ्गलं इत्यादिदण्डकस्य स तथा । स चासौ मन्त्रश्च तम् उद्घोषता उच्चारयता तेन सर्वोत्कृष्टपुरुषेण तया योगक्रियया अर्हदादिध्यानानुष्ठानेन कृत्वा दूराद् मुक्तिश्रीः गृह्यते । अनासन्नापि सिद्धिः आत्मसात् क्रियत इति भावः ॥

तूरातो । तूरातु । " अतो ङसेर्डातो-डातू " [३२१] ॥

नेन । नाए । " तदिदमोष्टा नेन स्त्रियां तु नाए " [३२२] ॥

" शेषं शौरसेनीवत् " [३२३]। पैशाच्यां यद् उक्तं ततोन्यत् शौरसेनीवत् ज्ञेयम् । तदुदाहरणानि चात्र स्वयम् अभ्यूह्यानि ॥

योग-किरियाए । पभुति । " न क-ग-च-जादि° " [३२४] इत्यनेन कगचजादीत्यादिषट्शम्यन्तइत्याद्यन्तसूत्रैर्यदुक्तं तत् न भवति ॥

[इति] पैशाची भाषा समाप्ता ॥

---

१ BC जोग. २ BCD पभिति.

वंन्धू सठासठेसु वि आलम्पित-उपसमो अनालम्फो ।
सव्वञ्ञ-लाच-चलने अनुझायन्तो हवति योगी ॥ १२ ॥
झैंच्छर-डमरुक-भेरी-ढक्का-जीमूत-गफिर-घोसा वि ।
बम्ह-नियोजितमप्पं जस्स न दोलिन्ति सो धंञ्ञो ॥१३॥

१२. सर्वज्ञराजचरणान् अनुध्यायन् योगी अशठेषु अमायाविषु शठेष्वपि बन्धुः हितपरत्वाद् बान्धवकल्पः आलम्बितोपशमः आश्रित-शान्तभावः । अनारम्भः विवर्जितसावद्यव्यापारः अनालम्भो वा परित्यक्त-जीववधो भवति ॥

उक्खोसमानेन । वन्धू । आलम्पित । अनालम्फो । सव्वञ्ञ-लाच । "चूलिकापैशाचिके तृतीय-तुर्ययोराद्य-द्वितीयौ" [३२५] ॥

सव्वञ्ञ-लाच-चलने । "रस्य लो वा" [३२६] ॥

१३. झैंच्छरश्च अडाउजेति प्रसिद्धः । डमरुकश्च भेरी च दुन्दुभिः ढक्का च पटहः । तेषां जीमूतवद् ये गम्भीरा मन्द्रा घोषाः शब्दा अपि। आस्तां रूपादयः । ब्रह्मनियोजितम् आत्मानं यस्य न दोलयन्ति न चालयन्ति । शब्दादिविषया यदात्मानं परमतत्त्वलीनं न क्षोभयन्तीति यावत् । स धन्यः ॥

झैंच्छर । डमरुक । भेरी । ढक्का । जीमूत । गफिर । घोसा । नियोजितं । "नादियुज्योरन्येषाम्" [३२७] ॥

"शेषं प्राग्वदिति" [३२८]॥ धञ्ञो इत्यत्र "न्यण्योर्ञः"[४.३०५]॥

[इति] चूलिकापैशाचिकभाषा समाप्ता ॥

---

१ CD बंधू. २ BC त्सच्छर. ३ BC धन्नो. ४ B आलंबिता. ५ BC त्सच्छर°. ६ BC त्सच्छर°.

उब्भिय बाह असारउ सव्वु वि
म भमि कु-तित्थिअ-पट्ठें[1] मुहिआ ।
परिहरि तृणु जिम्वँ सव्वु वि भव-सुहु
पुत्ता[2] तुह मइ एउ कहिआ[3] ॥ १४ ॥
गङ्गहें जँम्वुँणहें भीतरु[4] मेल्लइ
सरसइ-मज्झि हंसु जइ झिल्लइ ।
तय सो केत्थु वि रमइ पहुत्तउ
जित्थु ठाँइ सो मोक्खु निरुत्तउ ॥ १५ ॥

१४. हे पुत्र त्वं मया ऊर्ध्वबाहु यथा भवति एवमीदृक् एवंविधं कथितः । किं तत् तद् आह । सर्वमपि पुत्रमित्रकलत्रादिकम् असारं संसारदुःखात्राणतया तुच्छम् । तथा कुतीर्थिकपृष्ठेन मुधा मा भ्रम । परमपुरुषार्थलिप्सुः पाषण्ड्याश्रितो मा भूः इति भावः । तथा तृणमिव सर्वमपि भवसुखं स्रक्चन्दनवनितावियशर्म परिहर । मा अत्र इच्छां कृथा इत्यर्थः । वदनकं छन्दः ॥

बाह । पट्ठें । " स्वराणां स्वराः प्रायोपभ्रंशे " [३२९] ॥
पुत्ता । कहिआ । " स्यादौ दीर्घ-ह्रस्वौ " [३३०] ॥
असारउ । सव्वु । तृणु । सव्वु । भव-सुहु । "स्यमोरस्योत् " [३३१]॥

१५. गङ्गायाः इडाया यमुनायाः पिङ्गलाया भीतरु इति शीघ्रादित्वाद् अभ्यन्तरं हंसः आत्मा मुञ्चति । ततः सरस्वत्यां सुषुम्णायाम् । मध्यमायाम् इति यावत् । हंसो यदा झिल्लइ इति तक्षादित्वाद् स्नाति । तदा स हंसः कुत्रापि कस्मिन्नपि स्थाने प्रभूतः प्राप्तः सन् रमते क्रीडति । यत्र सः अनाख्येयः मोक्षः महानन्दः । निरुत्तउ इति शीघ्रादित्वाद् निश्चिन्तस्तिष्ठति । यदुक्तम्

---

१ C पठें; D पट्ठे. २ B पुत्ता ह मइ एहउ. ३ BC भित्तरु. ४ D ट्ठाइ.

केण वि जोग-पओगेंण कह वि हु
घरि रुद्धे सव्वेहिं वि वारिहिं ।
जोअन्तहें वि निहेलण-नाहहु
घर-सव्व-स्सु वि निज्जइ चोरेंहिं ॥ १६ ॥

मध्यमा सुषुम्णाख्याता सिद्धिनिर्वाणकारणम् इति । इडापिङ्गलामध्यम् अपास्य यदा आत्मा सुषुम्णाभ्यन्तरम् आसादयति तदा सर्वत्र समभावत्वाद् मुक्तिम् आप्नोतीत्यर्थः ॥

इडा गङ्गेति विज्ञेया पिङ्गला यमुना नदी ।
मध्ये सरस्वतीं विद्यात् प्रयागः संगमो मतः ॥

इति वाक्याद् गङ्गादीनाम् इडादिपर्यायत्वं बोद्धव्यम ॥

हंसु । सो । सो । मोक्खु । "सौ पुंस्योद् वा" [३३२] ॥ पुंसीति किम् । भीतरु ॥

१६. केनापि अनाख्येयेन योगप्रयोगेण बाह्यविनिवृत्तिरूपसमाधिविधानेन हेतुना कथमपि महता प्रयत्नेन सर्वैरपि आत्मनो बाह्यार्थं प्रति प्रवृत्तिहेतुत्वाद् द्वारैरिव द्वारैः । करणैरित्यर्थः । कृत्वा गृहे शरीरे रुद्धे नियन्त्रितेपि परं द्योतमानादपि जाग्रतोपि । सावधानादपीत्यर्थः । निहेलणेति देश्यो गृहे । तस्य नाथः आत्मा तस्माद् गृहस्य शरीरस्य सर्वस्वमपि तत्स्थात्मगतसमस्तज्ञानादिकमपि न तु स्तोकस्वं चौरैः रागादिभिर्नीयते गृह्यते । रागादियुक्तस्य तादृगपि ध्यानं न स्वार्थसंसिद्धये अलं भवतीति भावः । यत्र किल गृहे द्वाराणि स्थगितानि भवन्ति गृहपतिश्च जाग्रद् भवति तत्र नान्यचौरावकाशः । रागद्वेषादिचौरास्तु एवमपि प्रभवन्तीति ज्ञानादिरक्षणाय रागद्वेषादय एव हन्तव्या इति भावार्थः ॥

केण । पओगेण । " एट्टि " [३३३] ॥
घरि । रुद्धे । " ङिनेच्च " [३३४] ॥

---

१ BCD निहलणेति. २ D तत्स्वात्म°.

करणाभासहुँ मणु उत्तारहु
करणाभासेंहिँ मुक्खु न कसु हि वि ।
आसणु सयणु वि सव्वहों करणेंहिँ
करणहुँ मुक्खु तों निरु सव्वस्सु वि ॥ १७ ॥
विसयहँ पर-वस मच्छहु मूढा
बन्धुहुँ सहिहुँ वि घङ्गलि छूढा ।
दुहुँ ससि-सूरिहिँ मणु संचारहु
बन्धुहँ सहिहँ व वढ विणु सारहु ॥ १८ ॥

सव्वेहिं । वारिहिं । " भिस्येद् वा " [३३५] ॥
जोअन्तहे । निहेलण-नाहहु । ङसेर्हे-हू " [३३६] ॥

१७. भो लोकाः करणाभासेभ्यः यथोक्तपद्मासनादिविपरीतासनेभ्यः मनः उत्तारयत व्यावर्तयत । तानि मा कुरुतेत्यर्थः । हि यस्मात् कारणात् करणाभासैः कृत्वा न कस्यापि मोक्षः निर्वृतिर्भवति । तथा सर्वस्य योगिनः करणैः प्रशस्तपद्मासनादिभिः कृत्वा आसनं लगंडादिभिश्च कृत्वा शयनं निद्रा भवति । ततः तस्मात् करणेभ्यः सर्वस्यापि निरु इति निश्चितम् मोक्षः । निषिद्धासनपरिहारेण कर्मक्षपणार्थं पद्मासनादीनि कुर्वन् मुक्तिम् आप्नोतीत्यर्थः ॥

करणाभासहुं । " भ्यसो हुं " [३३७] ॥
कसु । सव्वहों । सव्वस्सु । " ङसः सु-हो-स्सवः " [३३८] ॥

१८. भो मूढाः विषयाणां परवशाः बन्धूनां बान्धवानां सखीनां मित्राणामपि । घङ्गलेति शीघ्रादित्वात् झगटके । मोहे इत्यर्थः । क्षिप्ताश्च पतिता माध्वम् । तर्हि किं कुर्म इत्याह । द्वयोः शशिसूरयोः इडापिङ्गलयोः मनः संचारयत शुभभावाय तदन्तर्निवेशयत । तथा तृतीयायाः

१ BC °ओ; D °उ.

गिरिहेँ वि आणिउ पाणिउ पिज्जइ
तरुहेँ वि निवडिउ फलु भक्खिज्जइ ।
गिरिहुँ व तरुहुँ व पडिअउ अच्छइ
विसयहिँ तह वि विराउ न गच्छइ ॥ १९ ॥
जइ हिम-गिरिहि चडेविणु निवडइ
अह पयाय-तरुहि वि इक्क-मणु ।
निक्कइअवेँ विणु समयाचारेँण
विणु मण-सुद्धिएँ लहइ न सिवु जणु ॥ २० ॥

षष्ठी [३.१३४] इति तृतीयायाः षष्ठी । अतो बन्धुभिः सखिभिश्च विना । वढेति शीघ्रादित्वात् मूढाः सारयत । धातूनाम् अनेकार्थत्वात् तिष्ठत ॥

विसयहं । " आमो हं " [३३९] ॥

बन्धुहुं । सहिहं । बन्धुहं । सहिहं । "हुं चेदुद्भ्याम्" [३४०] ॥ प्रायोधिकारात् क्वचित् सुपोपि हुं । दुहुं ॥

१९. गिरेरपि आनीतं पानीयं पीयते तरोरपि निपतितं फलं भक्ष्यते । तथा गिरिभ्यस्तरुभ्यो वा पतित्वा आस्ते तथापि विषयेषु न विरागं गच्छति । वनवासः कालिंजरगिर्यादिप्रयागवटवृक्षादिपातोपि च सुकरः । विरागवासना पुनर्दुःकरेति भावः ॥

२०. यदि हिमगिरौ आरुह्य अथ प्रयागतरौ प्रयागवटेपि आरुह्य एकमनाः । पतने कृतनिश्चय इत्यर्थः । निपतति तथापि निष्कैतवेन समयाचारेण विना मनःशुद्धया च विना न शिवं जनो लभते । गिरितरुभ्यः पातः केवलम् अङ्गभङ्गाय । सिद्धान्तोक्तानुष्ठानरागद्वेषराहित्ये च मुक्तये ज्ञेये इति भावार्थः ॥

गिरिहे । तरुहे गिरिहुं । तरुहुं । हिम-गिरिहि । पयाय-तरुहि । "ङसिभ्यस्ङीनां हे-हुं-हयः " [३४१] ॥

निक्कइअवें । समयाचारेण । " " आट्टो णानुस्वारौ " [३४२] ॥

विणसइ माणुसु विसयासत्ति
डज्झइ तरु-गण जिॅम्वँ दावग्गिण ।
विसु जिॅम्वँ विसय पमिल्लिउ दूरें
अच्छहु चित्तें जोअ-विलग्गेंण ॥ २१ ॥
विसय म पसरु निरङ्कुसु दिज्जउ
लोअहों विसएँहिं मणु कड्ढिज्जइ ।
मणु थम्भेविणु पवणि निजोजहु
मण-पवणिहिं रुद्धहिं सिज्झिज्जइ ॥ २२ ॥

२१. यथा दावाग्निना तरुगणा दह्यन्ते विनाश्यन्ते तथा विषयासक्त्या मनोज्ञशब्दादिलाम्पट्येन कृत्वा मानुषो विनश्यति । तथा विषं यथा विषयान् दूरेण प्रमुच्य योगविलग्नेन समाधिलीनेन चित्तेन आध्वं तिष्ठत ॥

मण-सुद्धिएँ । विसयासत्ति । दावग्गिण । " एं चेदुतः " [३४३] ॥ एवम् उतोपि दृश्याः ॥

माणुसु । तरु-गण । विसु । विसय । "स्यम्-जश्शसां लुक्" [३४४] ॥

२२. भो लोकाः निरङ्कुशं निरर्गलं यथा भवत्येवं विषयाणां प्रसरः युष्माभिः मा दायि । विषया निरुध्यन्ताम् इत्यर्थः । ननु विषयप्रसरदाने किं भविष्यति इत्याह । विषयैर्मनः कृष्यते । स्वस्मिन् सतृष्णं क्रियत इत्यर्थः । तर्हि किं कुर्म इत्याह । मनः स्तम्भित्वा नियम्य पवने इडापिङ्गलान्तर्वहमानवायौ नियुङ्ग्ध्वम् । मनसा पवनम् अवष्टभ्नीतेत्यर्थः । यतः मनःपवनयो रुद्धयोः मिथः अवष्टब्धयोः सिध्यते मुक्तीभूयते ॥

विसय । " षष्ठ्याः " [३४५] ॥

लोअहो । " आमन्त्र्ये जसो होः " [३४६] ॥

विसएहिं । मण-पवणिहिं । रुद्धहिं । " भिस्सुपोर्हिं " [३४७] ॥

नाडिउ इड-पिङ्गल-पमुहाओ
जाणेवाओ पवणेंण रुद्धा ।
ताउ न जाणइ जो सव्वाओ
जोगिअ-चरिअंएँ चरइ सु मुद्धा ॥ २३ ॥
गयण-ढलन्त-सुधा-रस-निकहें
अमिअ पिअन्तिहु जोगिअ-पन्तिहु ।
ससहरु बम्भि धरन्तिहु कत्थ वि
भउ नोप्पज्जइ जर-मरणत्तिहु ॥ २४ ॥

२३. इडापिङ्गलाप्रमुखा नाड्यः शरीरे अनेकशिरासद्भावेपि त्रिकालज्ञानहेतुत्वेन प्रधानत्वाद् वामदक्षिणमध्यमा धमनयः पवनेन पार्थिवादिवायुपञ्चकेन रुद्धाः प्रत्येकं सार्धघटिकाद्वयं यावद् अवष्टब्धा ज्ञातव्याः । तथा चोक्तम् ।

नाडीमध्ये तथा भुक्तिः सार्धं तु घटिकाद्वयम् ।
घटिकार्धेन भवेद् भूतम् एवं वा लक्षयेद् बुधः ॥

एकैका नाडी सार्धं घटिकाद्वयं संततं वहति । तत्रापि पञ्चापि पार्थिवादिवायवः स्वस्वभुक्तिं भुञ्जते । सा च कियती भवति । पञ्चानामपि प्रत्येकं घटिकार्धं भुक्तिर्भवति । भवन्ति च पञ्च घटिकार्धानि सार्धघटिकाद्वये इति अस्यार्थः । ता इडाद्या नाडीः सर्वाः समस्ता यो न जानाति स पुरुषो योगिकचर्यया योगिनाम् आचारेण मुधा निरर्थकं चरति । नाडीपवनसंयोगपरिज्ञानविकलेन बहु क्लिश्यतापि योगः साधयितुं न शक्यते इति भावः ॥

नाडिउ । पमुहाओ । जाणेवाओ । ताउ । सव्वाओ । "स्त्रियां जश्शसोरुदोत्" [३४८] ॥

जोगिअ-चरिअए । "ट ए" [३४९] ॥

२४. गगनं ब्रह्मरन्ध्रम् दशमद्वारम् इति यावत् । तस्मात् ढलन्तेति तक्षादित्वात् [४.३९५] क्षरन् वहन् सुधारसो यस्यां सा तथा । सा चासौ

१ BD चरिए.

वज्जइ वीण अदिट्ठिहि तन्तिहि
उट्ठइ रणिउ हणन्तउँ ठाणइँ ।
जहि वीसाम्वुँ लहइ तं झायहु
मुत्तिहें कारणि चप्फल अन्नइँ ॥ २५ ॥

नीका च इडाख्या वामनासिका । तस्याः सकाशात् तत्संबन्धि वा अमृतं पिबन्तीनाम् आस्वादयन्तीनां शशधरम् इडाख्यां नासिकां ब्रह्मणि दशमद्वारे धरन्तीनाम् अमृतक्षारणाय निवेशयन्तीनां योगिपङ्क्तीनां क्वापि कस्मिन्नपि स्थाने जरामरणार्तिभ्यो भयं न उत्पद्यते न उद्भवति। उक्तरीत्या अमृतपानं योगिनां मुक्तये संपद्यते इति भावः ॥

निक्कहे । ङस्-ङस्योर्हें " [३५०] ॥

पिअन्तिहु । जोगिअ-पन्तिहु । धरन्तिहु । जर-मरणत्तिहु । "भ्यसामोर्हुः" [३५१] ॥

२५. अदृष्टायाम् इन्द्रियाविषयभूतायां तन्त्र्यां नाडीलक्षणे गुणे वीणा शरीरलक्षणा वल्लकी वाद्यति । परब्रह्मलीनस्य योगिनः स्वयमेव अभिहन्यत इति भावः । ततः स्थानानि उरःकण्ठप्रभृतीनि घ्नत् ताडयत् रणितम् उत्तिष्ठते प्रयत्नम् अन्तरेण उल्लसति । अनाहतो ध्वनिः उत्पद्यत इति यावत् । तथा तदेव रणितं यत्र यस्मिन् स्थाने विश्रामं लभते तद् ध्यायत ब्रह्मरन्ध्रे मनो नियुङ्ग्ध्वम् इत्यर्थः। किमित्येवं कार्यत इत्याह । मुक्तेः कारणे अन्यानि तपउपसर्गसहनप्रभृतीनि कष्टानुष्ठानानि[1] चप्फलेति शीघ्रादित्वात् चाटुफलानि उपचारवाक्यानि असत्यानि वाक्कूटानि । सिद्धिसाधने असमर्थानीति भावः ॥

अदिट्ठिहि । तन्तिहि । " ङेर्हिं [३५२] ॥

ठाणइं । अन्नइं । " क्लीबे जश्शसोरिं " [३५३] ॥

हणन्तउ । " कान्तस्यात उं स्यमोः " [३५४] ॥

---

१ BC कष्टानि.

जो जहाँ होंतउ सो तहाँ होंतउ
सत्तु वि मित्तु वि किहें वि हुं आवउ ।
जहिं वि हु तहिं वि हु मग्गे लीणा
एक्कएँ दिट्ठिहि दोन्नि वि जोअहु ॥ २६ ॥
कासु वि जासु वि तासु वि पुरिसहों
कहें वि हु जहें वि हु तहें वि हु नारिहें ।
तं हितु वयणु चविज्जइ थोवउँ ।
धुं परिणम्वइ समत्त-पयारेंहिं ॥ २७ ॥

२६. यः यस्मात् भवन् जायमानः स तस्मात् कस्मादपि । किञ्चिदपि कारणम् आश्रित्येति भावः । शत्रुरपि मित्रमपि भवन् संपद्यमानः । हीति स्फुटम् । आवतु प्रतिकूलम् अनुकूलं प्रकर्तुं सम्मीपम् आगच्छतु । परं यस्मिन्नपि तस्मिन्नपि मार्गे लीनाः यदपि तदपि जिनशिवादिदर्शनम् आश्रिता इत्यर्थः । एकया दृष्ट्या समभावेन द्वे अपि शत्रुमित्रे द्योतयतेति । धातूनाम् अनेकार्थत्वात् पश्यत । हुशब्दौ पादपूरणे । एवम् अग्रगाथायामपि हुशब्दाः ॥

जहां । तहां " सर्वादेर्ङसेर्हों " [३५५] ॥
किहे । " किमो डिहे वा " [३५६] ॥
जहिं । तहिं । " ङेर्हिं " [३५७] ॥

२७. कस्यापि यस्यापि तस्यापि पुरुषस्य अयम् आत्मीयः अयम् अन्यः इत्यभिप्रायपरिहारेण मनुष्यमात्रस्य । सर्वस्येत्यर्थः । कस्या

---

१ The Commentator's text reads हि for हु. २ CD परिणमइ. The nasal mark (ँ) is not intended to make the vowel अ nasal but is iutended to affect the consonant व् and to produce the nasal व् which is known in Grammar in the vārtika यवलपरे यवला वा and in the example किंवँ् ह्रलयति. (See हे० ८. ४.३९७.).

तं बोल्लिअइ जु सच्चु पर इमु धम्मक्खरु जाणि ।
एँहों परमत्था एहु सिवु एँह सुह-रयणहँ खाणि ॥ २८ ॥
एइ सुसावग ओइ मुणि पिच्छह तवहिँ तवाइं ।
आयहों जम्महों एहु फलु नायइँ विसय-सुहाइं ॥ २९ ॥

अपि यस्या अपि तस्या अपि नार्याः तद् हितं वचनम् अहिंसा-प्रधानो धर्मः क्रियताम् इत्युपदेशः स्तोकं मितं कथ्यते यत् समस्त-प्रकारैः करणकारणानुमितिरूपैः परिणमति रोचते ॥

कासु । जासु । तासु । " यत्तत्किम्भ्यो ङसो डासुर्न वा " [३५८] ॥
कहे । जहे । तहे । " स्त्रियां डहे " [३५९] ॥

२८. यद् वचः अहिंसादिकं सत्यम् अविसंवादि तत् परं केवलं कथ्यते[1] । इति इदं धर्माक्षरं धर्मरहस्यं जानीहि अवगच्छ । तथा एष परमार्थः उत्तमार्थः । एतत् शिवं मङ्गलम् । एषा च सुखान्येव काम्य-त्वाद् रत्नानि तेषां खनिः आकरः । यत् सत्यम् उच्यते इति सर्वत्रापि संबन्धः ॥

त्रं । ध्रुं । तं । जु । " यत्तदः स्यमोर्ध्रुं त्रं " [३६०] ॥
इमु । " इदम इमुः क्लीबे " [३६१] ॥
एहो । एहु । एह । " एतदः स्त्रीपुंक्लीबे एह एहो एहु " [३६२] ॥

२९. एतान् सुश्रावकान् अमून् मुनीन् पश्यत । किं पश्याम इत्याह । एते सुश्रावकाः अमी मुनयस्तपांसि एकासनकनिर्विकृति[2]-काचाम्लोपवासरूपाणि तप्यन्ते कुर्वन्ति । अथवा युक्तमेवैतद् यद् एते एवम् अनुतिष्ठन्ति । यतः अस्य जन्मनः परमपुरुषार्थसाधकस्य मानुष-त्वस्य एतत्तपस्तपनरूपं फलं साध्यम् एतत्फलपरमपुरुषार्थहेतुत्वात् । न इमानि विषयसुखानि फलम् । परमपुरुषार्थविघातकत्वात् ॥

---

१ C कथ्यते इदानीम्. २ BC °निर्वृकृति°.

साहु वि लोउ तडप्फडइ सव्वु वि पण्डिउ जाणु ।
कवणु वि एहु न चिन्तवइ काइँ वि जं निव्वाणु ॥ ३० ॥
सव्वहों कासु वि उवरि तुहुँ एँहु चिन्तसु निम्मोह ।
तुम्हें म निवडहु[1] भव-गहणि तुम्हइँ सुहिआ होह ॥ ३१ ॥
तुम्हें निरिक्खउ[2] अप्पु जिॅम्वँ तुम्हइँ जिॅम्वँ अप्पाणु ।
पइँ अणुसासउँ पसमु करि तइँ नेउं अक्खउ ठाणु ॥ ३२ ॥

एइ । " एइर्जश्शसोः " [३६३] ॥

ओइ । " अदस ओइ " [३६४] ॥

आयहो । आयइँ । " इदम आयः " [३६५] ॥

३०. सर्वोपि लोकः तडप्फडइ इति तक्षादित्वात् चपलायते मोक्षनिमित्तं प्रयतते । तथा सर्वोपि पण्डितः विचक्षणोस्तीति त्वं हे नृप जानीहि । परं कोपि एतद् न चिन्तयति न विचारयति । यत् [3]किमिति किंस्वरूपं निर्वाणम् ।

साहु । सव्वु । " सर्वस्य साहो वा " [३६६] ॥

कवणु । काइं । " किमः काइं-कवणौ वा " [३६७] ॥

३१. षड्भिः कुलकम् । श्रुतदेवी कुमारपालं प्रति प्राह । हे महाराज अहं युष्माकं बान्धवः स्वजन इति भणित्वा एतद् वक्ष्यमाणं सर्वेषु कथयत यूयम् उपदिशत । किं तद् इत्याह । हे निर्मोह अज्ञानरहित भव्यलोक त्वम् एतद् इदं सर्वस्य कस्यापि उपरि । स्वपक्षे परपक्षे चेत्यर्थः । चिन्तय परिभावय । किं तद् इत्याह । यूयं भवगहने संसारकान्तारे मा निपतत निमज्जत । तथा यूयं सुखिताः कर्माष्टककृतकष्टरहिता भवत ॥

